
सिन्धुवादवृत्तम्



स्वर्गीय म० म० श्रीलक्ष्मणशास्त्री तैलंगकृत-

सिन्धुवादवृत्तम्

सम्पादक-

म. म. राष्ट्रपतिसम्मानित-

स्व. बटुकनाथ शास्त्री खिस्ते

भूतपूर्व आचार्य एवं अध्यक्ष

साहित्य विभाग

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

*

संस्कृत-हिन्दी-व्याख्याकार-

पं० जगन्नाथशास्त्री तैलंग

एम० ए० साहित्याचार्य

प्राचीन राजशास्त्र विभाग

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी



प्रकाशक-

शारदा संस्कृत संस्थान

जगतगंज, वाराणसी-२२१००२

प्रकाशक -
शारदा संस्कृत संस्थान
सी.२७/५१ जगतगंज, वाराणसी-२२१००२
दूरभाष - (०५४२) २२०४१६८

अन्य प्राप्तिस्थान-
शारदाभवन
डी.३६/४४ अगस्त्यकुण्ड, वाराणसी।
दूरभाष - (०५४२) २४५२०३७

सन् २००३

मुद्रक -
सुदर्शन प्रेस
वाराणसी।

लेखकपरिचयः

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नाऽस्ति येषां यशःकाये जरामरणजं भयम्।।

इयं भगवतश्चन्द्रमौलेर्नगरी वाराणसी बहोः कालात् सकलविद्याराजधानीति विदिता सर्वेषां विद्यानुरागिणाञ्च स्पृहणीया समाश्रयभूमिरासीत्। उपनिषत्सु पुराणेषु शास्त्रेषु चास्या महिमातिशयो भृशं जेगीयमानो विलोक्यते। दूरदूरतरेभ्यः प्रदेशेभ्यो भृशं कष्टमङ्गीकृत्याऽपि तदानीन्तनसञ्चारसाधनाऽभावात्पादाचारेणैव भूमिमिमामाजग्मुर्बहवो विद्वांसः।

तेष्वेव महापुरुषेष्वस्मच्चरितनायकस्य जनकः श्रीमान् आन्ध्रनरसिंहशास्त्री स्वदेश एव कृतपूर्वाध्ययनो लब्धव्युत्पत्तिः काव्यकलाकोविदोऽपि सविशेषशास्त्ररहस्याऽधिजिगमिषया अष्टादशहायने वाराणसीमाययौ। अस्याभिजनः कर्णाटकप्रदेशवर्ती बङ्गलोरनगरमण्डले 'यसरगट्टाख्यो' ग्रामो बभूव।

काश्यामागत्य लब्धवैदुष्योऽसौ शास्त्रिवर्यस्तदानीन्तनस्य काशिराजस्य श्रीईश्वरीनारायणसिंहस्य सभायां लब्धसम्मानो बहून् ग्रन्थानपि प्राणैषीत्। येषु हिन्दीभाषामयः 'साहित्यसागरो' नाम लक्षणग्रन्थोऽष्टादशसहस्रपद्यपरिमाणः, अन्यच्च 'काव्यात्मसंशोधनम्' 'शिवभक्तिविलासटीका' चेति ग्रन्थद्वयं एतत्कृतं ज्ञायते। जन्मनाऽऽन्ध्रेणाऽपि कविना सत्वरमेवं हिन्दीभाषायां तादृशः प्रबन्धो निर्मित इति विस्मयास्पदमासीत्। अस्यैव शास्त्रिवर्यस्य तपसा पुण्यपरिपाकेन च त्रय सूनवः समभूवन्। ते च क्रमेण श्रीगङ्गाधरशास्त्रि-रामशास्त्रि-लक्ष्मणशास्त्रिनामानः प्रसिद्धा अजायन्त। त्रयोऽप्येते विद्यार्णवपारङ्गता लब्धमहामहोपाध्यायपदवीका महाकवयश्च समभूवन्निति सौभाग्यं पितुरपि नूनं कल्पनीयम्।

तेषु ज्येष्ठः श्रीगङ्गाधरशास्त्री सर्वातिशायिशेमुषीकः काश्यां देशान्तरे च प्रख्यातः काशिकराजकीयमहाविद्यालये साहित्यदर्शनाध्यापनासक्तश्चिरं शिष्यानपि प्रख्यातान्निर्माय 'अलिविलाससंलाप' प्रभृतिकाव्यनिर्माणैरपि विश्रुतो विरेजे।

भारतसम्राज्या 'सी०आई०ई०' पदव्याऽपि भूषितोऽयं पण्डितंवरः। काशीपण्डित मण्डलस्य चूडामणिरिव श्रीगङ्गाधरशास्त्री तदानीं व्यराजत। शास्त्रार्थसभा काव्यरचनायाञ्चाऽस्य नाऽऽसीत्कश्चित् तुलामारोढुं क्षम इति श्रूयते।

श्रीनरसिंहशास्त्री प्रत्यहं प्रातः पूजनवेलाया श्रीगङ्गाधरशास्त्रिकृतं नूतनं पद्यद्व श्रुत्वैव तस्मै पूजाप्रसादं ददातिस्मेति प्रसिद्धिः। भारतवर्षभूषणायमानस्याऽस्य चरितं "विद्वच्चरितपञ्चके" (म०म०स्व०नारायणशास्त्री खिस्ते विरचिते) सुनिबद्धमुपलभ्यते। द्वितीयो नरसिंहशास्त्रितनयः श्रीरामशास्त्री तथैव सर्वगुणगणोपेत सविशेषं साहित्यशास्त्रे काव्यरचनासु च लब्धपाटवः काशिकराजकीय महाविद्याल सुचिरमध्यापनादिभिर्ललितमधुराभिः काव्यरचनाभिश्च लब्धख्यातिः शिष्यसमुदा सुतरां स्मरणीय एवाऽऽसीत्। एतदीयशिष्येषु सुप्रसिद्ध आचार्यनरेन्द्रदेवः पं०केशवप्रसादमिश्रः एवमन्येऽपि बहवः प्रसिद्धा बभूवुः। एतदीयं चरितं 'सारस्वती सुषमा' पत्रिकायाः प्रथमाङ्के मुद्रितमधलोक्यते।

तृतीयश्च नरसिंहशास्त्रितनयो लक्ष्मणशास्त्री लोकवह्निनवेन्दुमिते वैक्रमाब्दे (१९३७) कार्तिककृष्णचतुर्थ्यां जनिमलभत। कनीयानयं सविशेषं पितृनिकटवर्ती तदीय स्नेहभाजनमासीत्। वाल्य एव पितुरधिगतविद्यासंस्कारः सारस्वतसाधनया परिस्फुरत्काव्यरचनाचमत्कारोऽयं लोकाभिनन्दनीयो ददृशे। यथावसरं कृतोपनयनः स्वकुलपरम्परामनुसृत्य गुरूमुखात्साङ्गां कृष्णयजुः शाखामधीतवान्। तदनु सर्वम तदीयमध्ययनं ज्येष्ठभ्रातुः म० म० गंगाधरशास्त्रिणः सविध एवं पूर्णतामगात्। तदा ढुण्ढिराजशास्त्रिनाम श्रीगङ्गाधरशास्त्रितनयोऽप्येत्सहाध्यायी समवर्तत, य प्रखरमतिवैभवोऽप्यल्पे वयसि दिवञ्जगाम। सहैव साहित्याध्ययनेन शास्त्रान्तराण्यपि गुरोरविजगाम शास्त्रिवर्यः।

तस्मिन् काले गृहमेतदीयं छात्रमधुकराणां प्रफुल्लकुसुमोद्यानकल्पमासीत् यत्र नानाप्रदेशेभ्यः समागताश्छात्राः श्रीगङ्गाधरशास्त्रिणां श्रीरामशास्त्रिणाञ्च सविधे विद्याग्रहणसौभाग्यमन्वभूवन्। तदानीन्तनानि कानिचन संस्मरणानि विश्वभारत्या आचार्येण क्षितिमोहनसेनमहाशयेन स्वलेखे प्रकाशितान्यवलोक्यन्ते।

श्रीलक्ष्मणशास्त्रिणः सहाध्यायिषु विशिष्य विद्वांसः श्रीदामोदरलाल गोस्वामी,

म० म० नित्यानन्दपन्तपर्वतीयः, श्रीरामावतारशर्मा प्रभृतयो विख्यातवैदुष्या अवर्तन्त। नेपालराजगुरवो हेमराजशर्माणो कविकुलचन्द्रशर्मप्रभृतयश्च प्रख्याता सहपाठिन एवाऽभूवन्।

आसीत्स कालो वाराणस्यां संस्कृतविद्यायाः परमोत्कर्षावहः सर्वत्र पण्डिताः कवयः शास्त्रर्थपट वश्च यत्र-तत्र भारतीवैभवं प्रतिष्ठापयन्तः सञ्चरन्ति स्म।

सत्यपि शास्त्राध्ययने शास्त्रिवर्यस्य काव्यकलायां निसर्गत एव निरर्गला प्रतिभा व्यद्योतत 'काव्यं तु जायते जातु कस्यचित्प्रतिभावतः' इत्युक्तदृष्ट्या सहज-कवित्वसंपन्ना विरला एव मतिमन्तोऽनुभूयन्ते!

अप्रयासमेव विविधेषु विषयेषु शास्त्रिवर्यस्य लेखनी सरसमधुरया शैल्या गद्य पद्यमयीं रचनामाविष्कर्तुम् क्षमते स्म। एवं गुरुभिरपि श्लाघनीय आसीदेतदीयः काव्यरचनायामभियोगः। पञ्चाभ्राङ्केन्दुमिते (१९०५) ईशवीयाब्दे 'साहित्याचार्य' पदवी प्रथमश्रे-ण्यामधिगता शास्त्रिवर्येण। राजकीय संस्कृत महाविद्यालयस्य 'ऐग्लो संस्कृत विभागे' तथा स्वयमपि स्वतन्त्रतया आंग्लभाषासाहित्यमधीतमतेन विदुषा सत्प्रयोगेष्वपि प्रावीण्यमासादितम्।

तस्मिन् समये 'क्वीन्सकालेज' नामा स महाविद्यालयः स्नातकोत्तरकक्षावधि पाठनव्यवस्थासम्पन्न आसीत्। तत्र च वैदेशिका विशिष्टा विद्वांसोऽपि प्राध्यापकत्वेन नियुक्ता अभूवन्। सुप्रसिद्धो डॉ० टर्नरनाका पाश्चात्यपण्डितः शास्त्रिवरसविधे संस्कृत-प्राकृतसाहित्यमध्यैष्ट। कालान्तरे कदाचित् काशी हिन्दू विश्वविद्यालस्य दीक्षान्तमहोत्सवे समागतः स महानुभावो लक्ष्मणशास्त्रिणः सकाशाद् गोर्वाणवाणीमा-धुर्यमधिगतवानस्मीत्यवोचत्। एवं प्रत्यन्तदेशीयेभ्यो विद्वद्भ्यो विद्याविनिमयन्यायेन शास्त्रिवरः फ्रेञ्च-जर्मन-प्रभृतिभाषापरिचयमप्यवाप्तवान्।

शास्त्रिवरस्य प्रथमा नियुक्तिः क्वीन्सकालेजहाईस्कूल विभागे संस्कृताध्यापकपदे संपन्ना, तदनु कालेन 'क्वीन्सकालेज' महाविद्यालये तत्रैव संस्कृतप्राध्यापकपदे नियोगः संपन्नः। शास्त्रिवराणां बुद्धिवैशद्यम्, असाधारणं व्यक्तित्वं, व्यवहारकौशलं, संलापचातुरी, समयपरिपालनमित्यादयो गुणाः सर्वानेव जनान् वशीकर्तुम् प्रभवन्ति स्म। तदानीं सुप्रसिद्धो डॉ० वेनिसमहाभागः संस्कृतांग्लमहाविद्यालययोः प्रधानाचार्य

आसीत्। स च श्रीगङ्गाधरशास्त्रिवर्यादधीयानं शास्त्रिवर्यमपि गुणवत्तया स्निह्य स्म। एवं क्रमशः प्रसृते यशःसौरभे कियताऽपि कालेन भारतसम्राज्ञा चत्वारिंशद्वर्षी शास्त्रिवरो 'महामहोपाध्याय' पदप्रदानेन समलंकृतोऽभूत्। 'गुणाः पूजास्थानं गुणि न च लिङ्गं न च वयः' इत्युक्तिरस्य महानुभावस्य विषये चरितार्थेव भाति रससिद्धा शास्त्रिवरस्य लेखनी क्वचिदपि विषये न रुद्धाऽऽसीत् संकृल्लिखितस्त न पुनः संशोधनमावश्यकमभूत्।

आवापोद्धरणे तावद् यावद्दोलायते मनः।
पदानां स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती।।

इति लक्षितो रसपाकः शास्त्रिवरस्य रचनासु दृश्यते। काव्यरचनाव्यसनञ्च चरमावस्थापर्यन्तमनुगच्छति स्म पण्डितमेनम्। एकवर्षावधि महाविद्यालया गृहीतावकाशे ज्येष्ठभ्रातरि श्रीगङ्गाधरशास्त्रिवर्ये तावत्कालं तत्पदे नियुक्तोऽ महानुभावो नानाविधान् शास्त्रीयग्रन्थानपि निरर्गलतया पाठयन् विस्मापयामा प्रेक्षकाणां चेतांसि।

क्वीन्सकालेजपाठनकाले ये छात्राः समध्यापितास्तेषु बहवः प्राड्विवाक न्यायधीशा, राजकीयेषु विशिष्टेषु पदेषु लब्धप्रतिष्ठा बभूवुः, ये समये-समये गुर स्वभाव-सौजन्यं, पाठनकौशलञ्च वर्णयन्तो दृष्टाः। संस्कृतच्छात्रेषु प्रसिद्ध प्रो.बटुकनाथशर्माणः, प्रो० क्षेत्रेशचन्द्रचट्टोपाध्यायाः, म०म० नाराणयशास्त्रि खिस महानुभावाः, पण्डितगौरीनाथपाठकाः, जगन्नाथशास्त्रिहोशिङ्गशर्माणः, अनन्त रामशास्त्रिणो वेतालाः, नेपालदेशीया रामनाथाचार्यप्रभृतयो बहवः आसन्।

मध्याह्नोत्तरकाले स्वगृह एव साहित्यग्रंथान् पाठयन्ति स्म शास्त्रिवर्याः तत्र वाराणसेया बहवश्छात्रा व्युत्पत्तिकामनया शास्त्रिवर्यमुखान्नैषधादिकाव्यानामा शयमवबोद्धुमागच्छन्ति स्म।अध्यापनकाले नानाविधसुभाषितनामालापप्रभृतिभिरमायै शिष्यबुद्धिशोधने किमपि कौशलमासीदेतेषाम्। स्वभावतः प्रसिद्धिपराङ्मुखा अप्ये विशेषानुरोधेन काव्यगोष्ठीषु विद्वत्सभासु कदाचिदुपयान्ति स्म। उज्ज्वलं वासः भोजनादीनामुत्तमाऽभिरुचिः, सुहृद्भिः शिष्यैश्च साकं कदाचिदुद्यानभोजनोत्सव एवमादिभिर्विदग्धचरितैस्समरञ्जितमासीदेतदीयं जीवनम्।

क्वचित्पुरस्कारमभिलषतः स्वमित्रस्य कृते शास्त्रिवरेण 'गणेशपरिणयम्' नाम नाटकमेकं 'गणेशसम्भवं' गद्यकाव्यञ्चैकं प्रादायि, येन स पर्याप्तं पुरस्कारमलभत् एवमासीदुदारा चित्तवृत्तिः।

महाकवेर्यादृशं स्वरूपमुपवर्णितं राजशेखरादिभिः तत्सर्वं शास्त्रिवरस्य जीवने सर्वात्मना सङ्गतमलक्ष्यत। एवं सति कालपरिपाके स्थविरे प्रत्यासन्ने सप्ततितमे हायने षडभ्रव्योमयुग्माब्दे (वै०२००६) चैत्रशुक्लप्रतिपदि शास्त्रिवर्या अनायासेन पाञ्चभौतिकं वपुः परित्यज्य काश्यां शिवसायुज्यमवापुः। योगिजनसदृशमेवैतेषां महाप्रयाणमभूत्।

शास्त्रिवर्याणां रचनाः समये-समये प्रकाश्यमानेषु पत्र-पत्रिकादिषु मुद्रिताः सन्ति। सूक्तिसुधायां शरद्वर्णनं, शिखिरदशकं, सुदर्शनचरितं नाम काव्यं, अभिनवबृहत्कथा चेति मुद्रिता रचनाः सन्ति। अभिनवबृहत्कथाया आर्याच्छन्दसां संख्या ३६९ एकोनसप्तत्युत्तरत्रिशती वर्तते, परमियं रचनाऽप्यपूर्णेव। सहस्त्ररजनीचरित्राधारेण निबद्धं 'सुप्तप्रबुद्धं' नाम काव्यमयोध्यातः प्रकाश्यमाने संस्कृतपत्रे प्रकाशितम्। काश्यां प्रवर्तितायां 'अमरभारती' पत्रिकायामांग्लभाषाया महाकवेः शेक्सपीयरनामधेयस्य श्लोकबद्धाः संस्कृतगिरा रचानाः सन्ति मुद्रिताः। ताश्च यथा-हेमन्तकुमारः (हैमलेट्) वेतस्वतीसार्थवाहः (मर्चेण्ट आफ् वेनिस) भीमप्रभञ्जनः (दि टेम्पेस्ट) शिशिरकथा च। अन्यानि च कानिचन स्तोत्राणि कालिदाकादशकम्, रामचन्द्रनक्षत्रमाला, काशिकादण्डकम्, रामाश्वघाटी प्रभृतीनि नितान्तरम्याणि स्तोत्राणि सन्ति। एतदतिरिक्ताश्च काश्चन रचना मावनजीवनस्य भावनाविशेषप्रकाशिका अपि गुम्फिताः सन्ति। यथा-प्रसूनप्रशंसनम्, निदाघः, उपशल्वशंसनम्, मर्त्येषु भेदः कियान्, आशाविंशतिः इति। 'जगदीशयात्रा' नाम काऽपि गद्यमयीरचना चमत्कृतिमयी यात्रावर्णनं प्रकटयति। एतत्सर्वं लेखजातममरभारत्यां मुद्रितमभूत्।

शास्त्रिवरेण काव्यप्रकाशे काचन टिप्पणी लिखिताऽऽसीत्। ज्येष्ठभ्रातुः म०म० गङ्गाधरशास्त्रिणः 'अलिविलासिसंलाप' काव्यस्य पञ्चमशतके टीकाऽप्येका लिखितेति श्रूयते। अन्याश्च काश्चन अप्रकाशिताः कृतयः सन्ति यथा-संस्कृत-

प्रवेशिनी, श्रीमद्वराऊँवंशप्रशस्तिवर्णनम्, तर्कभाषा, छान्दोग्योपनिषदआंग्लभाषामयी टिप्पणी इति। एवं शतशः समस्यापूर्तयश्चित्रबन्धाश्च यथावसरं मुद्रिता उपलभ्यन्ते।

अवधविश्वविद्यालये शास्त्रिवर्यस्य जीवनं वैदुष्यञ्चाश्रित्य गवेषणाप्रबन्धः कञ्चन समुपस्थापितो वर्तते यत्र तेषां सविस्तारं सर्वमैतिह्यमुपनिबद्धं लेखकेन। सत्यवसरे तदीयानामन्यासां रचनानां मुद्रणं कर्तुमभिलषामः।

प्रस्तुतमिदं 'सिन्धुवादवृत्तम्' सिन्धुवादस्य सप्तसमुद्रयात्राणां सरलया गिरा वर्णनरूपं गद्यात्मकः काव्यमुद्योतते। अत्र संस्कृत व्याख्याः, हिन्दी भाषानुवादोऽपि योजितः। इदं गद्यवृत्तं व्यवहारोपयोगिनां शब्दानां परिचायकं विद्यार्थिनां भाषाप्रवेशाय तदभ्यासाय च नितरामुपयुक्तमिति कस्य वा न सम्मतिः स्यात्। अद्भुतरसप्रधानं सर्वथाऽश्लीलांशवर्जितञ्चेति वैशिष्ट्यमस्य प्रबन्धस्यं।

शास्त्रिवराणां वंशे म०म० गङ्गाधरशास्त्रिणां द्वितीयतनयाः पण्डितभालचन्द्रशास्त्रिणोऽभूवन्। यैः राजकीयसंस्कृतमहाविद्यालये स्ववंशानुरूपं गौरवमनुपालयद्भिः सुचिरमध्यापिताः शतशश्छात्राः, येष्वेकोऽहमप्यासम्। एतेषामपि रचनाशैली प्रौढ़ा, शास्त्रीयज्ञानमपि नितान्तं प्रकृष्टमासीत्।

सम्प्रति शास्त्रिवराणां वंशे तेषामेक एव तनयः श्रीजगन्नाथशास्त्रितैलङ्गः साहित्याचार्यः सुकविश्च स्ववंशगौरवमनुपालयन्नास्ते। सोऽयमपि काव्यकलायां कुशलः संस्कृतविश्वविद्यालयेन सम्बद्धश्चेति प्रशंसास्पदमेव। श्रीजगन्नाथशास्त्रिणैव कृपया सर्वाऽपि भूमिकोपयुक्ता सामग्री प्रदत्तेति तेषामधमर्णतां धारयामः।

शारदासंस्कृतसंस्थानस्य संस्थापकाः सम्प्रति यशःकलेवराः पण्डितगौरीनाथपाठकमहाभागाः बहूनां संस्कृतग्रन्थानां प्रकाशने लब्धख्यातयः समभूवम् उपकृतश्च तैः संस्कृतसमाजो बहुभिस्पायैः।

तेषां तनयो विद्याविनयशाली आयुष्मान् डॉ० विनोदरावपाठकोऽपि पित्रा क्षुण्णमध्वानमनुगच्छन् सुसंस्कृतप्रकाशने प्रयतते। सोऽयं यथोचितं साफल्यमनुविन्दतु इति भगवतीशारदामभ्यर्थये। सुरभारती सेवकान् अभ्यर्थये च सफलयितुम् प्रकाशनमिदम्। प्राचीन-नवीनोभयशैलीसम्मिश्रं व्युत्पादकमिदं लघुकाव्यं सर्वथा विद्यार्थिनामुपकाराय कल्पेत इति नः सुदृढो विश्वासः। पर्यन्ते च श्रीशास्त्रिवराणां विषये

पद्यमेकमुल्लिख्य विरम्यते विस्तरात्।

द्राक्षापाकमुपेयुषीं रसमयीं वाचं यदीयां चिरं-
श्रृण्वानेन सरस्वतीं न कुरुते वीणां प्रवीणां करे।
विद्वद्वन्द्यनृसिंहशास्त्रि कविताधाटी कुलानुक्रमाद्-
येष्वेवास्ति समाश्रिता कविकुलाचार्येषु सा केवलम्।
(विद्वच्चरितपञ्चके-म०म० खिस्तेनारायणशास्त्रिणः)

वासन्तिकनवरात्रः
संवत् २०४४

विद्वज्जनविधेयो
बटुकनाथशास्त्रि खिस्ते



सप्तसिन्धुयात्राणां सारांशः

उपोद्घातः

विदामपुराधिपतेः श्रीहारीतमहीपतेः शासनकाले सिन्धुवादो नाम आढ्यो वणिक् वसति स्म। ग्रीष्मर्तौ एकदा हितवादो नाम कञ्चन भारवहनवृत्तिः महान्तं भारं शिरसा वहन् तस्य हर्म्यस्य अधस्तात् क्षणं तस्थौ। तदीयसेवकेभ्यः तत्परिचयं प्राप्य खिन्नान्तरङ्गो हितवादः तदीयया भाग्यसम्पदा स्वां दुरवस्थां यावत्तुलयति तावत् सिन्धुवादेन तदवस्यादर्शनजातदयेन स्वहर्म्ये समाहूतः। प्रत्यहं च दीनाराणां शतेन तं सन्तोषयन् कारितभोजनश्चाभ्यागतैश्च समं स्वसिन्धुयात्रावृत्तं श्रावयति स्म।

प्रथमा सिन्धुयात्रा–

युवावस्थायां नानाव्यसनेषु समासक्तः पैतृकसम्पत्तेरधिकांशमक्षपयम्। सहसैकदा भविष्यचिन्तया खिन्नान्तरङ्गः सन् व्यवसायं कर्तुम् वासरपुरनाम नगरं गत्वा समुद्रयात्रिभिः सह सिन्धुयात्रायै प्राचलम्। एकस्मिन् दिने वयं मध्येसमुद्रं द्वीपमेकमद्राक्ष्म। तत्रावतीर्य कृतभोजनादिषु अस्मासु सहसा सः द्वीपः चचाल। द्वीपत्वेनाध्यवसितः वस्तुतो महाग्राहः सः क्षणात् सिन्धुतले न्यमज्जत्। अहं दैवादधिगतं काष्ठफलकमेकं समारुह्याहर्निशं सन्तरन् प्रत्यूषे किञ्चिद्द्वीपं प्रापम्। तत्र महाराजमिहिरस्य अश्वपालैः सह परिचयो जातः। तैः सह तस्य राजधानीं गतः, तेन च सभाजितः तत्र कञ्चन कालमयापयम्। एकदा स एव पोतः समागतः यमधिरुह्य वयं यात्रायै प्रचलिता आस्म। पोतगतपण्यराशीन् प्रत्यभिज्ञाय निजपरिचयपूर्वकं पोताध्यक्षाच्च तान् गृहीत्वा किञ्चिदुपायनं मिहिरमहीपतये समुपहृतवान्। तेन च सादरमभ्युनुज्ञातः लक्षाधिकदीनारेण सहितः वासरपुरमार्गेण स्वसदनं प्रत्यागमम्।

द्वितीया सिन्धुयात्रा–

एकस्मिन् दिने भूयोऽपि सार्थवाहै सह प्रवहणमधिरुह्याहं यात्रायै निरगमम्। द्वीपात् द्वीपं परिभ्रमन्तो वयमेकदा निर्जनं द्वीपं सम्प्राप्नुम। तत्र किञ्चत्कालं सर्वेषु विश्रमत्सु अहं सुप्तोऽभवम्। प्रबुद्धश्च तत्प्रवहणं नाद्राक्षम्। ततो निष्क्रमणोपायान् विमृशन्नेकं महाशकुन्तमपश्यम्। तस्मिन् हस्तशतप्रमाणे निजाण्डे समुपविष्टे सति तं शनैरुपगम्य स्वशिरःस्थचीरपट्टिकायाऽऽत्मानं तन्नखपञ्चरेऽबध्नाम्। प्रत्यूषे च तेन हीरकोपत्यकायामवतारितोऽहमात्मबन्धनं कर्तितवान्। यत्र परःशता अजगराः निवसन्ति स्म, महाशकुन्तश्च तान् भक्षयन्ति स्म। तत्र हि साहसिनो वणजो गिरीनधिरुह्य ततः पर्वतोपत्यकायां मांसखण्डानि निपातयन्ति स्म। महागृध्राः संसक्तानेकहीरकखण्डानि तानि मांसानि निजकुलायान् नयन्ति, तत्रस्थैः वणिजैः कोलाहलविद्रावितेषु गृध्रेषु मांसखंडसंसक्तहीरकावचयं क्रियते स्म। एकदा संगृहीतस्थूलहीरकराशिरहमात्मत्राणाय मांसखण्डैरात्मानं संवेष्ट्य निश्चेष्टमपतम्। एकश्च महागृध्रः चञ्च्वा विधृत्य मां स्वनीडमनैषीत् तत्र हीरक संचयार्थं सन्नद्धा वणिजः मां दृष्ट्वा आश्चर्यः व्यदधुः। तैः सह पोतमेकमारुह्य विदामपुरं प्रत्यागमम्।

तृतीया सिन्धुयात्रा–

तदनु भूयः प्रयातः वासरपुरमवाप्य पोताधिरूढः दिवसगणसमाप्यां यात्रामुद्दिश्य प्रावहम्। एकदा भीमः प्रभञ्जनः नरभक्षकैः अधिष्ठितेऽन्यतमे द्वीपे बलादस्मानक्षिपत्। नरभक्षिष्वेको नरपिशाचः तत्र प्रत्यहमस्मास्वेकं कवलीचकार, रात्रौ सुष्वाप, प्रभाते चोत्थाय क्वचिदयासीत्। एकदा वयं रात्रौ निद्रापरवशस्य तस्य चक्षुषि तप्तलोहशूलं निक्षिप्य तमन्धतामनयाम। तस्मिन्नपगतमात्रे समुद्रतटमागत्य तत्र निगूहितानि काष्ठफलकानि गृहीत्वा प्रवहणं प्रतीक्षमाणा आप्रभातमप्रतिष्ठाम। पुरुषाभ्यां सहागच्छन्तं तमवलोक्य फलकान्यधिरुह्य तानि क्षेपणीभ्यां प्रेरयन्तः सत्वरं पलायामहि। ते तु नराधमाः महतीभिः शिलाभि अस्मत्फलकानि चूर्णीकृतवन्तः। अहमुभाभ्यां सहचराभ्यां फलकाश्रयेण प्लवमानः द्वीपमेकं प्रापम्। तत्र च वयं मृद्वीकाः भक्षयित्वा जीवनमयापयाम। अथान्यतमोऽजगरः निशायामस्मास्वेकं न्यगिलत् द्वितीयश्च वृक्षाधिरूढः तथैवोपरमं भेजे। एकावशेषोऽहं

परमेश्वरकृपया तत्रत्यैर्वणिभिः सह सालहतं द्वीपमगमम्। तत्र द्वितीययात्रायामर्जितं पण्यजातं स्वं प्रत्यभिज्ञाय तच्च स्वायत्तीकृत्य ततः प्रस्थितो विदामपुरं प्रत्यागमम्। तत्रापरिमितं धनं समुपार्ज्य दीनेभ्यश्च प्रचुरं धनं वित्तीर्य सुखेन न्यवसम्।

चतुर्थी सिन्धुयात्रा—

अथाऽहं पोतमारूढः पौरस्त्यद्वीपानुद्दिश्य प्रायाम्। एकदा भीषणया वात्ययाऽस्माकं प्रवहणं भग्नम्। तेन च बहवो वणिजः उपरताः। अहं फलकमेकमारुह्य कतिपयैः वणिग्भिः सह एकत्र द्वीपे प्रक्षिप्तः। तत्रास्माकं नरभक्षिपुरुषैः सह साक्षात्कारो जातः। भीत्या ततः निष्क्रमणोपायं विचार्यैकस्मिन्दिवसेऽहं ततः प्रधावमानः सन् एकस्मिन् स्थले श्वेतपुरुषान् विलोक्य तानुपासरम्। तैः सह कतिपयदिनानि मरिचसञ्चयादिकर्मणि कालं अतिवाह्य प्रवहणमधिरूढः तद्द्वीपाधिपं सम्प्रापितोऽभवम्। तत्र मया प्रभूतं धनमुपार्जितम्। एकदा तद्द्वीपाधिस्याज्ञया कृतदारपरिग्रहः कञ्चन कालं अनयम्। तद्देशाचारो यथा दम्पत्योरेकस्मिन्नुपरतेऽपरोऽपि तेनैव सह भूमिसात् क्रियते स्म। एकदा दुर्दैववशेन मम भार्या मृता। तस्याः शवेन सह मामपि महागर्ते निधाय तन्मुखञ्च पिहितवन्तः सर्वे। अहं गुहायां स्वपाथेयकात् स्वल्पं प्रत्यहमुपभुञ्जन् तत्रैव प्राणानधारयम्। एवं रीत्या मया तत्र स्वजीवनं रक्षितम्। एकदा गुहावसाने विशालं छिद्रं सम्प्राप्य ततो बहिरागतः ततः समुद्रतटमागतवान्। पुनः तां प्रविश्य प्रचुरं शवालङ्करणरत्नमौक्तिकराशिं संगृह्य द्वि-त्रिदिनैः तत्र समागतं पोतमद्राक्षम्। तञ्चाधिरुह्य कैश्चिद्दिनैः गृहं सम्प्राप्तः आमोदप्रमोदमात्रव्यवसायः तत्र न्यवसम्।

पञ्चमी सिन्धुयात्रा—

भूयोऽहं विचलितहृदयः पञ्चमीं यात्रामुद्दिश्य प्रस्थातुं सन्नद्धोऽभवम्। स्वकं पोतं समारुह्य वणिग्भिः सह प्रस्थितः कैश्चिद्दिनैः विजनं द्वीपं प्रापम्। तत्र विशालाण्डजाण्डं विलोक्य मत्सहचराः तदण्डं विभिद्य ततो निर्गच्छन्तं शावकं खण्डशोऽवकृत्य जघसुः। तच्छावकपितरौ पक्षिणौ महतीभिः शिलाभिः अस्मत्प्रवहणं तदधिरूढांश्च चूर्णीकृत्य समुद्रतलं प्रापयामासतुः। अहं तु फलकाश्रयेण कुत्रापि द्वीपे क्षिप्तः कथमपि समस्थलीमुपागमम्। तत्रैकं स्थविरमपश्यम्। स तु मां

संकेतैरात्मानं स्कन्धयोर्निधाय स्रोतस्तरीतुम् प्रैरयत्। मया तथैव कृतं परं स स्थविरः मामत्यर्थमपीडयत्। तदा अहं एकस्मिन् दिने एकां तुम्बीं द्राक्षारसेन सम्पूर्य कतिपयदिनैरासवतां गतं तद्रसं तस्मै स्थविराय प्रायच्छम्। स समग्रं तदासवं पीत्वा सञ्जातोन्मादः मयाऽधिशिलं क्षिप्तः विगतासुरपतत्। एवमहं तस्मात् स्थविरसंकटान्मुक्तः।

अथाहं कैश्चन वणिग्भिः सह पोतारूढः समुद्रतीरस्थं पत्तनं सम्प्राप्नवम्। तत्रैकस्मिन् वने स्वाः गोणीः नारिकेलफलैः पूरयितुकामाः वृक्षस्थान् वानरानुद्दिश्य प्रस्तरखण्डान् समाक्षिपन्। ते च वानराः नारिकेलफलानि अस्मान् लक्ष्यीकृत्य प्राक्षिपन्। एवं स्वाः गोणीः नारिकेलफलैःसम्पूर्य,तद्विक्रयेण तथा कुत्रचनमौक्तिकभृतानां शुक्तीनां क्रयविक्रयेण धनमर्जयित्वा सकुशलं वासरपुरं ततश्च विदामपुरं प्रत्यावर्तिषि। मल्लाभस्य दशमांशं धर्मकर्मसु विनियुज्य तत्र ससुखम् न्यवसम्।

षष्ठी सिन्धुयात्रा—

वर्षमात्रं प्रयाप्य पुनरहं षष्ठीं यात्रामुद्दिश्य गृहान्निरगाम्। अस्मत् प्रवहणमेकदा प्रबलवात्याचक्रेण शिलासङ्घाते निपत्य खण्डशोऽभवत्। पोतारूढाश्च सर्वे पण्यवस्तूनि संगृह्य कुत्रचन द्वीपमवातरन्। तत्र भोजनाभावेन सर्वे निधनम् प्राप्नुवन्। जीवितशेषोऽहं फलकाश्रयेण प्रवहन्नेकदा सुप्तप्रबुद्धः नद्यास्तीरे आत्मानं कृष्णवर्णैः पुरूषैः परिवृत्तमपश्यम्। तैश्चाहं तद्द्वीपाधिराजसदनं नीतः। सः द्वीपाधिपोऽपि मदीयसिन्धुयात्रावर्णनान्याकर्ण्य मत्तः प्रसन्नो जातः। तत्र वसन्नहं नगरनिरीक्षणादिभिः कञ्चन कालं व्यत्यापयम्।

अथ तेन भूपेनानुमतगृहगमनः ततः प्रस्थितः विदामापुरमागत्य तेन भूपतिना प्रेषितं तमुपहारराशिं पत्रेण सह हारीतनृपतये समर्प्य स्वम् गृहम् प्रायाम्।

सप्तमी सिन्धुयात्रा—

गृहं प्रतिनिवृत्तः आत्मनो वार्धक्यं विचार्य सुखेन गृह एव वस्तुमहं निरचिनवम्। परं पुनः महाराजहारीतेनाज्ञप्तः प्रेषितोपहाराय द्वीपाधिपाय प्रदेयानि उपहारवस्तूनि राज्ञश्च पत्रं नीत्वाप्रवहणारूढः निर्विघ्नं तद्द्वीपमुपागमम्। तत्र राजानं समासाद्य तस्मै उपायनानि पत्रं च समुपाहरम्। ततोऽहं तमामन्त्र्य ततः प्रातिष्ठे । मध्येमार्गं

दासविक्रयव्यवसायिनः अस्मान् व्यक्रीणन्त। अहमेकेनाढ्येन वणिजा क्रीतः दत्तधनुर्बाणः वृक्षाधिरोपितः दन्तलिप्सया गजहननाय नियोजितः। एकदा बंहिष्ठो गजराजः मदारूढं वृक्षमावेष्ट्य समूलमपातयत्। निपतितं च मां मृतप्रायं स्वयूथैरनुसृतः श्मशानस्थानम् नीत्वाऽधः क्षिप्त्वा क्वचिदयासीत्। अहं च ततः प्रस्थितः मध्येमार्गं गजदन्तराशिं विक्रीय विदामपुरं प्रापम्। तत्र हारीतनृपतिमुपेत्यात्मवृत्तम-श्रावयम्। प्रसन्नेन च नृपतिना मदीयाः सप्तसिन्धुयात्राः सुवर्णाक्षरेषु समालेख्य स्वरत्नकोशे संस्थापिताः, अहम् च तेन सम्भावितः गृहमागत्य-सुखेन न्यवसम्।

उपसंहारः

एवं स्वयात्रावृत्तवर्णनमुपसंहृत्य सिन्धुवादः हितवादमुवाच-भद्र! यथा मया सिन्धुयात्रासु क्लेशाः अनुभूताः तथा केनाप्यन्येन उपभुक्ताः किम्? अपि सम्प्रति भवान् मामकीनम् शान्तिसुखोपभोगमन्याय्यम् मनुते? इति।

हितवादस्तु इत्थम् सिन्धुवादम् क्षमां याचते स्म-आर्य! भवान् नाना यात्राक्लेशाननुभूय सम्प्रति विश्रामसुखोपभोगं कर्तुम् सर्वथाऽर्हति। अहम् तु आत्मनो दीनावस्थां विलोक्य भवदीयभाग्यसम्पदा सह तुलयन्ननुचितं प्रालपम्। क्षमस्व, उपभुंक्ष्व च चिराय स्वश्रमोपार्जितं वैभवम्। इति।

सिन्धुवादस्तु प्रत्यहमिव तस्मै दीनारशतं समर्प्य तमात्मनः द्वारपालपदे नियोजितवान्।



।।श्रीगुरुगणेशः।।



मंगलाचरणम्

सिन्दूरचारुरुचिभि-

जंनयन्नाकालिकीं सन्ध्याम्।

दलयतु भवतां देवो-

गणेश्वरः सोऽन्तरायौघान्।।१।।

यत्पादपद्मयुगलीरजः प्रसरमेदुराः।

शुष्यन्ति विघ्नाम्बुधयः स गणेशोऽस्तु सिद्धिदः।।२।।

—एतन्निबन्धलेखकस्य

सिन्दूर के सदृश अरुण वर्ण की प्रभा से असामयिक संध्याकाल की सुषमा बनाने वाले भगवान् श्रीगणेश्वर आप लोगों के विघ्नों का निवारण करें।।१।।

विघ्नरूपी समुद्र जिनके चरण कमलों की धूलियों से भर जाने पर सूख जाते हैं। वे भगवान् श्रीगणेश भक्तों के लिए सिद्धिदायक रहें।।२।।



सिन्धुवादवृत्तम्

सिन्धुवादवृत्तम्

श्रीमद्विदामपुरपुरन्दरस्य महाराधिराजस्य श्रीहारीतमहीपतेराधिराज्ये वसन् हितवादो नाम कश्चन भारवहनवृत्तिरकिञ्चन एकस्मिन् निदाघदिवसे महान्तं भारं शिरसा वहन् मार्गान्मार्गान्तरं भ्रमन् परिश्रमातिशयक्लान्तघर्मसलिलार्द्रगात्रो विनिःश्वसन् मार्गमेकं सम्मार्जितं प्रस्तरनिबद्धं गन्धजलावसेकसम्भवामोदमेदुरीकृतासन्नवसुमतीपरिसरं समाससाद।

उपोद्घातः

ग्रन्थारम्भे मंगलनिबन्धनं हि भारतीयानामस्माकं प्राचीनः शिष्टाचारः। "आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि मंगलम्" इत्युक्तदिशा मंगलं त्रिविधम्- आशीर्वादात्मकम्, नमस्कारात्मकम्, वस्तुनिर्देशात्मकं च। निर्विघ्नं ग्रन्थपरिसमाप्तिः मंगलाचरणस्य हेतुः। अत्र कथावस्तुनः समुपन्यासात् वस्तुर्देनिशात्मकं मंगलं समाचरितम्।

'हितवादः नाम कश्चन अकिञ्चनः एकस्मिन् निदाघदिवसे एकं मार्गम् समाससाद इत्यन्वयः।' हितवादः नाम = हितवादनामा, अकिञ्चनः = न किञ्चन यस्य सः, निर्धन इत्यर्थः, एकस्मिन् = अन्यतमे, निदाघदिवसे = नितरां दह्यतेऽत्रेति निदाघः = ग्रीष्मः, 'ग्रीष्म उष्मकः निदाघ उष्णोपगम' इत्यमरः। स चासौ दिवसश्च निदाघदिवसः, तस्मिन् निदाघदिवसे ग्रीष्मदिवस इत्यर्थः, एकम् = अन्यतमम्, मार्गम् = पन्थानम्, समाससाद = प्राप।

उपक्रम

विदामपुर के नरेश महाराजाधिराज श्रीमान् हारीत के शासन काल में हितवाद नाम का एक गरीब कुली रहता था जो बोझ उठाकर अपनी जीविका चलाता था। गर्मी में वह एक दिन सिर पर बड़ा बोझा रखकर एक रास्ते से दूसरे रास्ते पर घूमते हुए परिश्रम से थका हुआ पसीने से लथपत हो गया और हाँफते हुए

तेन च परिमलोद्गारेण किञ्चिदपनीतश्रमो भारं स्वकीयं शिरसोऽवरो
सविधस्थितस्यातिरम्यस्यैकस्य हर्म्यस्याधस्तात् विशिश्रमिषुः क्षणं तस्थ

श्रीमद्विदामपुरपुरन्दरस्य = श्रीः सम्पत्तिः अस्त्यस्येति श्रीमान् = वैभवसम
यः विदामपुरस्य = एतन्नामनगरस्य, पुरन्दरः = राजा तस्य। अत्र इन्द्रव
पुरन्दरशब्दः नृपार्थे लाक्षणिकः. रूपकालंकारः। महाराजाधिराजस्य-महांश्च
राजा महाराजः, अधिको राजा अधिराजः, उभयत्र-'राजाहः सखिभ्यष्ट च्'
समासान्तः टच् प्रत्ययः। महाराजश्चासौ अधिराजश्चेति महाराजधिराजः = सार्व
नरेश इत्यर्थः। तस्य श्रीहारीतमहीपतेः = श्रीमतः हारीतनामकस्य नृपतेः, आधिरा
-अधिराजस्य भावः आधिराज्यम्, तस्मिन् = सार्वभौमराज्ये, वसन् = निव
कुर्वन्, भारवहन-वृत्तिः-भाराणां वहनं = धारणमेव वृत्तिः जीविका यस्य स
महान्तं = गुरुं, भारं शिरसा = मस्तकेन, वहन् = धारयन्, मार्गात् = एकस
पथः, मार्गान्तरम् अन्यो मार्गः मार्गान्तरम्, तत् = अन्यं पन्थानम् भ्रमन्
परिचलन्, परिश्रमातिशयक्लान्तघर्मसलिलार्द्रगात्रः-परिश्रमस्य अतिश
परिश्रमातिशयः, तेन = अत्यन्तपरिश्रमेण, क्लान्तं = म्लानम्, घर्मसलिलैः
श्रमजलैः आर्द्रम् = क्लिन्नम्, गात्रं = शरीरं यस्य सः। विनिःश्वन् = निःश्वास
गृह्णन्" इति हितवादस्य विशेषानि।

कथम्भूतं मार्गम्?-सम्मार्जितम् = मार्जन्यादिना जलैः धौतं, प्रस्तरनिबद्धम्
प्रस्तरैः = पाषाणखण्डैः, निबद्धम् = निर्मितम्, गन्धजलाऽवसेकसम्भवामोदमेदु
कृतासन्नवसुमतीपरिसरम्-गन्धजलानाम्, अवसेकात्-सिञ्चनात्, सम्भवः = उत्प
यस्य, एवम्भूतः यः आमोदः = सुगन्धः, तेन मेदुरीकृतः = व्याप्तः, आसन्न
समीपवर्ती, वसुमत्याः = भूमेः, परिसरः = पर्यन्तभूः, यस्य तत्। "पर्यन्तभ

सड़क पर पहुँचा। वह सड़क साफ सुथरी और अच्छे पत्थरों से बनी हुई
सुगन्धित जल का छिड़काव होने से उसके आप-पास की धरती मन्द सुगन्
महक रही थी।

उस भीनी सुगन्ध से उसकी थकावट थोड़ी दूर हो गई, वह अपने बोझ
सिर से उतारकर पास के अत्यन्त सुन्दर एक महल के नीचे विश्राम करने
इच्छा से क्षणभर ठहर गया।

तस्य च हर्म्योत्तमस्य गवाक्षजालादुदीर्णम् श्रोत्रपीयूषायमाणं पिकशुकसारिकामुखखगगणविरुतं मृदङ्गनिनादमिश्रम् च सङ्गीतध्वनि माकर्ण्यान्तःपरिपच्यमानानां भोज्यान्नानामभिनवामोदं चोपाघ्राय सोऽयं 'नूनमिह कश्चिन्महान् भोजनोत्सवः प्रचलती'ति मनसाऽऽकलयन्

परिसरः।" इत्यमरः। तेन च = गन्धजलसिञ्चनात् उद्‌भूतेन परिमलोद्‌गारेण— परिमलस्य = सुगन्धस्य, उद्‌गारः = प्रसरणम् तेन, किञ्चित् = स्वल्पम् अपनीतश्रमः = अपनीतः दूरीकृतः, श्रमः यस्य सः। अवरोप्य = नीचैः संस्थाप्य, सविधस्थितस्य- -सविधे= समीपे, स्थितस्य = वर्तमानस्य एकस्य = अन्यतमस्य हर्म्यस्य = धनिकावासस्य, हर्म्यादि धनिनां वासः इत्यमरः। अधस्तात् = नीचैः, विशिश्रमिषुः = विश्रमितुमिच्छुः, क्षणं = मुहूर्त्तम्, तस्थौ = स्थितः।

तस्य च = सविधिस्थितस्य, हर्म्योत्तमस्य—उत्तमं हर्म्यं हर्म्योत्तमम् = श्रेष्ठ प्रासादः, तस्य गवाक्षजालात्—गवाम् = किरणानाम्, अक्षि = रन्ध्रमिवेति, गवाक्षो = वातायनम्—तस्य जालः छिद्रम्, तस्मात्। उदीर्णम् = निर्गतम्, श्रोत्रपीयूषायमाणम्—श्रोत्रयोः = कर्णयोः, पीयूषवत् = अमृतवत् आचरतीति श्रोत्रपीयूषायमाणम् = कर्णयोः अमृतोपमम्, पिकशुकसारिकामुखखगगणविरुतम् पिकाः = कोकिलाः 'कोकिलः पिक इत्यपि' इत्यमरः। शुकाः = कीराः, कीरशुकौ समौ इत्यमरः। सारिकाः = पक्षिभेदाः, पिकाः शुकाः सारिका मुखानि प्रधानानि यस्य एवम्भूतः यः खगानाम्—पक्षिणाम् गणः = समूहः, तस्य विरुतम् = कलरवम्। मृदङ्गनिनादमिश्रम् मृदङ्गाः = अवनद्धवाद्यविशेषाः तेषां निनादैः = तालमयैः, ध्वनिभिः, मिश्रं = युक्तं सङ्गीतध्वनिं = वीणास्वरमिश्रितं कण्ठसङ्गीतध्वनिम्, आकर्ण्य = श्रुत्वा, अन्तःपरिपच्यमानानाम् अन्तः = पाकशालाभ्यन्तरे, परिपच्य-

उस श्रेष्ठ महल की खिड़कियों से आने वाली अमृत के समान शुक, सारिका आदि के चहचहा हट और मृदङ्गध्वनि से मिश्रित संगीत को सुनकर तथा अन्दर पकने वाले खाद्यान्नों की ताजी सुगन्धि को सूंघकर वह सोचने लगा 'यहाँ निश्चय ही कोई बड़ा भोजनोत्सव चल रहा हैं। यह सोचकर गृहस्वामी के विषय में जानने की उत्सुकता मन में रखते हुए द्वार पर पहरा देने वाले बहुमूल्य वेशभूषा धारण करने वाले सेवकों के पास आकर उसने उनसे पूछा—"सज्जनों! यह किस पुण्यात्मा का महल है?"

गृहस्वामिजिज्ञासाकुतूहलपरिगृहीतचेता उपसृत्य द्वारदेशशून्यतां नयतो महार्हवेषान् सेवकपुरुषानेवमप्राक्षीत् -

"भद्राः! कस्य नाम सुकृतिनः सदनमेतत्?" इति।

ते तु साश्चर्यमेनमवलोक्य 'अये! पुरमिदमधिवसन्नपि सकलमहासिन्धुयात्राप्रथितयशसोऽमितवैभवभरस्यार्यसिन्धुवादस्यापि सदनं न जानासि?" इति तमुपजहसुः।

मानानां = पाकावस्थापन्नानाम् भोज्यान्नानाम् = खाद्यपदार्थानाम्, अभिनवामोदम् = सद्यः प्रसृतं सुगन्धिम् च उपाघ्राय = आघ्राणं कृत्वा, सोऽयं = हर्म्याध स्थितो हितवादः कश्चित् = अपूर्वः, महान् = विशालः, भोजनोत्सवः = भोजनसमारोहः, प्रचलति = सम्पद्यते, आकलयन् = निर्धायन्, गृहस्वामिजिज्ञासकुतूहलपरिगृहीतचेताः गृहस्वामिनः जिज्ञासायाः = अस्य हर्म्योत्तमस्य कः गृहस्वामी ? इत्याकारिकायाः, कुतूहलेन = औत्सुक्येन, परिगृहीतं = व्याप्तम्, चेतः = अन्तः करणम् यस्य सः इति हितवादविशेषणम्। उपसृत्य = अग्रे आगत्य द्वारदेशम् = हर्म्योत्तमद्वारभूमिम्, अशून्यतां नयतः = तत्रस्थितानित्यर्थः। महार्हवेषान् महार्हाः = बहुमूल्याः वेषाः = परिधानानि येषां तान् सेवकपुरुषान्–सेवकाश्च ते पुरुषाश्च तान् = द्वारपालान्, एवं = वक्ष्यमाणप्रकारेण, अप्राक्षीत् = अपृच्छत्।

"भद्राः ! = महाशयाः, सुकृतिनः = पुण्यात्मनः, सुकृतिः पुण्यवान् धन्यः इत्यमरः। एतत् = पुरोदृश्यमानम्, सदनं = प्रासादः? इति।

ते तु = सेवकपुरुषाः साश्चर्यम् = विस्मयपुरस्सरम् अवलोक्य 'अये !' इति साश्चर्यसम्बोधनम्। इदं = एतत्, पुरं = विदामपुरं, अधिवसन् = वासं कुर्वन्नपि अधिशीङ्स्थासां कर्म, इति कर्मणि द्वितीया। सकलमहासिन्धुयात्राप्रथितयशसः सकलानां सम्पूर्णानां, सप्तसंख्याकानां महासिन्धूनां = विशालानां सागराणां, या यात्राः = प्रवासाः ताभिः, प्रथितं = प्रसिद्धम्, यशः = कीर्तिः यस्य तस्य। अमितवैभवभरस्य अमितः= अपरमितिः वैभवस्य=ऐश्वर्यस्य, भरः=अतिशयः यस्य तस्य आर्यसिन्धुवादस्यापि = महाशयस्य सिन्धुवादश्रेष्ठिनः, सदनं = गृहं न जानासि? इति उक्त्वा तम् उपजहसुः = उपहासं चक्रुः।

वे आश्चर्य से उसे देखकर इस प्रकार उसका उपहास करने लगे– "अरे इस शहर में रहते हुए भी तुम आर्य सिन्धुवाद के महल को नहीं जानते, जिसने सम्पूर्ण सागरों की यात्रा कर खूब यश और अपरिमित वैभव अर्जित किया है।

हितवादस्तु मनसि तदीयया भाग्यसम्पदा स्वां शोचनीयतमां दशां तुलयन् खिन्नान्तरङ्ग ऊर्ध्वम् विलोक्य सनिःश्वसितं- 'विधे! कीदृशी सेयं तव वैषम्यप्रवणता? अप्रभातादादिनान्तं कृतमहापरिश्रमोऽपि सोऽहं परिवारपोषणमात्रपर्याप्तमपि धनं सम्पादयितुमक्षमः, यावदयं सिन्धुवादोऽक्लेशमेवमानन्दसम्पदोः परां काष्ठामारोपितः किन्नाम महासुकृतमनेन समनुष्ठितम्? दुर्भगेन मया वा किमपराद्धम्?' इति

हितवादस्तु मनसि तदीयया = सिन्धुवादसम्बन्धिन्या भाग्यसम्पदा = सौभाग्यमूलेकन वैभवेन सहेति अध्याहार्यम्। स्वां = निजाम्, शोचनीयतमाम् = अतिकष्टकारिणीम् दशाम् = अवस्थाम्, तुलयन् = तुलनां कुर्वन्, खिन्नान्तरङ्गः खिन्नं = खेदं प्राप्तम्, अन्तरङ्गम् = अन्तःकरणं यस्य सः, सनिःश्वसितं = निःश्वासपूर्वकम्।

इति = अनेन प्रकारेण, नैराश्यनिर्गीर्णम् = निराशानिर्गलितं, उच्चैः = तारस्वरेण, अघोषयत् = घोषणां कृतवान्। हितवादस्य निराशावचनानि आह-"विधे! = दैव! कीदृशी = कम्प्रकारा, तव = भवतः, सेयं पुरोवर्तमाना, वैषम्यप्रवणता? = असमानताकौशलम्? अप्रभातात् = प्रातःकालमारभ्य आदिनान्तं = सायंकालपर्यन्तं, कृतमहापरिश्रमः कृतः = विहितः, महान् = प्रभूतः, परिश्रमः = शरीरिकश्रमः भारवहनादिः येन, एवम्भूतोऽपि सोऽहं आकिञ्चन एव, परिवारपोषणमात्रपर्याप्तं-परिवारस्य = कुटुम्बस्य पोषणमात्राय = केवलं भरणाय, पर्याप्तं = परिमितं, तथाविधमपि धनं = द्रव्यं, सम्पादयितुम् = अर्जयितुम् = अक्षमः = असमर्थः। यावत्, अयम् = एषः, सिन्धुवादः = एतन्नामाश्रेष्ठी, अक्लेशलमेव =विनापरिश्रममेव, आनन्दसम्पदोः-आनन्दश्च सम्पत् च आनन्दसम्पदौ, तयोः = हर्षस्य वैभवस्य च, परां काष्ठम् = चरमाम् अवस्थाम्, आरोपितः = प्रापितः। किन्नाम्, महासुकृतं = महापुण्यम्,अनेन = अमुना सिन्धुवादेन,

हितवाद ने मन में उसके ऐश्वर्य से अपनी शोचनीय अवस्था की तुलना करते हुए खिन्न मन से ऊपर की ओर देखकर ठंडी साँस ली और निराशा से कह बोल उठा-"विधाता! तुम्हारी यह कैसी असमानता है? जो मैं सुबह से लेकर शाम तक खूब परिश्रम करते हुए इतना भी धन नहीं जुटा सकता जिससे परिवार का पोषण हो और यह सिन्धुवाद जरा भी परिश्रम के बिना आनन्द और वैभव

नैराश्यनिर्गीर्ण उच्चैरयोषयत्।

सपदि च हर्म्यान्तरात् समुपेत्य भृत्य एकस्तमेवमब्रवीत् -

'भद्र! किमपि विवक्षुरस्मत्प्रभुरार्यः सिन्धुवादो भवन्तं द्रष्टुमिच्छति। अनुयाहि माम्' इति।

स तु 'नूनं मदविनयाय भर्त्सयितुमेष समाहूतोऽस्मि' इति मनसा शङ्कमानो 'ननु भारोऽयं मदीयो रथ्यास्थो मय्यभ्यन्तरं गते केनाप्य पह्रियेत' इत्यवदत्। सोऽपि विज्ञाततदभिप्रायस्तस्य रक्षां कर्तुम् प्रतिज्ञाय

समनुष्ठितम्? = समाचास्तिम्?, दुर्भगेन = दौर्भाग्यशीलेन, मया वा = हितवादेन, किं = किं प्रकारकम् अपराद्धम्? = अपराधो विहित इति। सपदि च = तत्कालमेव हर्म्यान्तरात् = प्रासादमध्यात्, एकः = अन्यतमः, भृत्यः = सेवकः, तं = हितवादम् अब्रवीत् = अकथयत्-भद्र! = महानुभाव! किमपि विवक्षुः = वक्तुमिच्छुःअस्मत्प्रभुः = अस्माकं स्वामी, आर्यः सिन्धुवादः, भवन्तं = त्वाम्, द्रष्टुम् = अवलोकयितुम्, इच्छति = वाञ्छति (त्वं) माम् = सिन्धुवादसेवकम्, अनुयाहि = अनुसरेति।

सः तुः = हितवादः, नूनं = निश्चितम्, मदविनयाय = मम अविनयाय औद्धत्याय, भर्त्सयितुं = तिरस्कर्तुम्, एषोऽहं हितवादः समाहूतः = सिन्धुवादेन कृताह्वानोऽस्मि इति रीत्या, मनसा = चेतसा, शङ्कमानः = सन्देहं विदधानः, इति अवदत् = जगाद। "ननु" इति वितर्के। रथ्यास्थः = मार्गस्थितः, 'रथ्या प्रतोलीविशिखा स्यात्' इति मार्गपर्यायेष्वमरः। मदीयः = मामकीनः, अयं भारः = पुरोवर्तमानः भारः, मयि = हितवादे, अभ्यन्तरं = प्रासादमध्यं, गते = प्रविष्टे केनापि = चौरलुण्ठकादिना, अपह्रियेत = अपहरणं क्रियेत इति। सोऽपि = भृत्यः, विज्ञाततदभिप्रायः-विज्ञातः = अवगतः, तस्य = हितवादस्य, अभिप्रायः

की पराकाष्ठा का उपभोग कर रहा है। इसने कौन सा महापुण्य किया है अथवा अभागे मैंने कौन पाप किया है।"

इतने में महल के भीतर से आकर एक नौकर बोला-"महाशय! हमारे स्वामी आर्य सिन्धुवाद आपसे मिलने के लिए इच्छुक हैं। आप मेरा अनुसरण करें।"

वह मन में यह सन्देह करने लगा "निश्चय ही मुझे अपनी उद्दण्डता के लिए बुलाया गया है। मेरे भीतर चले जाने पर कहीं सड़क पर रखा हुआ यह बोझ कोई उठा न ले" सेवक ने उसके इस अभिप्राय को समझते हुए उसकी रक्षा की

ानुरोधवचनैस्तमन्तः प्रवेष्टुमभिमुखीचकार।

अथ तेन प्रदर्श्यमानमार्गो महाभवनमेकं समृद्धभोजनोत्सवप्रवृत्त-द्रजनं, मध्ये चावस्थितं गभीरमधुराकारमावक्षःस्थललम्ब-ानोच्चकूर्चसञ्चयं तद्गेहाधिपतिं सिन्धुवादं, परिवेषणसंरम्भव्यग्र-

भावः येन सः। तदीयमाशयमवगत्येत्यर्थः। प्रतिज्ञाय = प्रणं विधाय, सानुरोधवचनैः अनुरोधपूर्णैः वाक्यैः, तम् = हितवादम्, अन्तः प्रासादाभ्यन्तरे, प्रवेष्टुं = वेशं कारयितुम्, अभिमुखीचकार = प्रेरयामास।

अथ = पश्चात्, तेन = भृत्येन, प्रदर्श्यमानमार्गः = प्रदर्श्यमानः मार्गः यस्यं ः हितवादः एकम् = अन्यतमम् महाभवनं = विशालं प्रासादम् साश्चर्यं विलोक्येति त्येकं सम्बध्यते। महाभवनं विशिनष्टि-समृद्धभोजनोत्सवप्रवृत्तभद्रजनम्-समृद्धे वैभवमये भोजनोत्सवे = भोजनसमारोहे, प्रवृत्ताः = संलग्नाः, भद्राः = शिष्टाः, नाः = लोकाः यस्मिंस्तं। मध्ये अन्तः च अवस्थितम् = उपविष्टम्, द्गेहाधिपतिम्-तस्य गेहस्य = गृहस्य अधिपतिम् = स्वामिनम् साश्चर्यं = विस्मयम्, विलोक्य = दृष्ट्वा। कथम्भूतं सिन्धुवादं? गभीरमधुराकारं-गभीरः गाम्भीर्ययुक्तः, मधुरः = रम्यश्च, आकारः = स्वरूपं यस्य तम्। ावक्षस्थललम्बमानोच्चकूर्चसंचयम्-आवक्षःस्थलं = वक्षःस्थलमभिव्याप्य, ाम्बमानः, उच्चः = दीर्घः, कूर्चसञ्चयः = श्मश्रुराशिः यस्य तम्, इत्युभे न्धुवादविशेषणे, परिवेषणसंरम्भव्यग्रपरःशतभृत्यवर्गम् च-परिवेषणस्य = ोज्यसामग्रीवितरणस्य, संरम्भे = उद्योगे, व्यग्राः = व्याकुलाः, ये परःशताः = पितात् परे, शताधिका इत्यर्थः। भृत्या = सेवकाः, तेषां वर्गः तम्, साश्चर्यं लोक्य सम्भ्रमाक्रान्तः-सम्भ्रमेण = भयेन, आक्रान्तः = व्याप्तः, सिन्धुवादं =

तिज्ञा कर अनुनयपूर्ण वचनों से उसे अन्दर प्रवेश करने के लिये प्रेरित किया।

वह सेवक उसका मार्ग प्रदर्शन कर रहा था। उसके सम्मुख एक विशाल सिाद था। जहाँ प्रतिष्ठि त व्यक्ति शाही भोजनोत्सव में व्यस्त थे। उनके बीच नके गृहस्वामी सिन्धुवाद बैठे हुए थे। उनकी आकृति गम्भीर और आकर्षक ी। उनकी दाढ़ी छाती तक लटक रही थी। सैकड़ो नौकर भोजन परोस रहे थे। ह सब आश्चर्यपूर्वक देखकर घबराहट के मारे उसका अन्तःकरण काँप गया,

परःशतभृत्यवर्गञ्च साश्चर्यं विलोक्य सम्भ्रमाक्रान्तः ससाध्वसकम् सिन्धुवादं प्रणनाम। स तु सप्रणयस्मितं स्वपार्श्वे उपवेश्य भोजना भृशमनुरुरोध।

अथ विरते भोजनप्रसङ्गे सिन्धुवादो हितवादमुद्दिश्यैवमाबभाषे-

"भद्र! सेयं परमेश्वरस्य पराऽनुकम्पा यदहमिदमनन्यसुल सम्पत्सुखमनुभवामि। यत् पुनरुक्तवानसि तदेतदक्लेशले मयाऽधिगतमिति, तदेतदन्याय्यम्। एतस्याः किलोपार्जनेऽशक्यकल्प

गृहाधिपतिम्, ससाध्वसकम्पं-साध्वसेन = भयेन, कम्पेन च सहितमि प्रणामक्रियाविशेषणं। प्रणनाम = ववन्दे।

स तु = सिंधुवादः सप्रणयस्मितम्, प्रणयेन = प्रेम्णा, स्मितेन = मन्दाहासे च सहितम्, तम् = हितवादं, स्वपार्श्वे = निजसमीपे, उपवेश्य, भोजनाय = भोजनं कर्तुम्, भृशं = अत्यन्तं, अनुरुरोध = अनुरोधं चकार।

अथ भोजनप्रसङ्गे विरते सति सिंधुवादः, हितवादम् उद्दिश्य = हितवा प्रति, एवम् = अनया रीत्या आबभाषे = उवाच-

भद्र! = महोदय!, सेयम् = अनुभूयमाना परमेश्वरस्य = भगवतः, परानुकम = अत्यन्तकृपा (वर्तते) यत् = यस्मात् कारणात्, अनन्यसुलभम् = इत अप्राप्यम्, सम्पत्सुखं = ऐश्वर्यजनितमानन्दं, अनुभवामि। यत् पुनः = भूयः,उक्तवा = कथितवानसि, तदेतत् = समस्तमैश्वर्यम्, अक्लेशलेशं = अनायासमे अधिगतं = अर्जितं, तदेतत् = तव कथनं, अन्याय्यम् = अन्यायपूर्णम्। एतस्याः सम्पदः, किलेति वाक्यालङ्कारे। उपार्जने = सम्पादने, अशक्यकल्पनाः-अशक्य कल्पनाः यासां ताः, संङ्ख्यातिगाः = अगणिताः, विपदः = आपत्तयः, म अनुभूताः याः स्मर्यमाणाः = स्मृतिपथं नीयमाना अपि तनुम् = शरीरं, उत्पुलकय

शीघ्रता में उसने सिन्धुवाद को प्रणाम किया। उसने प्रेमपूर्वक मुस्कुराते हुए अ पास बैठाकर उसने भोजन के लिये अत्यन्त आग्रह किया।

भोजन समाप्त होन पर सिन्धुवाद ने हितवाद से कहा-महोदय! यह भगव की असीम अनुकम्पा है कि मैं दुर्लभ ऐश्वर्य-सुख का अनुभव कर रहा हूँ। पर तुम्हारा यह कहना न्यायोचित नहीं है कि "मैंने यह सुख बिना परिश्रम के प्रा

संख्यातिगा विपदोऽनुभूता मया, याः स्मर्यमाणा अपि तनुमुत्पुल कयन्ति'' इति।

अथासौ समुपस्थितमतिथिगणं संबोध्यैवमवादीत् -

''आर्याः! एषोऽहं साम्प्रतं युष्मन्मनोविनोदनाय श्रमापनोदनाय च मदीयाः सप्तमहासिन्धुयात्रा असह्यदुःखसन्तानसम्पाता उपवर्णयिष्यामि, शृण्वन्तु भवन्तः'' इत्येवमुक्त्वा स्वां प्रथमां सिन्धुयात्रां वर्णयितु-मित्थमुपाक्रमत-

= रोमाञ्चयन्ति इति।

अथ = पाश्चात्, असौ = सिन्धुवादः, समुपस्थितं = समवेतं, अतिथिगणम्, सम्बोध्य, एवम् = अनेन प्रकारेण, अवादीत् = अवदत्-

आर्याः! = महानुभावाः!, एषोऽहं = अयमहं सिन्धुवादः, साम्प्रतम् = अधुना, युष्मन्मनोविनोदाय-युष्माकं = अतिथीनां, मनसः = चेतसः, विनोदनाय = रञ्जनार्थम्, श्रमापनोदनाय च = परिश्रमम्, अपनोदयितुं (दूरीकर्तुम्) मदीयाः = मया विहिताः, सप्त = सप्तसंख्याकाः महासिन्धुयात्राः महासिन्धूनां = विशालसमुद्राणां, यात्राः = प्रवासान् ताः विशिनष्टि -असह्यदुःखसन्तानसम्पाताः- असह्यानां = सोढुमशक्यानां, दुःखानां = कष्टानां, सन्तानानि = परम्पराः, तासां = सम्पातः आक्रमणं यासु ताः, सप्तमहासिन्धुयात्रा इत्यर्थः। उपवर्णयिष्यामि = वर्णनं करिष्यामि, भवन्तः = यूयम्, श्रणवन्तु = आकर्णयन्तु, इत्येवम् = अनया पद्धत्या सः = सिन्धुवादः, स्वां = निजां, प्रथमां, सिन्धुयात्रां = समुद्रप्रवासं, वर्णयितुम् इत्थम्, उपाक्रमत = उपक्रमं चकार।

किया है" इसके अर्जन करने में मैंने उन असंख्य विपदाओं को भोगा है जिसकी कल्पना भी नहीं की जा सकती। उसके स्मरणमात्र से शरीर काँप उठता है।"

इसके बाद उसने उपस्थित अतिथियों को सम्बोधित करते हुए कहा- "सज्जनों! मैं इस समय आपके सम्मुख आपका मनोरंजन करने के लिये और श्रम दूर करने के लिए अपनी सात समुद्री यात्राओं को सुनाता हूँ। जिसमें मैंने असह्य दुःख-परम्पराओं को भोगा है। उन्हें आप सुनें।" यह कहकर उसने अपनी पहली समुद्री-यात्रा का वर्णन इस प्रकार किया-



प्रथमा सिन्धुयात्रा

"एषोऽहं यौवनावतारे नानाव्यसनलम्पटतया हापितात्मपित्र्य-सम्पदधिकभागः सहसोन्मीलितलोचन ईदृशेष्वकार्येषु धनकालयोर्व्ययेनानुतप्यमानो, वार्द्धके निर्धनतया संभाव्यमानानि तानि तानि दुःखन्यालोचयन् व्यग्रमानसोऽभवम्।

"एषोऽहं यौवनावतारे व्यग्रमानसोऽभवम्, इत्यन्वयः" एषोऽहम् = अयमहं सिन्धुवादः यौवनावतारे = तारुण्यस्य प्रारम्भकाले नानाव्यसनलम्पटतया नाना= विविधेषु, व्यसनेषु = दोषेषु, लम्पटः = आसक्तः, तस्य भावः नानाव्यसनलम्पटता तया। हापितात्मपित्र्यसम्पदधिकभागः-पितुरियं पित्र्या, हापितः = व्ययीकृतः आत्मनः = स्वस्य, पित्र्यायाः = पैतृक्याः, सम्पदः = श्रियः, अधिकः = प्रचुरः, भागः = अंशः, येन सः। सहसा = अकस्मात् उन्मीलितलोचनः-उन्मीलिते = प्रबुद्धे, लोचने = नेत्रे यस्य सः। ईदृशेषु = एतादृशेषु, अकार्येषु = दुष्कर्मसु, धनकालयोः धनम् च कालश्च, धनकालौ, तयोः = द्रव्यस्य, समयस्य च, व्ययेन = नाशेन, अनुतप्यमानः = विहितपश्चात्तापः, वार्द्धके-वृद्धस्य भावो वार्द्धक्यम्, तस्मिन् = वृद्धावस्थायाम्, निर्धनतया = दरिद्रतया सम्भाव्यमानानि = कल्प्यमानानि, तानि तानि = नानाविधानि, दुःखानि, आलोचयन्, व्यग्रमानसः-व्यग्रं = व्याकुलं मानसं = चित्तं यस्य सः। अभवं = आसम्। '(अहं) सिन्धुयात्रायै प्राचलम्' इत्यग्रेणान्वयः। (अहं सिन्धुवादः) निधनं = मरणं, श्रेयः = हितावहम्, निर्धनता

पहली समुद्री यात्रा

मैं जवानी के आरम्भ में अनेक व्यसनों में आसक्त रहने के कारण अपनी पैत्रिक सम्पत्ति का अधिकांश भाग खर्च कर चुका था। अचानक मेरी आँखे खुलीं और इस प्रकार के दुष्कर्मों में धन और समय का अपव्यय करने से मैं पश्चाताप करने लगा तथा वृद्धावस्था में निर्धनता के कारण सम्भावित नाना

"श्रेयो निधनं न निर्धनता" इति पितुरुपदेशमसकृत् स्मरन् तस्य च याथार्थ्यमन्तर्विभावयन्नवशिष्टं गृहतत्परिकरादि सर्वं वस्तुजातं विक्रीय सञ्चितकिञ्चिद्धननिचयस्तेन च क्रीतनानाविधपण्यगणः, सांयात्रिकैः सह कृतपरिचयः, समुद्रयात्राप्रवणमानसो वासरपुरं नाम सिन्धुरोधः स्थितं नगरवरं गत्वा वणिग्जनैः सम्भूय स्वधनव्ययेन

न = दारिद्र्यं न, इति = एवं, पितुः = तातस्य उपदेशम्, असकृत् = वारं वारं, स्मरन् = चिन्तयन्, तस्य च = पितुः उपदेशस्य, यथार्थ्यम् = वास्तविकतां, अन्तः = मनसि, विभावयन् = विचारयन्, अवशिष्टं = सशेषं, सर्वम् = सम्पूर्णम्, गृहतत्परिकरादि–गृहं = गेहं, तत्परिकरः = तत्समूहश्च, आदौ यस्मिन्, एवम्भूतं वस्तुजातं = पदार्थसमूहं। समस्तचलाचलसम्पदमित्यर्थः। विक्रीय = विक्रयं विधाय, सञ्चितकिञ्चिद्धननिचयः-सञ्चितं = अर्जितं, किञ्चित् = स्वल्पं, धनं = द्रव्यम् तस्य निचयः = राशिः, येन सः। तेन च = सञ्चितधननिचयेन, क्रीतनानाविधपण्यगणः–क्रीतः = कृतक्रयः, नानाविधानां = नैकप्रकाराणां, पण्यानां = विक्रेयवस्तूनां, गणः = राशिः येन सः। सांयात्रिकैः = समुदितानां गमनं द्वीपान्तरगमनं वा संयात्रा सा प्रयोजनं येषां ते सांयात्रिकाः = पोतेन वाणिज्यकारकाः। सांयात्रिकाः पोतवणिग् इत्यमरः। सह = सार्द्धम्, कृतपरिचयः–कृतः = विहित, परिचयः येन सः। संमुद्रयात्राप्रवणमानसः-समुद्रस्य = सागरस्य यात्रायां = प्रवासे प्रवणं = संलग्नं, मानसं = चित्तं यस्य सः। वासरपुरं नाम = तत्संज्ञकं सिंधुरोधः स्थितं सिंधोः =सागरस्य, रोधसि = तटे, स्थितं = वर्तमानं, नगरवरं = श्रेष्ठनगरं, वणिग्जनैः = व्यापारिभिः, सम्भूय = समवेत्य स्वधनव्ययेन स्वस्य = निजस्य

दुखों की कल्पना करते हुए व्यग्र हो गया। 'मरण श्रेयस्कर है किन्तु निर्धनता नहीं।' पिताजी के इस उपदेश को बारम्बार स्मरण करते हुए और उसकी वास्तविकता का मन में अनुभव करते हुए बचे हुये घर और सम्बद्ध चल-अचल सम्पत्ति को बेचकर मैंने उससे कुछ धन एकत्र किया और उसके द्वारा कुछ विक्रेय वस्तुयें खरीदीं और यात्रियों से परिचय बढ़ाते हुये समुद्री-यात्रा

सकलोपकरणैः सज्जीकृतं प्रवहणमेकं समधिरूढः सिन्धुयात्रायै प्रचलम्। प्रस्थितमात्र एव समुद्रयात्रापरायणजनसुलभाऽस्वास्थ्यं गतः किंचित्सचिन्तोऽपि कियता कालेन स्वस्थतनुरनेकान्यन्तरीपाणि सम्प्राप्य वस्त्वन्तरविनिमयेन सहानीतं वस्तुजातं विक्रीय किंचिद्धनमुपार्जयम्।

धनस्य = सम्पत्तेः, व्ययेन, सकलोपकरणैः सकलानि = सम्पूर्णानि च तानि उपकरणानि = पदार्थाः, तैः सज्जीकृतं–सुसज्जितम् एकम् = अन्यतमं, प्रवहणं = जलयानं, समधिरूढः = विहितारोहणः, सिंधुयात्रायै = समुद्रप्रवासं कर्तुम् प्राचलम् = निरगच्छम्। प्रस्थित-मात्र एव = विहितप्रस्थानमात्र एव समुद्रयात्रापरायणजनसुलभाऽस्वास्थ्यम्–समुद्रस्य = सागरस्य यात्रायां = प्रवासे परायणाः = दक्षाः, ये जनाः = लोकाः तैः सुलभं=प्राप्यम् अस्वास्थ्यं= अस्वस्थता गतः = प्राप्तः, किञ्चित् = स्वल्पम् सचिन्तः= चिन्तामग्नोऽपि, कियता कालेन = अचिरेणैव समयेन स्वस्थतनुः स्वस्था = प्रकृतिमापन्नाः, तनुः = शरीरं, यस्य सः, अनेकानि = विविधानि, अन्तरीपाणि–अन्तः = मध्ये, गताः, आपः = जलानि येषां तानि = द्वीपानि, 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्' इत्यमरः सम्प्राप्य = आगत्य, वस्त्वन्तरविनिमयेन–अन्यानि वस्तूनि = वस्त्वन्तराणि तेषां विनिमयेन = एकवस्तुप्रदानपूर्वकमन्यवस्तुग्रहेणेत्यर्थः। सह = सार्धम् आनीतं वस्तुजातं = पदार्थसमूहं विक्रीय, किञ्चिद् धनं = स्वल्पद्रव्यं, उपार्जयम् = समपादयम्।

करने की इच्छा से उनके साथ वासरपुर नाम के समुद्र तटवर्ती नगर में पहुँचा व्यापारियों के साथ अपना धन खर्च करके सम्पूर्ण सामग्रियों से सुसज्जित एक जहाज पर सवार होकर समुद्र यात्रा के लिये चल पड़ा। प्रस्थान के उपरान्त ही यद्यपि समुद्री यात्रियों को होने वाली अस्वस्थता का अनुभव कर रहा था और कुछ चिन्तामग्न था तथापि कुछ समय के बाद स्वस्थताका अनुभव करते हुये मैं अनेक द्वीपों में पहुँचा और वस्तु-विनिमय प्रणाली द्वारा साथ लायी। सामग्री को बेचकर मैंने कुछ धनोपार्जन किया।

एकस्मिन्नहनि सवेगं वहति पोते तदधिरूढ़ाः सर्वे वयं जलमध्यादुद्गतं हरितवर्णेन तुलितनवशाद्वलस्थलं नातिविशालं द्वीपमेकम-द्राक्ष्म। पोताध्यक्षे च पोतगतिं समवरूद्ध्य तं द्वीपमवरुरुक्षून् कांश्चित् प्रवहणाधिरुढाँस्तथा कर्तुम् कृतानुमतौ तैः सार्धमहमपि तत्रावातरम्।

एकस्मिन् = अन्यतमे, अहनि = दिने, "घस्रो दिनाऽहनि" इत्यमरः। पोते = जलयाने, सवेगं = वेगपूर्वकं, वहति = प्रवहति, सति, तदधिरूढाः-तस्मिन् = पोते, अधिरूढाः = कृतारोहणः, सर्वे = समस्ताः, वयं = समुद्रयात्रिणः, जलमध्यात् = समुद्रसलिलाभ्यन्तरतः, उद्गतं = निर्गतं, हरितवर्णेन = शुक्रोपमहरित कान्तिना, तुलितनवशाद्वलस्थलं-तुलितं नवं = नूतनं, शाद्वलस्थलं = तृणभूमिः, येन् तत्। हरितकान्तिना नवीनतृणभूमिसदृशमित्यर्थः। नातिविशालं = अनितविस्तृतम्, एकं = द्वीप अद्राक्ष्म = अपश्याम।

पोताध्यक्षे च, पोतं = यानपात्रं, "यानपात्रं तु पोतः" इत्यमरः। तस्य अध्यक्षः = नायकः, तस्मिन् पोतगतिं = प्रवहणवेगं, समवरुद्ध्य = निरोधं कृत्वा तं = पुरोदृश्यमानं द्वीपम्, अवरुरुक्षून् = अवरोहणं कर्तुम् इच्छून्, कांश्चित् = कतिपयान्, प्रवहणाधिरूढान् = नौकायात्रिणः, तथाकर्तुम् = अवरोहं विधातुं, कृतानुमतौ = अनुज्ञां प्रयच्छति सति, तैः = समुद्रयात्रिभिः, सार्धं = सह। तत्र अवातरम् = अवारोहम्।

अथ = द्वीपेऽवरोहणानन्तरं, अस्मासु = सांयात्रिकेषु, भोजनपानादिभिः = भोजनं च पानं आदौ येषां तैः, विनोदैः = मनोरञ्जनैः, सिंधुयात्राक्लमम् = सिंधोः = समुद्रस्य, यात्रायाः = प्रवासस्य, क्लमं = खेदं, अपनयत्सु = दूरीकुर्वत्सु, सत्सु, सहसा = अकस्मात्, विचलन् = कम्पमानः, सः = पूर्वोक्तः, द्वीपः कमपि = अनिर्वचनीयम्, अनुत्प्रेक्षणीयम् = अकल्पनीयं, महाभयसम्भ्रमं-महता =

एक दिन जब प्रवाह के साथ जब हमारा जहाज आगे की ओर बढ़ रहा था तह हम लोगों ने जल के बीच में से निकले हुये एक द्वीप को देखा जो हरे रंग का होने कारण हरे-भरे चरागाह के समान प्रतीत हो रहा था। जहाज के मालिक द्वारा उसकी गति रोके जाने पर सभी यात्रियों ने उस द्वीप पर उतरना चाहा। ऐसा करने की अनुमति मिलते ही उनके साथ मैं भी उस द्वीप पर उतर पड़ा। हम लोग भोजन, जलपान आदि सैर-सपाटों द्वारा जहाजी यात्रा की थकावट को दूर

अथास्मासु भोजनपानादिभिर्विनोदैः सिन्धुयात्राक्लममपनयत्सु सह विचलन् स द्वीपः कमप्यनुत्प्रेक्षणीयं महाभसम्भ्रमं जनयामास।

पोतस्था जनाश्च तं भूमिकम्पमवलोक्य सपदि प्रवहणमारोढुमस्म नुच्चैराह्वयन्। स चास्माभिरन्तरीपतया गृहीतो वस्तुतोऽनेकगव्यूतिपरिणा महाग्राह आसीत्, तत्र च केचिच्चपलाः पोतसंप्राप्तये सपदि प्लवानारुरुहु

प्रचुरेण, भयेन = भीत्या यः सम्भ्रमः = उद्वेगः, तम्, जनयामास = उत्पादयामा

पोतस्थाः = नौकारूढाः, जनाश्च = लोकाश्च, तं भूमिकम्पं = भूमिकम्पन अवलोक्य = दृष्ट्वा, सपदि = तत्कालं, प्रवहणं = जलयानं, अवरोढुम् आरोहणंकर्तुम्, अस्मान् = अवरूढान् यात्रिणः, उच्चैः = तारस्वरेण, आह्व = आह्वानं विदधुः। स च अस्माभिः = सांयत्रिकैः, अन्तरीपतया, गृहीतः "द्वीपोऽयम्" इति निर्धारितः, वस्तुतः = यथार्थरूपेण, अनेकगव्यूतिपरिणाह अनेकाः = असंख्याः, गव्यूतयः = क्रोशयुगानि, परिणाहः = विशालता य सः। "गव्यूतिः स्त्री कोशयुगम्" इति "परिणाहो विशालता" इति चामरः। महाग्र = विशालो जलजन्तुविशेषः, आसीत् = अवर्तत्। तत्र च द्वीपत्वेन परिगृह महाग्राहे, केचित् = कतिपये यात्रिणः, चपलाः = स्फूर्तिशीलाः, पोतसम्प्राप्तये जलयानं सम्प्राप्तुं, प्लवान् = लघुनौकाः, आरुरुहुः = आरोहणमकुर्वन्। परे आत्मानं, सिंधौ = समुद्रे, निक्षिप्य = क्षिप्त्वा, बाहुभ्यां = भुजाभ्यां, तरणे सन्तरणे, तत्पराः = संलग्नाः, बभूवुः = अभवन्। अहं = सिंधुवादः, तु तत्रैव तस्मिन्नेव, द्वीपत्वेन अध्यवसिते "द्वीपोऽयमिति" निर्धारिते, महाग्राहे = विश जलजन्तुविशेषे, स्थितः = वर्तमानः, क्षणात् = तत्कालं, तस्मिन् = महाग्र सिंधुतलनिमग्ने = समुद्रस्य तले ब्रुडिते सति, दैवात् = भाग्यात्, अधिगतं प्राप्तम्, एकं काष्ठफलकं = अन्यतमां काष्ठपट्टिकां, अवलम्ब्य = आश्रि उत्तालकल्लोलमालाभिः = उत्तालानां = समुच्छ्रितानां, कल्लोलानां = तरङ्गा

कर ही रहे थे कि अकस्मात् वह द्वीप हिलने-डुलने लगा और उससे कल्पना भयावह स्थिति उत्पन्न हुई।

जहाज पर सवार लोग उस भूकम्प को देखकर तत्काल जहाज पर सवार के लिए हम लोगों को जोर-जोर से पुकारने लगे। जिसे हमलोगों ने द्वीप सम था वह वस्तुतः अनेकों कोसों (गव्यूति) में फैला हुआ महाग्राह था। उस पर स

परे चात्मानं सिन्धौ निक्षिप्य बाहुभ्यां तरणे तत्परा बभूवुः। अहं तु तत्रैव द्वीपत्वेनाध्यवसिते महाग्राहे स्थितः क्षणात्तस्मिन् सिन्धुतलनिमग्ने दैवादधिगतं काष्ठफलकमेकमवलम्ब्योत्तालकल्लोलमालाभिरुपर्यधश्च क्षिप्यमाणो दैवमाक्रोशन्ननन्यशरणोऽभवम्।

अत्रान्तरे पोताध्यक्षः पवनमनुकूलमुपलभ्य पोतोपस्थितैः कतिभिर्जनैः सह मां तस्यामवस्थायामाशरणं समुत्सृज्य प्रयाणमकरोत्। अहं च तं

मालाभिः = परम्पराभिः, उपरि = उपरिष्टात्, अधश्च = अधस्ताच्च, क्षिप्यमाणः = निपात्यमानः दैवम् = दुर्भाग्यम्, आक्रोशन् = आक्रन्दन्, अनन्यशरणः = न विद्यते अन्यत् शरणं = रक्षकः यस्य सः। अनाथ इत्यर्थः, अभवम् = अवर्ते।

अत्रान्तरे = अस्मिन्नेव समये, पोताध्यक्षः = जलयानकर्णधारः, पवनम् = अनिलम्, अनुकूलम् = अनुरूपम्, तटानुसारि वा उपलभ्य = प्राप्य, पोतोपस्थितैः = जलयाने कृतारोहणैः, कतिभिः = विरलैः, जनैः = यात्रिभिः, सह, मां = सिन्धुवादम्, तस्यां = कष्टपूर्णायाम्, अवस्थायां = दशायां, अशरणं = अनाथम् समुत्सृज्य = परित्यज्य, प्रयाणम् = गमनम्, अकरोत् = व्यदधात्। अहं च = सिंधुवादः, तं = दुःखदम्, सकलं = समस्तं, दिवसं = दिनम्, निशीथिनीं च = रात्रिं च फलकांश्रयेण = काष्ठफलकस्य अवलम्बनेन, प्लवमानः = सन्तरन् नैर्बल्यनैराश्याभ्यां = निर्बलस्य भावो नैर्बल्यं निराशायाः भावो नैराश्यं, ताभ्यां परिगृहीतः दुर्बलो निराश्च सन्नित्यर्थः। प्रत्यूषे = अरुणोदयवेलायां, आयुषः = आयुष्यस्य, सावशेषतया = अवशिष्टतया, दुरारोहरोधस्तटं–दुरारोहः = दुःखेन आरोढुम शक्यः रोधस्तटः = तीरभूमिः, यस्य तत्। किञ्चन = किमपि अन्यं,

कुछ फुर्तीले लोग जहाज पर पहुँचने के लिए तत्काल नौकाओं पर सवार हुए और दूसरे समुद्र में कूदकर बाहुओं के सहारे तैरने लगे। मैं तो द्वीप के भ्रम में उस महाग्राह पर खड़ा ही था कि इतने में वह महाग्राह समुद्रतल में डूब गया। किन्तु भाग्यवश प्राप्त एक लकड़ी के लट्ठे के सहारे उत्ताल तरंग-परम्पराओं से ऊपर-नीचे फेका जाता हुआ अशरण होकर भाग्य को मैं कोसने लगा।

इस बीच जहाज के मालिक ने हवा का रूख अनुकूल पाकर जंहाज पर सवार कुछ लोगों के साथ उसी अवस्था में मुझ अनाथ को छोड़कर प्रस्थान किया। मैं उस पूरे दिन और रात भर पटरे के सहारे तैरता रहा तथा दुर्बलता

सकलं दिवसं निशीथिनीं च फलकाश्रयेण प्लवमानो नैर्बल्यनैराश्याभ्यां परिगृहीतः प्रत्यूषे सावशेषतयाऽऽयुषो दुरारोहरोधस्तटं किञ्चिदन्तरीपमासाद्य शाखिप्ररोहावलम्बेन कथङ्कथमपि तीरभूमावात्मानमपातयम्।

अथोदिते भगवति गभस्तिमालिनि परिश्रमातिशयेन नितान्तं क्लान्तगात्रश्चलितुमप्यक्षमः क्षुत्क्षामकण्ठो मन्दं मन्दं प्रसर्पन् वृक्षावशीर्णानि

अन्तरीपं = द्वीपं, आसाद्य = प्राप्य, शाखिप्ररोहावलम्बेन-शाखिनां = वृक्षाणां, ये प्ररोहाः = शाखाः, तेषां अवलम्बेन = आश्रयेण कथं कथमपि = येन केनापि कष्टकरेण प्रकारेण, तीरभूमौ = द्वीपकूलस्थले, आत्मानं = स्वं, अपातयम् = अक्षिपम्।

अथ = अनन्तरम् अन्येद्युरित्यर्थः। उदिते, भवगति = देवे, गमस्तिमालिनि गभस्तीनां = किरणानां, "किरणोस्रमयूखांशुगभस्तिघृणिरश्मय" इत्यमरः। माला परम्पराऽ-स्यास्तीति गभस्तिमाली तस्मिन् सूर्ये, परिश्रमातिशयेन = अत्यधिकश्रमेण, नितान्तं = अत्यन्तं, क्लान्तगात्रः-क्लान्तं = म्लानं, गात्रं = शरीरं यस्य सः चलितुमपि = गन्तुमपि, अक्षमः = असमर्थः, क्षुत्क्षामकण्ठः क्षुधा = बभुक्षया, क्षामः = कृशः, कण्ठो = गलः यस्य सः, मन्दं मन्दं = शनैः शनैः, प्रसर्पन् = अग्रे सरन्, वृक्षावशीर्णानि-वृक्षेभ्यः = तरुभ्यः, अवशीर्णानि = गलितानि, कानिचित् = कतिपयानि, फलानि, जग्ध्वा = भक्षयित्वा दैवात् = भाग्यात् तत्र = तस्मिन् द्वीपतीरभूमौ, अधिगतं = प्राप्तम्, स्रोतोजलम्-स्रोतसः = निर्झरस्य, जलम् पीत्वा, किञ्चित्, उच्छ्वासितः = उच्छ्वासम् आददानः, इतस्ततः, कञ्चन अतिमनोहरम् = रम्यतमम्, शाद्वलं = तृणभूमिम्, निरूपयन् = निरीक्षमाणः

और निराशा ने मुझे घेर लिया। प्रभातकाल में आयु शेष होने के कारण ऐसे द्वीप पर पहुँचा जिसके तट पर चढ़ना कठिन था, किन्तु वृक्षों की जड़ों के सहारे मैं किसी प्रकार उसके तट पर अपने को पहुँचाया।

भगवान् सूर्य नारायण के उदय होने पर यद्यपि अत्यन्त परिश्रम के कारण मेरा शरीर खूब चकनाचूर हो गया था, मैं चल भी नहीं सकता था, भूख प्यास के कारण मेरा कण्ठ अवरुद्ध था, ऐसी स्थिति में धीरे-धीरे सरकते हुए पेड़ के नीचे गिरे हुए कुछ फलों को खाकर और दैववश प्राप्त झरने के जल को पीकर मेरे प्राण में प्राण आये। मैं इधर-उधर देखने लगा। मैंने वहाँ एक सुन्दर चरागाह को भी देखा जहाँ

कानिचित्फलानि जग्ध्वा पीत्वा च दैवात् तत्राधिगतं स्त्रोतोजलं किञ्चिदुच्छ्वसित इतस्ततो निरूपयन् कञ्चनातिमनोहरं शाद्वलं तत्र च चरन्तीमेकस्यां स्थूणायां संयतां मनोहारिणीं वडवामेकामपश्यम्। सभयकूतूहलं तामुपसृत्य निर्वर्णयन् भूमिगर्भादुत्थितं मनुजशब्दमश्रृणवम्। एकश्च जनस्तत्क्षणं मामुपेत्य "भद्र! कस्त्वम्? कुतः समायातः?" इत्यपृच्छत्। श्रुतमदुदन्तोऽसौ मां हस्तेऽवलम्ब्य कतिपयैरपरैः पुरुषैरधिष्ठितं गह्वरमेकमनयत्। तत्र तेषां सन्दर्शनिनाहमिव तेऽपि मां

तत्र च शाद्वले, चरन्तीं = विचरणशीलाम्, एकस्याम् स्थूणायां = स्तम्भे, "स्थूणां स्तम्भेऽपि वेश्मनः" इत्यमरः। संयतां = बद्धाम् मनोहारिणीम् = हृदयावर्जनीम् एकां, वडवाम् = अश्वाम्, अपश्यम्। तां = वडवाम्, सभयकुतूहलेन-भयेन कुतूहलेन च सहितमिति क्रियाविशेषणम्। निर्वर्णयन् = अवलोकयन्, भूमिगर्भात् = पृथिव्या अभ्यन्तरतः, उत्थितं = समुद्गतं, मनुजशब्दं = मनुष्याणां शब्दं, अश्रृणवम् = आकर्णयम्। एकश्च जनः = मनुष्येषु अन्यतमः, तत्क्षणं = तत्कालं, मां = सिंधुवादं, उपेत्य = संप्राप्य, 'भद्र ! = महोदय !, त्वं = भवान् कः ?' कुतः = कस्मात् स्थानात्, समायातः = आगतः ? इति एवं, अपृच्छत् = प्रश्नमकरोत्। श्रुतमदुदन्तः–श्रुतः = आकर्णितः, मम = सिन्धुवादस्य, उदन्तः = वृत्तान्तः येन सः। "वार्ता प्रवृत्तिर्वृत्तातः उदन्तः स्यात्" इत्मरः। असौ = जनः, मां हस्ते अवलम्ब्य = करे गृहीत्वा, कतिपयैः = कैश्चन, अपरैः = अन्यैः, जनैः–मनुष्यैः, अधिष्ठतं = कृतनिवासं, एकं गह्वरं = अन्यतमां गुहां, अनयत् = नयतिस्म। तत्र = गह्वरे, तेषां = जनानां, सन्दर्शनेन = अवलोकेन, अहमिव

एक खूटी से बँधी सुन्दर घोड़ी चर रही थी। भय और उत्सुकता से उसके पास आकर उसे देखते हुए मैंने जमीन के अन्दर से आने वाले मनुष्य के शब्द को सुना और एक व्यक्ति ने तत्काल ही मेरे पास आकर पूछा–

"महोदय ! आप कौन हैं ? और कहाँ से आये।" उसने मेरी कहानी सुनकर मेरा हाथ पकड़ कर मुझे ऐसी गुफा में ले गया, जहाँ दूसरे लोग भी थे। वहाँ उन्हें देखकर मैं जिस प्रकार आश्यर्यचकित हुआ उसी प्रकार वे भी मुझे देखकर आश्चर्यचकित हुए। पश्चात् उनके द्वारा दी गयी। भोज्यसामग्री को खाकर जब मैंने उस निर्जन स्थान में रहने का कारण पूछा तब उन्होंने मुझसे इस प्रकार कहा

विलोक्य विस्मितास्तस्थुः।

तदनु तैरुपहृतं किञ्चिदशनं भुक्त्वा मया तत्र निर्जनोद्देशेऽवस्थितिकार
पृष्ठास्त एवमब्रुवन् -

"वयं खलु एतद्द्वीपाधिपस्य महाराजमिहिरस्याश्वपालास्तदीय
काश्चिद्वडवा गहीत्वा प्रतिहायनमेतस्मिन् ऋताविहागमनशीलेन सैन्धवे

तेऽपि = यथाऽहं सिन्धुवादः, तथैव तेऽपि, जनाः, मां = सिन्धुवादं, विलोक्य दृष्ट्वा, विस्मिताः = आश्चर्यचकिताः, तस्थुः = स्थिताः। यथाऽहं तेषां सन्दर्श विस्मितः तथैव तेऽपि मां विलोक्य विस्मितास्तस्थुरित्यर्थः। तदनु = तत्पश्चात् =जनैः, उपहृतं = दत्तं, अशनं = भोज्यपदार्थं, भुक्त्वा = आस्वाद्य, मया=सिंधुवाद तत्र = तस्मिन्, निर्जनोद्देशे = मनुष्यरहितस्थाने, अवस्थितिकारणं = वसतिहेतु पृष्टाः = जिज्ञासिताः, ते जनाः। एवं = वक्ष्यमाणरीत्या, अब्रुवन् = अकथय

"वयं खल्विति वाक्यालंकारे।" एतत्द्वीपाधिपस्य-एतस्य द्वीपस्य अधि = स्वामी, तस्य। महाराजमिहिरस्य-महाराजाश्चासौ मिहिरः, तस्य। अश्वपाल तदीयाः = महाराजमिहिरस्य, काश्चित् = कतिपयाः वडवाः = अश्वाङ्गन गृहीत्वा = आदाय, प्रतिहायनं = प्रतिवर्षम्, इह = अस्मिन्,ऋतौ = कालविशे आगमनशीलेन = आगतवता, सैन्धवेन सिन्धोरयं सैन्धवः तेन, वाजिना = अश्वे ताः बडवाः, संयोज्य = सङ्गमय्य, अद्भुतनवतुरङ्गोत्पादने-अद्भुताः = विलक्षणाः, नवाः = नूतनाः, ये तुरंगाः = अश्वाः, तेषां उत्पादने = सृष्ट नियोजिताः = कृतनियुक्तयः, इह = अस्मिन् द्वीपे, आगच्छामः। आहितगर्भाः आहितः = स्थापितः गर्भः यासु ताः = वडवाः, गृहीत्वा, भूयः = पुनः, तं महाराजमिहिरं प्रापयामः। एवं = अनेन प्रकारेण उत्पन्नाः = उद्भूताः, अभिनव = नवीनाः, वाजिनः = अश्वाः सैन्धवाः नाम = सैन्धवनामानः, कथ्यन्ते सम्बोध्यन्ते, केवलं, राजवाह्यतां-राजभिः = नृपैः, वाह्याः आरोहणीयाः

"हमलोग इस द्वीप के स्वामी महाराज मिहिर के अश्वपाल हैं और उन कुछ घोड़ियों को लेकर प्रतिवर्ष इस ऋतु में यहाँ आनेवाले सैंधव (अरब घोड़ों के साथ उनका संयोग कराते हैं। क्योंकि हमलोग अद्भुत नवीन अश्वोत्पा के लिए नियुक्त किए गये हैं और यहाँ आते। गर्भ धारण के पश्चात् उन्हें लेक हम पुनः अपने स्वामी के पास पहुँचाते हैं। इस प्रकार उत्पन्न अभिनव अ

वाजिना ताः संयोज्याद्भुतनवतुरङ्गोत्पादने नियोजिता इहागच्छामः। आहितगर्भाश्च ताः गृहीत्वा भूयस्तं प्रापयामः। एवमुत्पन्ना अभिनवा वाजिनः सैन्धवा नाम कथ्यन्ते। केवलं राजवाह्यतां चोपयान्ति। श्वो वयमितः प्रस्थास्यामहे।

दिष्ट्याऽद्य सम्प्राप्तोऽसि। अन्यथा नूनमत्र विजनप्रदेशेऽलब्ध-जीवनसाधन उपरतोऽभविष्य इति।

तेषु चैवं वदत्सु सहसा तैरुपवर्णितः स सैन्धवोऽश्वो जलाभ्यन्त-रादाविर्भूय ता वडवा आक्रमितुम् कृतसंरम्भस्तैरश्वपालैः कोलाहलेन विद्रावितो भूयो जलाभ्यन्तरे न्यमज्जत्।

राजवाह्याः, तेषां भावः राजवाह्यता, तां च उपयांति प्राप्नुवन्ति। श्वः = आगामिनि दिने, वयम् = अश्वपालाः, इतः = अस्मात् द्वीपात्, प्रस्थास्यामहे=प्रयाणं करिष्यामहे।

दिष्ट्या = भाग्येन, अद्य = वर्तमानसमये, सम्प्राप्तोऽसि = आगतोऽसि। अन्यथा = अद्य तव असति आगमने, नूनम् = निश्चयेन, अत्र = अस्मिन्, विजनदेशे = मनुष्यरहिते स्थाने, अलब्धजीवनसाधनः, न लब्धं = न प्राप्तम्, जीवनस्य = प्राणरक्षायाः साधनं = सामग्री येन सः। उपरतः = मृतः अभविष्यः।

तेषु च = अश्वपालेषु, एवम् = अनया रीत्या, वदत्सु = ब्रुवत्सु,सत्सु सहसा = अकस्मात्, तैः = सेवकैः, उपवर्णितः = प्रशंसित, सः = प्रसिद्धः सैन्धवः = समुद्रोद्भवः, अश्वः जलाभ्यान्तरात् = सलिलस्य मध्यभागात् आविर्भूय =प्रकटीभूय, ताः मिहिरस्वामिकाः, वडवाः = अश्वीः, आक्रमितुम् = रन्तुमित्यर्थः। कृतसंरम्भः- -कृतः संरम्भः = उद्योगः येन सः। तैः = पूर्ववर्णितैः, अश्वपालैः, कोलाहेन,विद्रावितः = पलायितुं नोदितः, भूयः, जलाभ्यन्तरे = सलिलमध्ये, न्यमज्जत् = निमग्नोऽभवत्।

'सैंधव' कहलाते हैं, ऐसे घोड़े केवल राजा का वाहन ही बन सकते हैं। हम लोग कल यहाँ से प्रयाण करेंगे।

भाग्य से तुम आज यहाँ पहुँचे हो। अन्यथा निश्चित रूप से इस निर्जन प्रदेश में बिना जीने के साधन के तुम मर जाते।"

वे इस प्रकार बोल ही रहे थे कि इतने में उनके द्वारा वर्णित वह सैन्धव अश्व जल के भीतर से निकला और घोड़ियों से सम्भोग करने के लिए प्रयास करने लगा। अश्वपालों के कोलाहल से वह फिर जल के भीतर प्रविष्ट हो गया।

अन्येद्युर्गृहीतवडवैस्तैः सह तद्द्वीपाधिराजस्य महाराजमिहि[illegible]
राजधानीं गतोऽहं कृतराजदर्शनः सुकुतुकं पृष्टो निखिलं स्ववृत्तमाख्या[illegible]
दयार्द्रहृदयेन तेनोदाराशयेन प्रसादीकृतेन द्रविणविसरेण प्रमुदित[illegible]
मनास्तत्रैवाऽवात्सम्। तत्र च वसन् मदेककर्मभिः सार्थवाहैर्विशेषि[illegible]
वैदेशिकैर्विदामपुरवार्ताजिज्ञासया तदुद्दिश्य गन्तुकामैः कैरपि [illegible]

अन्येद्युः = अन्यस्मिन्, दिने, 'अन्य' शब्दात् एद्युस् प्रत्ययः। गृहीतवड[illegible]
गृहीताः = आनीताः, वडवाः = अश्वाङ्गनाः, यैः तैः, तैः, सह = सा[illegible]
तद्द्वीपाधिराजस्य-तस्य द्वीपस्य अधिराजस्य = स्वामिनः, महाराजमिहिर[illegible]
राजधानीं, गतः = प्राप्तः, अहं = सिन्धुवादः, कृतराजदर्शनः, कृतः राज्ञः[illegible]
महाराजमिहिरस्य, दर्शनम् येन सः। सकुतुकम् = उत्सुकतापूर्वकम्, पृष्ट[illegible]
जिज्ञासितः, निखिलं = समस्तम् (प्रारम्भतोऽद्यावधि), स्वं = निजम्, वृत्त[illegible]
यात्रावृत्तान्तम्, आख्याय = कथयित्वा, दयार्द्रहृदयेन-दयया आर्द्रं हृदयं यस्य [illegible]
= करुणाप्लुतान्तःकरणेन, उदाराशयेन-उदारः आशयः यस्य तेन = सरलशील[illegible]
तेन = महाराजमिहिरेण, प्रसादीकृतेन = उपायनीकृतेन, द्रविणविसरेण = धनराशि[illegible]
प्रमुदितमनाः प्रमुदितम् = प्रसन्नम्, मनः यस्य सः। तत्रैव = तस्मिन्नेव द्वीपे, व[illegible]
= निवासम् कुर्वन्। मदेककर्मभिः = मम एकं कर्मं येषां तैः, सार्थवाहैः सार्थं[illegible]
समूहं, वहन्ति इति सार्थवाहाः = वणिग्जनाः, "वैदेहकः सार्थवाहो नैगमो वाणि[illegible]
वणिक्" इत्यमरः। तैः विशेषतः, वैदेशिकैः-विदेशस्य इमे वैदेशिकाः = पर[illegible]
यात्रिणः तैः, विदामपुरवार्ताजिज्ञासया-विदामपुरस्य या वार्ता = वृत्तान्तः त[illegible]
या जिज्ञासा= ज्ञातुमिच्छा, तया। तत् = विदामपुरम्, उद्दिश्य,गन्तुकामैः=प्रयाणोत्सु[illegible]
कैरपि =यात्रिभिः, सह प्रतिजिगमिषया-प्रतिगन्तुमिच्छा, प्रतिजिगमिषा = प्र[illegible]
निवर्तनेच्छा तया। उपचितपरिचयः-उपचितः = वृद्धिं नीतः परिचयः येन स[illegible]

दूसरे दिन घोड़ियाँ लेकर वापस जाने वाले उन अश्वपालों के साथ मैं [illegible]
द्वीप के महाराज मिहिर की राजधानी पहुँचा और उनका दर्शन किया। उत्सुकतापू[illegible]
पूछे जाने पर मैंने अपनी सम्पूर्ण कहानी उन्हें सनाई और उन्होंने दयार्द्र हो[illegible]
उदार अन्तःकरण से धनराशि उपहारस्वरूप अर्पित की, जिससे प्रसन्न होक[illegible]
वहीं रहने लगा। वहाँ पर रहते हुए मेरे सहकर्मी कतिपय सार्थवाहकों [illegible]
विशेषतः विदेशी व्यापारियों के साथ जो विदामपुर की खबर जानने की इच्छ[illegible]

र्तिजिगमिषया चोपचितपरिचयः सद्भिः सङ्गच्छमानस्तद्वार्तालापेना-
त्मानं विनोदयन् मिहिरराजसभां प्रत्यहमुपतिष्ठमानस्तत्सामन्त-
भूमिपालैरधिकारिवर्गैश्च सह परिवर्धितप्रणयस्तान् स्वदेशवृत्तान्तैर्विनोदयन्
कञ्चन कालमयापयम्।

एवं वहत्यनेहसि सोऽहमेकस्मिन्नहनि पोतावतारसिन्धुरोधसि स्थित
आरात् द्वीपमुपसर्पन्तं पोतमेकं दृशोर्विषयतामनैषम्।

अथावतारितपोतावरोधनकीलेषु पोतवाहेषु पोतगतपण्यराशीनधितटं

सद्भिः = सज्जनैः, सङ्गच्छमानः = सङ्गमं कुर्वन्, तद्वार्तालापेन–तेषां = सज्जनानाम्, वार्तालापेन = परस्परभाषणेन, आत्मानं = स्वम्, विनोदयन् = रञ्जयन्, मिहिरराजसभाम्–मिहिरस्य राजसभां, प्रत्यहं = प्रतिदिनम्, उपतिष्ठमानः उपस्थितः सन्, तत्सामन्तभूमिपालैः–सामन्ताश्च ते भूमिपालाश्च, तैः, इति अधिकारिवर्गैश्च = अधिकारिणां समूहैश्च, सह, परिवर्धितप्रणयः–परिवर्धितः प्रणयः = प्रेमा येन सः। तान् = सर्वान्, स्वदेशवृत्तांतैः = स्वराष्ट्रविषयकैः वार्तालापैः, विनोदयन् = रंजयन्, कंचन कालं = समयम्, अयापयम् = नीतवान्। एवं = इत्थम्, अनेहसि = काले, 'कालो दिष्टोऽप्यनेहापि' इत्यमरः। वहति धावति सति एकस्मिन्नहनि = अन्यतमे दिवसे, पोतावतारसिन्धुरोधसि–पोताः जलयानानि अवतरन्ति यत्र, एवम्भूतं यत् सिंधोः–समुद्रस्य, रोधः = तटम्, तस्मिन्। स्थितः = वर्तमानः, आरात् = समीप एव, आराद् दूरसमीपयोः, इत्यमरः। द्वीपम् उपसर्पन्तं = समीपमागच्छन्तं, एकं पोतं = जलप्रवहणम् दृशोः विषयताम् अनैषम् = अपश्यमित्यर्थः।

जहाँ जाना चाहते थे उनसे मैंने वापस जाने की इच्छा से परिचय बढ़ाया तथा मैं सज्जनों से सत्सङ्ग करते हुए तथा वार्तालाप के द्वारा अपना मनोरंजन कर मैं प्रतिदिन राजा मिहिर की राजसभा में भी उपस्थित होने लगा और वहाँ उपस्थित सामन्तों, राजाओं और अधिकारियों के साथ प्रेम बढ़ाते हुए तथा उनका स्वदेश सम्बन्धी वार्ताओं द्वारा मनोरंजन करके मैंने वहाँ कुछ समय व्यतीत किया।

इस प्रकार समय बीत ही रहा था कि मैंने एक दिन समुद्री बन्दरगाह के तट पर खड़े होकर पास में ही उस द्वीप की ओर आनेवाले एक जहाज को देखा।

अनन्तर जब जहाज के चलाने वालों ने जहाज को बाँधने वाले लङ्गर (कीलों)

प्रापय त्सु वणिग्जनेषु च रोधःस्थितेषु ससम्भ्रमं स्वस्ववस्तुजातायत्त
करणप्रवणेषु, विलिखितात्मनामधेयान् समुद्गकान् निरीक्ष्य 'त इ
मदीया एव प्रयाणसमये पोतमारोपिताः समुद्गका' इति निश्चि
प्रत्यभिज्ञाय च तं पोताध्यक्षमहमपृच्छम् -

"आर्य! कस्यैते समुद्गकाः?"

स प्रत्युवाच-"एते खलु मत्पोतमधिरूढपूर्वस्य विदामपुरनिवासि

अथ अनन्तरम्, पोतवाहेषु = समुद्रयानानां नियामकेषु, नियामकाः पोतव इत्यमरः। अवतारितपोतावरोधनकीलेषु–अवतारितानि पोतानाम्–अवरोधन कीलानि यैस्तेषु। वणिग्जनेषु च = समुद्रव्यापारिषु च पोतगतपण्यराशीन् पोतगत = प्रवहणस्थितानां, पण्यानां = विक्रेययस्तूनां, राशीन् = निचयान्, अधितटं द्वीपतीरेषु, प्रापयत्सु, रोधःस्थितेषु = तट वर्तिषु (वणिग्जनेषु) ससम्भ शीघ्रतापूर्वकम्, स्वस्ववस्तुजातायत्तीकरणप्रवणेषु-स्वेषां स्वेषा वस्तुजातान आयात्तीकरणे = स्वाधीनीकरणे प्रवणेषु = दक्षेषु, विलिखितात्मनामधेया विलिखितम् = अङ्कितम्, आत्मनः = मम सिंधुवादस्य नामधेयं = संज्ञा तान्, समुद्गकान् = सम्पुट कान्, 'समुद्गकः संपुटकः' इत्यमरः। निरीक्ष्य निर्वर्ण्यः त इमे मदीयाः = मामकीनाः। सिंधुवादस्य एवेति निश्चयार्थकमव्यय प्रयाणसमये = निर्गमनवेलायाम्, पोतम् = जलप्रवहणम् आरोपिताः = आरोहित समुद्गकाः इति निश्चित्य = निर्धाय, प्रत्यभिज्ञाय च = परिचिन्वश्च, तं पोताध = प्रवहणकर्णधारणम्, अपृच्छम् = पृष्टवान्।

'आर्य! = भद्र! कस्य एते = पुरोवर्तमानाः, समुद्गकाः? इति।

सः = पोताध्यक्षः प्रत्युवाच = प्रत्युत्तरं ददौ, एते खलु मत्पोतं =

को उतार दिया तथा तब जहाज की विक्रेय वस्तुओं को किनारे पहुँचा दिया उस पर के व्यापारी शीघ्रतापूर्वक उस पर रखी हुई माल की पेटियाँ जिन उनका नाम लिखा हुआ था उनको लेने लगे, उन्हें देखकर मैंने "यह मेरी पे हैं जिन्हें प्रयाण के समय जहाज पर चढ़ाया था" इस प्रकार निश्चयपू पहचाना तब मैंने उस जहाज के मालिक से पूछा–

"महोदय! ये किसकी पेटियाँ हैं?"

उसने उत्तर दिया–"मेरे जहाज पर सवार होनेवाले विदामपुर के निव

आर्यसिन्धवादस्य सम्पुटकाः। एकस्मिन्नहनि सिन्धुमध्यान्निर्गत्यावस्थितं महाग्राहमेकं भ्रमादन्तरीपं मन्वानेष्वस्मासु कतिपये सिन्धुवादसहिता-स्तत्राऽवतीर्य पाकादिक्रियां कर्तुमारभन्त। तत्तापेनोद्विग्नश्च स ग्राहः सहसैव सिन्धुतले न्यमज्जत्। तस्मिन्नतिघोरसङ्कटे तेषु बहवो जनाः सिन्धुतलं प्रापुः ससिन्धुवादाः। सांप्रतं तदीयं पण्यराशिमेतत्समुद्गक-सन्दोहस्थं विक्रीय तल्लाभरूपमखिलं वसु यः कश्चन तस्य रिक्थहरस्तस्मै

प्रवहणम्,. अधिरूढपूर्वस्य–पूर्वमधिरूढः अधिरूढपूर्वः = पूर्वकृतारोहणः तस्य। विदामपुरनिवासिनः–विदामपुरे निवसतीति विदामपुरनिवासी, तस्य = आर्यं सिंधुवादस्य, सम्पुटकाः। एकस्मिन् अहनि = दिने, सिंधुमध्यात् = समुद्राभ्यन्तरतः, निर्गत्य = निष्क्रम्य, अवस्थितं = वर्तमानम्, एकं महाग्राहम् = विशालनक्रं, अन्तरीपं मन्वानेषु = द्वीपत्वेन निर्धारयत्सु, अस्मासु = समुद्रयात्रिषु सिंधुवादसहिताः कतिपयात्रिणः, तत्र महाग्राहे, अवतीर्य = अवतरणं कृत्वा, पाकादिक्रियाम् कर्तुम् = विधातुम् आरभन्त। तत्तापेन तस्याः = पाकक्रियायाः, तापेन = दाहसन्तापेन, उद्विग्नः = सन्त्रस्तः सः ग्राहः, सहसैव = अकस्मादेव, सिंधुतले = समुद्रतले, न्यमज्जत् = निमग्नोऽभवत्। तस्मिन् = आनर्वचनीये, अतिघोरे = भयङ्करे, सङ्कटे = विपत्तौ, तेषु = यात्रिषु, बहवः = अधिकाः, जनाः = यात्रिणः, ससिंधुवादाः = सिंधुवादेन सहिताः, सिंधुतलम्, प्रापुः = जग्मुः। साम्प्रतम् = अधुना, एतत्समुद्गकसंदोहस्थं = एतेषां समुद्गकानां सन्दोहे वर्तमानम्, तदीयं = सिंदुवादस्य, पण्यराशिं = विक्रेयवस्तुसमूहम्, विक्रीयं, तल्लाभरूपं = विंक्रयप्राप्तिस्वरूपम्, वसु = धनम् यः कश्चन, तस्य = सिंधुवादस्य, रिक्थहरः रिक्थं हरतीति रिक्थहरः = दायग्राहो पुत्रादिः, तस्मै = उत्तराधिकारिणे, प्रतिपाद्य

आर्य सिंधुवाद की पेटियाँ हैं। एक दिन समुद्र के बीच से निकले हुए महाग्राह पर जिसे हम लोगों ने भ्रम से द्वीप समझ लिया था उनमें से सिन्धुवाद के साथ कुछ लोग वहाँ उतरकर रसोई आदि बनाने लगे। उसकी गर्मी से घबड़ाकर वह ग्राह अकस्मात् समुद्र की तलहटी में डूब गया। इस भयावह विपत्ति में बहुत से लोग सिंधुवाद के साथ समुद्र की तलहटी में पहुँच गये। इस समय इन पेटियों में रखी हुयीं उसकी विक्रेय वस्तुओं को बेचकर उसके लाभ का धन जो कोई उसका उत्तराधिकारी होगा उसे सौंप कर, मैं निश्चिन्त होना चाहता हूँ।"

प्रतिपाद्य विगतचिन्तो भवितुमिच्छामि'' इति।

अहं तमवदम् ''आर्य! सोऽहं सिन्धुवादो यं भवानुपरतं मन्यते। तदेते मदीयाः सम्पुटका'' इति। स पुनः ''अहो अलीकपरता स्वार्थपरस्य जनस्य। ननु साक्षात्कृततद्विनाशेन मया कथङ्कारं भवान् श्रद्धीयताम्''? इति सोल्लुण्ठमवदत्।

''अहं च तं मामेवमश्रद्दधानं सकलं भूतार्थमवर्णयम्

= समर्प्य विगतचिन्तः = चिंतामुक्तः, भवितुम् = वर्तितुम्, इच्छामि = वांछामि इति।

अहं = सिंधुवादः, तं = पोताध्यक्षम्, अवदम् अब्रुवम्। आर्य! = भद्र! सोऽहं सिंधुवादः, यं भवान् उपरतं = मृतम्, मन्यते = जानीते। तत् = तस्मात् एते = पुरोवर्तमानाः, सम्पुटकाः, मदीयाः = मम सिंधुवादस्य इति। सः = पोताध्यक्षः, पुनः, 'अहो' इत्याश्चर्यसूचकमव्ययम्। स्वार्थपरस्य = स्वप्रयोजनसिद्धिमात्रलम्पटस्य, जनस्य = लोकस्य, अलीकपरता = असत्यभाषणशीलता, 'ननु' इति वितर्के। साक्षात् कृततद्विनाशेन-साक्षात्कृत = प्रत्यक्षीकृतः, तस्य = सिंधुवादस्य, विनाशः = मरणम्, येन तेन, मया = पोताध्यक्षेण, कथङ्कारं = केन प्रकारेण, भवान् = त्वम्, श्रद्धीयताम् = विश्वस्यताम्? इति = एवं, सोल्लुण्ठं = सोपहासम्, अवदत् = अब्रवीत्।

अहं च = सिंधुवादः तं पोताध्यक्षम्, माम्, एवं = पूर्वोक्तरीत्या, अश्रद्दधानम् = अविश्वसन्तम्, सकलं = समस्तम्, भूतार्थं = घटितां वास्तविकीं परिस्थितम्, अवर्णयम् = न्यवेदयम्। मद्वचनाऽऽकर्णनविगतभ्रमः–मम = सिंधुवादस्य, वचनस्य

मैंने उससे कहा–"महोदय! मैं ही सिंधुवाद हूँ। जिसे आप मृत समझते हैं। ये मेरी ही पेटियाँ हैं।"

वह फिर अविश्वासपूर्वक बोला–"अरे! स्वार्थी लोग कितने झूठ बोलते हैं। मैंने स्वयं उसकी मृत्यु को देखा है। मैं आप पर किस प्रकार विश्वास करूँ।"

मेरे ऊपर इस प्रकार अविश्वास करने वाले उस व्यक्ति को तब मैंने सम्पूर्ण वास्तविकता समझाई। मेरा वचन सुनकर उसका भ्रम दूर हो गया और मुझे देखकर पहचानते हुए हर्षपूर्वक बोला–

द्वचनाकर्णनविगतभ्रमोऽसौ मां निर्वर्ण्य प्रत्यभिजानन् सप्रमोदमुवाच- ‘‘दिष्ट्या भवाँस्तां प्रतिभयां विपदं समुत्तीर्णः। क्षमस्व मदविनयम् आयत्तीकुरु च स्वपण्यगणम्’’ इति। कृतज्ञतया मया प्रदीयमानं किमपि पारितोषिकं सविनयमसौ प्रत्याचख्यौ।

तेषु च पण्यद्रव्येषु कानिचिन्महार्घाणि मिहिरमहीपतये समुपहृत्य विज्ञाततदागमवृत्तेन प्रसन्नात्मना तेन सादरं सबहुमानं वितीर्णप्रचुर-

= भूतार्थनिवेदनस्य आकर्णनेन = श्रवणेन, विगतः = दूरीभूतः, भ्रमः = भ्रान्तिः, यस्य सः। असौ =पोताध्यक्षः, मां = सिंधुवादम्, निर्वर्ण्य = अवलोक्य, प्रत्यभिजानन् = परिचिन्वन्, सप्रमोदं = हर्षपूर्वकम्, माम्, उवाच = जगाद-दिष्ट्या = सौभाग्येन, भवान् = त्वं सिंधुवादः प्रतिभयां-प्रतिगतं भयं यस्याः, तां = भयावहाम्, विपदम् = आपत्तिम्, समुत्तीर्णः = पारं गतोऽसि। मदविनयं = मम औद्धत्यम्, क्षमस्व = क्षमां कुरु, स्वपण्यगणं च = निजविक्रेयवस्तुराशिं च, आयत्तीकुरु = स्वाधीनं कुरुष्व इति। असौ पोताध्यक्षः, कृतज्ञतया-कृतं जानातीति कृतज्ञः, तस्य भावस्तया, प्रदीयमानं = समर्प्यमाणम्, किमपि = स्वल्पममपि, पारितोषिकं = पारितोषमयमुपहारम्, सविनयं = नम्रतापूर्वकम्, प्रत्याचख्यौ = निषेधयामास।

तेषु च पण्यद्रव्येषु = विक्रेयवस्तुषु, कानिचित् सङ्कलितानि, महार्घाणि = बहुमूल्यानि, मिहिरमहीपतये = महाराजधिराजाय मिहिराय, समुपहृत्य = समर्प्य, विज्ञाततदागमवृत्तेन विज्ञातं = विदितम्, तेषाम् आगमस्य = आगमनस्य, वृत्तं = वार्ता येन तेन। प्रसन्नात्मना-प्रसन्नः = प्रहृष्टः, आत्मा यस्य तेन। तेन = मिहिरराजेन, सादरं = आदरपूर्वकम्, सबहुमानम् = सम्मानपूर्वकम्, वित्तीर्णप्रचुरविभवः वित्तीर्णः = प्रदत्तः, प्रचुरः = प्रभूतः, विभवः = धनं यस्मै सः। तं = पोताध्यक्षम्, आमन्त्र्य = अनुमतिं गृहीत्वा, भूयः= पुनः; तदेव प्रहणम् = जलयानम्, अधिरूढः

भाग्य से आप भयावह विपत्ति को पार कर गये हैं। आप मेरे अशिष्ट आचरण को क्षमा करें और अपनी वस्तुयें अपने अधीन करें।

कृतज्ञता के कारण मेरे द्वारा दिए स्वल्प पारितोषिक को भी उसने नम्रता से लेना अस्वीकार कर दिया।

उन विक्रेय वस्तुओं में से कुछ बहुमूल्य वस्तुओं को मैंने राजा मिहिर को उपहार के रूप में समर्पित किया। उन व्यापारियों के आगमन के वृत्तान्त से वे

विभवस्तमामन्त्र्य भूयस्तदेव प्रवहणमधिरूढः पण्यविनिमयेन संगृहीत चन्दन-कर्पूर-मरिच-मुखतत्रत्यवस्तुनिचयस्ततः प्रस्थितो वर्त्मनि नैका द्वीपान् विलोकयन् वासरनगरमेत्य ततः प्रयातः स्वं सदनं प्रत्यागमम् अनया च यात्रया समुपार्जितलक्षाधिकदीनारोऽहमिदं हर्म्यवरं दासा दासीश्च परः शता क्रीत्वाऽत्र प्रतिष्ठितोऽभवम्। विस्मृत्य चानुभूतपूर्वा समस्ता विपदः सुखोपभोगैकप्रवणोऽवसम्।''

= कृतारोहणः, पण्यविनिमयेन = तुल्यद्रव्यदानद्वारा द्रव्यान्तरग्रहणं विनिम तेन। संगृहीतचन्दनकर्पूरमरिचमुखतत्रत्यवस्तुनिचयः = चन्दनं कर्पूरं मरिचं मुखं प्रधानं = यस्य सः चन्दनकर्पूरमरिचमुखः, संगृहीतः = संङ्कलित चन्दनकर्पूरमरिचमुखः, तत्रत्यः = मिहिरमहीपतेः द्वीपोद्भवः, वस्तुनिचयः द्रव्यराशिः, येन सः। ततः = तस्मात्, द्वीपात्, प्रस्थितः = प्रयातः वर्त्मनि मार्गे, नैकान् = विविधान्, द्वीपान्, विलोकयन् = निरीक्षमाणः वासरनगरं एत्य आगत्य, निजम्, सदनं = गृहम्, प्रत्यागमम् = न्यवर्तयम्।

अनया च पूर्ववर्णितया, यात्रया = प्रवासेन, समुपार्जितलक्षाधिकदीना समुपार्जिताः = संपादिताः, लक्षाधिकाः, दीनाराः येन सः। दीनारः सुवर्णमुद्राविशेषः अहं, इदं, हर्म्यवरं = श्रेष्ठप्रासादम्, दासान् परःशताः = शतात् परे, शताधिक इत्यर्थः। दासीश्च, क्रीत्वा = क्रयं कृत्वा, अत्र = अस्मिन् विदामपुरे, प्रतिष्ठतोऽभव = प्रतिष्ठां, प्राप्तवान्। अनुभूतपूर्वा = पूर्वमनुभूताः, समस्ताः = सकलाः, विप = आपदः, विस्मृत्य, सुखोपभोगैकप्रवणः = आनन्दानुभवैकलीनः, अवसम् निवासं कृतवान्।

प्रसन्न हो गए और उन्होंने सादर प्रचुर धन समर्पित किया। मैं उनसे बिदा लेक उस जहाज पर फिर से सवार हो गया और विनिमय प्रणाली से चन्दन, क मरिच आदि वस्तुओं का संग्रह कर वहाँ से निकल पड़ा। वहाँ से मार्ग में अने द्वीपों का अवलोकन करते हुए वासरनगर आया। वहाँ से प्रस्यान कर अपने घ पहुँचा। इस यात्रा से मैंने लाखों दीनार (गिन्नी) अर्जित किए और उनके द्वा महाप्रासाद तथा सैकड़ों दास दासियों को खरीद कर यहाँ प्रतिष्ठापूर्वक रह लगा। इस समय पूर्वानुभूत समस्त आपत्तियों को भूलकर मैं अत्यन्त सुख व उपभोग कर रहा हूँ।"

इत्येवमुक्त्वा स सिन्धुवादो भूयः पानभोजनसङ्गीतप्रभृतिभिः कञ्चन कालमात्मानं विनोद्य सर्वांस्तान् समेतानतिथिवरान् विसृज्य शतं दीनारान् हितवादाय प्रदाय "भद्र! गृहाणैतत्किमप्यस्मत्प्रणयचिह्नम्। श्वः पुनरागम्यताम्। अहं भूयोऽप्यात्मवृत्तं श्रावयितास्मि" इत्युत्वा तं स्वगृहं गन्तुम् समनुमेने।

सानन्दो हितवादोऽन्येद्युर्विधृतविमलनववेषः पुनस्तद्गृहं गतस्तेन

इत्येवं = पूर्वोक्तरीत्या, उक्त्वा = कथयित्वा, सः सिंधुवादः, भूयः = पुनः, पानभोजनसङ्गीतप्रभृतिभिः पानं भोजनं सङ्गीतं च प्रभृतिः येषां तैः (विनोदैः) कञ्चन = स्वल्पं, कालं = समयम्, आत्मानं = स्वम्, विनोद्य = रंजयित्वा, सर्वांस्तान् समेतान् = एकत्रितान्, अतिथिवरान् = अभ्यागतश्रेष्ठान्, विसृज्य = विसर्जनं कृत्वा, शतं दीनारान् = शतसंख्याकान् सुवर्णमुद्राविशेषान्, हितवादाय = तन्नाम्ने भारवाहिने, प्रदाय = दत्वा, भद्र! एतत् किमपि, अस्मत्प्रणयचिन्हं मम = प्रेम्णः प्रतीकम्, गृहाण = स्वीकुरु। पुनः आगम्यताम्। अहं भूयोऽपि = पुनरपि, आत्मवृत्तांत = स्वयात्रावृत्तान्तम्, श्रावयिताऽस्मि = श्रावयिष्यामि। इति = एवम्, उक्त्वा = कथयित्वा, तं = हितवादम्, स्वगृहम् = निजगेहम्, गन्तुम् = प्रयातुम्, समनुमेने = अनुमतिं प्रदत्तवान्।

सानन्दः = हर्षपरिप्लुतः, हितवादः, अन्येद्युः = द्वितीयदिने, विधृतविमलनववेषः- विधृतः = धारितः, विमलः = स्वच्छः, नवः = नूतनः, वेषः = परिधानं येन सः। पुनः, तद्गृहम् = सिंदुवादगृहम्, गतः = प्राप्तः, तेन = सिंधुवादेन, स्निग्धया = प्रणयपूर्णया, दृशा = कटाक्षपातेन, स्वागतीकृतः = सम्मानितः, आत्मानं = स्वम्, कृतकृत्यं = सफलम्, अमन्यत = मन्यते स्म।

अथ = अनन्तरम्, अन्येषु = इतरेषु, सभ्यजनेषु = सभासत्सु, समुपस्थितेषु

यह कहकर सिंधुवाद ने पुनः पान, भोजन, संगीत आदि के द्वारा कुछ समय तक अपना मनोरंजन कर उन अतिथियों को बिदा कर सौ दीनार हितवाद को देते हुए उसने कहा–"महोदय! हमारा यह स्वल्प प्रेमोपहार आप स्वीकार करें। कल पुनः आइए। मैं पुनः आपको अपनी कहानी सुनाऊँगा। ऐसा कहकर उन्होंने उसे अपने घर जाने की अनुमति दी।

स्निग्धया दृशा स्वागतीकृतः कृतकृत्यमात्मानममन्यत।

अथ समुपस्थितेष्वन्येषु सभ्यजनेषु सिन्धुवादोब्रवीत्- अद्याहं मामकीं द्वितीयसिन्धुयात्रां प्रथमयात्राया अत्यधिकचमत्कारिणीमुपवर्णयिष्यामि। श्रूयताम्-

---

= समागतेषु, सिंधुवादः अब्रवीत् = अकथयत्–अहं = सिंधुवादः मामकीम्, द्वितीयसिंधुयात्राम्–द्वितीया या सिंधुयात्रा = समुद्रप्रवासः, ताम् प्रथमयात्राया अपि, अत्यधिकचमत्कारिणीम्-अत्यधिकां चमत्कारिणीम् = आश्चर्यकारिणीम् उपवर्णयिष्यामि = निवेदयिष्यामि। श्रूयताम्।

दूसरे दिन हितवाद आनन्द के साथ स्वच्छ वेषभूषा में पुनः उसके घर गया। स्नेहमयी दृष्टि से उसके द्वारा स्वागत किए जाने पर अपने को कृतकृत्य समझा।

पश्चात् सभासदों के उपस्थित होने पर सिंधुवाद ने उनसे कहा–"आज मैं आपको अपनी दूसरी समुद्री यात्रा की कहानी सुना रहा हूँ। जो पहली यात्रा से भी आश्चर्यकारक हैं। सुनिए–



द्वितीया सिन्धुयात्रा

"प्रथमयात्रोत्तरमिह विदामपुरेऽवशिष्टमायुः सानन्दं यापयितुम् कृतसङ्कल्पोऽपि कैश्चिद्दिनैर्निरुद्यमावस्थानेन परिक्लान्तो भूयोऽपि सिन्धुयात्रोत्सुकः पण्यवस्तूनि संगृह्य एकस्मिन् दिवसे प्रामाणिकैः कैश्चित् सार्थवाहैः सह प्रवहणमारुह्य यात्रायै निरगमम्।

'यात्रायै निरगमम्' इत्यन्वयः। प्रथमायात्रोत्तरम्-प्रथमा या यात्रा = सिंधुयात्रा, तस्याः उत्तरम् = अनन्तरम्, इह विदामपुरे, अवशिष्टम् = सावशेषम्, आयुः = वयः, सानन्दं = सहर्षम्, यापयितुम् = गमयितुम्, कृतसंकल्पोऽपि कृतः = विहितः, सङ्कल्पः = निश्चयः, येन अपि। कैश्चित् = कतिपयैः, दिनैः = दिवसैः, निरुद्यमावस्थानेन-निरुद्यमम् = निर्गतः उद्यमः यस्मात् तत् = उद्योगेन रहितं यत् अवस्थानं = वासः तेन। परिक्लान्तः = सर्वतः खिन्नः (अहं सिंधुवादः) भूयोऽपि = पुनरपि, सिंधुयात्रोत्सुकः-सिंधुयात्रायै = समद्रप्रवासं विधातुम्, उत्सुकः = उत्कण्ठितः, पण्यवस्तूनि = विक्रेयद्रव्याणि, संगृह्य = सङ्कलप्य, एकस्मिन् दिवसे = अन्यतमे दिने, प्रामाणिकैः = यथार्थप्रकृतिभिः, कैश्चित् = कतिपयैः, सार्थवाहैः = सामुद्रिकैः, सह = सार्द्धम्, प्रवहणं = समुद्रयानम्, आरुह्य, यात्रायै = समुद्रप्रवासं विधातुम्, निरगमम् = निर्गच्छम्।

दूसरी समुद्री यात्रा

मैंने यद्यपि पहली यात्रा के बाद ही विदामपुर में शेष जीवन आनन्दपूर्वक व्यतीत करने का संकल्प किया था, तथापि कुछ दिनों में ही बेकार बैठने के कारण थक गया और फिर से समुद्री यात्रा करने के लिए इच्छुक हो, विक्रेय वस्तुओं का संग्रह कर, एक दिन कुछ विश्वस्त समुद्री यात्रियों के साथ जहाज पर सवार हो यात्रा के लिए निकल पड़ा।

द्वीपाद् द्वीपं परिभ्रमन्तः सलाभं विनिमयेन पयण्जातं विक्रीणानाः वयमेकस्मिन् दिने द्वीपमेकं फलभारावनमितैर्महीरुहैः समाच्छन्नमपि नितरां निर्जनं संप्राप्नुम। अथास्मत्सहचरेषु वनस्थल्यां फलकुसुमावचयपरेषु सहानीतं किञ्चिदशनजातं गृहीत्वा घनच्छायस्य कस्यचित् स्त्रोतसस्तटभूमौ स्थितोऽहं भुक्त्वा पीत्वा चापनीतश्रमो निद्रापरवशोऽभवम्। प्रबुद्धश्च प्रवहणमनालोकयन् विस्मयाक्रान्तः सहचरवर्गमनिवष्यंस्तानप्राप्येतस्ततः

द्वीपाद् द्वीपं परिभ्रमन्तः = एकस्मात् जलवेष्टितप्रदेशात् अन्यं तथाविधं प्रदेशं विचरन्तः, सलाभं = लाभपूर्वकम्, विनिमयेन = वस्त्वन्तपरिवर्तनेन, पण्यजातं = विक्रेयवस्तुममूहम्, विक्रीणानाः = विक्रयं कुर्वाणाः, वयं = सार्थवाहाः एकस्मिन् दिने, फलभारावनमितैः–फलानां भारेण अवनमितैः = नम्रीभूतैः, महीरुहैः = वृक्षैः 'वृक्षो महीरुहः शाखी' त्यमरः समाच्छन्नम् = अत्यन्तं संकुलमपि नितराम् = अत्यन्तम्, निर्जनं = मनुष्यरहितम् एकं द्वीपम् सम्प्राप्नुम = समागतवन्तः अथ अस्मत्सहचरेषु = अस्माकं सहयात्रिषु, वनस्थल्याम् = अरण्यभूमौ फलकुसुमावचयपरेषु = फलानां कुसुमानां च अवचये = सञ्चये, परेषु = लग्नेषु सत्सु, सह आनीतं किञ्चित् = स्तोकम् अशनजातं, गृहीत्वा = आनीय घनच्छायस्य घना = सान्द्रा, छाया = अनातपः, 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः, इत्यमरः।' यस्य तत् तस्य, कस्यचित्, स्त्रोतसः = निर्झरस्य तटभूमौ = तीरप्रदेशे, स्थितः = वर्तमानः, अहं = सिंधुवादः, भुक्त्वा पीत्वा च = भोजनं जलपानं च कृत्वा, अपनीतश्रमः = दूरीकृतपरिश्रमः, निद्रापरवशः

एक द्वीप से दूसरे घूमते हुए, लाभ के साथ विनिमय द्वारा विक्रेय वस्तुओं को बेच कर हम लोग एक दिन ऐसे प्रदेश में आ पहुँचे जो फलों के बोझ से झुके हुए वृक्षों से घिरा होने पर भी अत्यन्त निर्जन था। पश्चात् जब मेरे मित्र उस अरण्य भूमि में फलफूल आदि बटोरने में लगे तो उस समय साथ में लाई हुई कुछ खाद्यसामग्री को लेकर छायादार झरने के किनारे बैठा हुआ मैं खा पीकर अपनी थकावट दूर करते हुए वहाँ सो गया। जागने के बाद उस जहाज को न देखकर आश्चर्यचकित होकर अपने सहयात्रियों को खोजने लगा और उन्हें न पाकर इधर-उधर देखते हुए मैंने बहुत दूर अत्यन्त बेग से बहने वाले उस जहाज

परिपश्यन् विदूरे महता वेगेनापसर्पत्तत्प्रवहणमद्राक्षम्। क्रमशश्चैतददृश्यतां गतमभिवीक्ष्य निराशतामगच्छम्।

ईदृशीं विषमां दशामनुप्रपन्नोऽवसितजीविताशः शुचा तारस्वरेण क्रन्दन् शिरस्ताडयन् शङ्काशताकुल आत्मानं मुहुर्मुहुरेतद्यात्राचापलाय विनिन्दन् कर्तव्यमूढः कञ्चन वृक्षमारुह्य सर्वतः पश्यन्नुपरि महाकाशमधश्च महासिन्धुमन्तरेण च न किमपि दृष्टिपथं नयन्, आराद्रोधसि स्थितं

अभवम् = अस्वाप्सम्, प्रवुद्धश्च–जागृतश्च, प्रवहणं = समुद्रयानम् अनालोकयन्, विस्मयाक्रान्तः = आश्चर्यचकितः, सहचरवर्गं = सहयात्रिणां समूहम्, अन्विष्यन् तान् = सहचरान् अप्राप्य, इतस्ततः परिपश्यन् = निरीक्षमाणः, विदूरे = अत्यन्तं दूरे, महता वेगेन = अतिजवेन, अपसर्पत् = दूरीभवत्, तत् प्रवहणम् अद्राक्षम् = अवालोकयम्। क्रमशश्च शनैः शनैः, अदृश्यतां = दृशोः अविषयतां गतं (तत् प्रवहणम्) अभिवीक्ष्य = दृष्ट्वा, निराशतां = नैराश्यम्,अगच्छम् =प्राप्तवान्।

ईदृशीं विषमां = कठिनां दुस्तरां, दशाम् = अवस्थाम्, अनुप्रपन्नः = सम्प्राप्तः, अवसितजीविताशः–अवसिता = समाप्ता, जीवितस्य = आयुषः, आशा = सम्भावना यस्य, शुचा = शोकेन, तारस्वरेण = उच्चैः, क्रन्दन् = आक्रोशं कुर्वन्, शिरः = मस्तकम्, ताडयन्, शङ्काशताकुलः–शंकानाम् = सन्देहानाम् शतैः आकुलः = व्याप्तः, मुहूर्मुहुः = वारं वारम्, एतद्यात्राचापलाय–एतस्याः यात्रायाः चापलाय = इदं समुद्रप्रवासञ्चाचल्यं विधातुम्, आत्मानं = स्वम्, विनिन्दन् = तिरस्कुर्वन्, कर्त्तव्यमूढः = किंकर्तव्यशून्यः, कञ्चन वृक्षम् आरुह्य, सर्वतः = सर्वासु दिक्षु, पश्यन् = अवलोकयन्, उपरि महाकाशम्, अधश्च = नीचैश्च, महासिंधुं = विशालसमुद्रम् अन्तरेण = विना, 'पृथग् विनाऽन्तरेणर्ते' इत्यमरः। किमपि = अन्यत्, दृष्टिपथं, न नयन् = अपश्यन्, आरात् = समीपे,

---

को देखा। क्रमशः उस जहाज को आँखों से ओझल होता देखकर मैं निराश हो गया।

इस कठिन परिस्थिति में पहुँचकर मैं जीवन से निराश हो गया और शोक से उच्च स्वर में आक्रोश करते हुए सिर पटकने लगा। उस समय मैं सैकड़ों शंकाओं से घिरा था और बारंबार इस यात्रा की चपलता के लिए अपने को

किमप्यवदातं वस्तु निरीक्ष्य तरोरवतीर्णो गृहीताशनजातशेषः किमेतदि बुभुत्सुस्तत्सकाशमुपासरम्। उपसृत्य च हस्तशतप्रमाणमतिमसृणत दुरारोहं किमपि वस्तु समालोकयम्।

अथास्ताभिमुखे भगवति भास्वति दुर्दिन इव सहसा तमोव्याप दिशो भयमुदपादयन्। अकस्माच्च मदभिमुखं सवेगमापतन्तमति- महापरिणाहं पक्षिविशेषमवलोक्य विस्मितोऽभवम्। पूर्वं पोतवाहेभ्य श्रुतैतादृशमहाशकुन्तवृत्तान्तोऽहं तदवदातं वस्तु तस्यैवाण्डं निरधारय

रोधसि = तटे, स्थितं = वर्तमानम्, किमपि अवदातं = गौरम्, 'अवदातः सि गौरः' इत्यमरः। वस्तु = पदार्थम्, निरीक्ष्य = दृष्ट्वा, तरोः = वृक्षात्, अवती = कृतावरोहणः, गृहीताशनजातशेषः, गृहीतं = भुक्तम्, अशनजातशेषम् = अवशि भोज्यसामग्री येन सः। तत् = इदम्, किम्? इति = इत्थम्,बुभुत्सुः = बोद्धुमिच्छु तत्सकाशं = तस्य वस्तुनः सकाशं = समीपम्, उपासरम् = अग्रेऽभव उपसृत्य = अग्रे भूत्वा च हस्तशतप्रमाणं–हस्तानां शतं प्रमाणं = परिमाणः य तत्, अतिमसृणतया = अत्यन्तचिक्कणतया, दुरारोहं–दुःखेन= कष्टेन, आरो शक्यम्, किमपि = अदृष्टपूर्वम्, वस्तु = पदार्थम् समालोकयम् = अपश्यम्।

अथ = अनन्तरम्, भगवति भास्वति = सूर्यनारायणे, अस्ताभिमुखे = अ गच्छति सति, दुर्दिन इव = मेघाच्छन्नदिवस इव, 'मेघाच्छन्नेऽह्नि दुर्दिनम्' इत्यमर सहसा = अकश्मात्, तमोव्याप्ताः-तमोभिः = अन्धकारैः, व्याप्ताः = आच्छादित दिशः, भयं = भीतिम्, उपपादयन् = उत्पादयन्ति स्म। अकस्मांच्च मदभिसुखं मम सम्मुखम्, सवेगं = वेगपूर्वकम् आपतन्तम् = आगच्छन्तम् अतिमहापरिण

कोस रहा था। किंकर्तव्यविमूढ़ हो मैं एक वृक्ष पर चढ़कर चारों ओर देखते हु ऊपर की ओर विशाल आकाश और नीचे की ओर महासमुद्र को छोड़कर कु भी न देख सका। पास में ही किनारे पर किसी सफेद वस्तु को देखकर, वृक्ष उतर कर अवशिष्ट खाद्य सामग्री खाकर 'यह कौन-सी वस्तु है' इस प्रकार देकने की इच्छा से उसके पास पहुँचा। पहुँचकर एक ऐसी वस्तु देखी जो सौ ह की थी तथा फिसलन-भरी होने कारण उस पर चढ़ना कठिन था।

पश्चात् जब सूर्यनारायण अस्ताचल चले गये तब दुर्दिन के समान अकस्म

कियत्या च कालकलया विटपिस्कन्धविशङ्कटनखपञ्जरः स महाशकुन्तस्तस्मिन्नण्डे समुपाविशत्। क्षणाच्च निद्रयाऽपाह्रियत। अहं शनैस्तमुपगत्य स्वशिरःस्थचीरपट्टिकयाऽऽत्मानं तन्नखपञ्जरेऽबध्नाम्। 'कदाचित् प्रभात आहारान्वेषणायोत्पतिष्यतोऽस्य साहाय्येनास्मादतिनिर्जनात् स्थानाद्विनिर्मुक्तो भवेयम्' इति चेतसाऽऽशासानः प्रभातं प्रतीक्षमाणो निशीथिनीं तां तथैवाऽस्थाम्। प्रत्यूषे च वस्तुतस्तेन शकुन्तप्रकाण्डेन सवेगमदृष्टभूमिभागे

= विशालतमम्, पक्षिविशेषम्, अवलोक्य = दृष्ट्वा, विस्मितः = साश्चर्यः, अभवम्। पूर्वपोतवाहेभ्यः = नाविकेभ्यः, श्रुतैतादृशमहाशकुन्तवृत्तान्तः–श्रुतः = आकर्णितः, एतादृशः = ईदृशः, महाशकुन्तस्य = विशालपक्षिणः, वृत्तान्तः = वार्ता येन सोऽहं सिंधुवादः, तत् अवदातं = धवलम्, वस्तु = पदार्थम्, तस्यैव = पक्षिविशेषस्यैव, अण्डम्, निरधारयम् = निश्चयं कृतवान्! कियत्या च कालकलया = कतिपयक्षणैः विटपिस्कन्धविशंकट नखपंजरः-विटपिनां = वृक्षाणाम् स्कन्धाः = शाखा इव, विशंकटः = विशालः, विशंकटं पृथु बृहद् विशालम्- इत्यमरः। नखपजरः यस्य सः। सः पूर्वोक्तः, महाशकुन्तः = विशालपक्षी, तस्मिन्नण्डे, समुपाविशत् = उपविशति स्म। क्षणाच्च = तत्कालमेव च निद्रया = सुषुप्त्यवस्थया, अपाह्रियत = अस्वपदित्यर्थः। अहं = सिंधुवादः, शनैः, तं = पक्षिविशेषम् उपगत्य = प्राप्य, स्वशिरःस्थचीरपट्टिकया–स्वस्य = आत्मनः, शिरसि = मस्तके तिष्ठतीति तथाविधया चीरपट्टिका = वस्त्रखण्डः, तया। आत्मानं = स्वं तन्नखपंजरे = तस्य पक्षिविशेषस्य नखपंजरे, अबध्नाम्, कदाचित्

अन्धकार से भरी हुई दिशायें भय उत्पन्न करने लगी। अकस्मात् मेरी ओर वेगपूर्वक आनेवाले अत्यन्त विशाल पक्षी को देखकर मैं आश्चर्यचकित हो गया। पहले मैंने नाविकों से इस प्रकार के विशाल पक्षी की कहानी सुनी थी। अतः मैंने यह निर्णय कर लिया कि यह सफेद वस्तु उसी का अण्डा हैं। कुछ क्षण में यह विशाल पक्षी वृक्षशाखाओं के समान विशाल नख पंजर रखते हुए उस अण्डे पर बैठ गया और थोड़ी देर में सो गया। मैंने धीरे-धीरे उसके पास आकर अपनी पगड़ी के वस्त्रखण्ड द्वारा स्वयं को उसके पंजे में बाधाँ कि "कदाचित् प्रातःकाल भोजन के लिए उड़नेवाले उसकी सहायता से इस निर्जन

नभसि समुह्यमानो निश्चेतन इवाभवम्। अथावतीर्णमात्रः स सपदि कर्तितात्मबन्धने मयि सहसा दृष्टमाशीविषमेकमत्यायतं समाक्रम्य चञ्चूपुटेनोद्वहन्नदृश्यतामयासीत्।

अहं तु क्वचिदुपत्यकायामभितो गगनभेदिशृङ्गैर्दुरधिरोहैः शिलोच्चयैः

= सम्भवतः, प्रभाते प्रातःकाले आहारान्वेषणाय-आहारस्य, अन्वेषणाय = भोजमन्वेष्टुं, उत्पतिष्यतः = उड्डयनं करिष्यतः, अस्य = पक्षिणः, साहाय्येन = सहयोगेन, अस्मात् अतिनिर्जनात्, स्थानात् प्रदेशात्, विनिर्मुक्तः बन्धनरहितः भवेयम् = स्याम् इति एवम्, चेतसा = मनसा, आशासानः = आशां कुर्वाणः प्रभातं = प्रातःकालम्, प्रतीक्षमाणः = प्रतीक्षां कुर्वन्, तां निशीथिनीं = तां रात्रिं तथैव = तेनैव प्रकारेण, जाग्रदवस्थया एवेति यावत्। अस्थाम् = स्थितवान् प्रत्यूषे च = उषःकाले च, 'उषः प्रत्युषसी अपीत्यमरः।' वस्तुतः = यथार्थमेव, तेन शकुन्तप्रकाण्डेन = विशालपक्षिणा, सवेगं = वेगपूर्वकं अदृष्टभूमिभागे = अनवलोकित प्रदेशे, नभसि = आकाशे, समुह्यमानः = धार्यमाणः निश्चेतन इव = प्रायः चेतनाशून्यः, अभवम् = अवर्ते। अथ = पश्चात् अवतीर्णमात्रः = विहितावरोहण एव। सः = पक्षी, सपदि = तत्कालम्, मयि = सिन्धुवादे, कर्तितात्मबन्धने–कर्तितानि = विच्छेदितानि, आत्मनः = स्वस्य बन्धनानि = स्वशिरःस्थचीरपट्टिकाबन्धनानि येन एवम्भूते सति, सहसा = अकस्मात्, दृष्टम् = अवलोकितम्, एकम् = अन्यतमम्, अत्यायतं = महाप्रमाणम् आशीविषम् = अजगरम्, समाक्रम्य = आक्रमणं विधाय, चञ्चुपुटेन, उद्वहन् धारयन् अदृश्यताम् = अप्रत्यक्षताम्, अयासीत् = अगमत्।

अहं तु = सिन्धुवादः, क्वचित् = कुत्रचित्, उपत्यकायाम् = पर्वतसमीपस्थायां

स्थान से छुटकारा पा जाऊँ।" मन में यह आशा रखते हुए प्रातःकाल की प्रतीक्षा करते हुए मैंने उस रात्रि को उसी प्रकार व्यतीत किया। प्रभात के समय वस्तुतः उस पक्षी के द्वारा वेगपूर्वक आकाशमार्ग से अदृश्य प्रदेश की ओर ले जाया जाता हुआ मैं अचेत सा हो गया। उतरते ही जब मैंने अपने बन्धन तत्काल काट लिए तब अकस्मात् उसने एक विशाल सर्प को अपनी चोंच से पकड़ा और उड़ चला।

परिवृतायामशक्यनिर्गमनायामेकाकी पतितस्तया देशान्तरपरिवृत्या न मनाक् प्रसन्नः केवलं भागधेयमात्मीयमाक्रोशन् कञ्चित्कालं स्तम्भितमतिरतिष्ठम्।

अथोत्थितोऽहमितस्ततः परिक्रामंस्तं प्रदेशमतिस्थूलप्रमाणैरसमसुषमैर्हीरकनिकरैर्व्याकीर्णं साश्चर्यमवालोकयम्। तांश्च सकौतुकं निर्वर्णयन्नदूरे दन्तावलनिगरणपर्याप्तायामिमुखकन्दराननतिपृथून् परः-

---

भूमौ, 'उपत्यकाद्रेरासन्ना भूमि' रित्यमरः। तां विशिनष्टि–अभितः = सर्वतः, गगनभेदिश्रृङ्गैः–गगनभेदीनि = आकाशं भिन्दन्ति, यानि श्रृङ्गाणि = शिखराणि, तैः, दुरधिरोहैः–दुःखेन अधिरोढुं शक्यैः, शिलोच्चयैः = पाषाणखण्डैः, परिवृतायां = वेष्टितायाम्, अशक्यनिर्गमनायाम्–अशक्यं = कठिनम्, निर्गमनम् = प्रयाणं, यस्याः तस्याम्। एकाकी = अद्वितीयः, पतितः = स्खलितः, देशांतरपरिवृत्या अन्यो देशः देशांतरम् तस्य परिवृत्तिः = परिवर्तनम्, तया, मनाक् = ईषदपि न, प्रसन्नः = न प्रमुदितः, केवलम् आत्मीयम् = निजम्, भागधेयं = दुर्दैवम्, आक्रोशन् = विलपन्, कञ्चित्कालं = कतिपयसमयं, स्तम्भितमतिः–स्तम्भिता = कुण्ठिता, मतिः = वुद्धिः, यस्य सः। अतिष्ठम् = स्थितः।

अथ = पश्चात्, उत्थितः = उत्तिष्ठमानः, अहम् इतस्ततः, परिक्रामन् = परिभ्रमन् अतिस्थूलप्रमाणैः–अतिस्थूलं = विशालतमं, प्रमाणं = परिमाणः, येषां तैः असमसुषमैः–असमा = अनुपमा, सुषमा = शोभा, 'सुषमा परमा शोभे' त्यमरः। येषां तैः, हीरकनिकरैः = हीरकराशिभिः, व्याकीर्णम् = आच्छादितं, तं

मैं तो अकेले ऐसे घाटी में पड़ा हुआ था जो चारों ओर, कठिनता से आरोहण योग्य गगनचुम्बी शिखरों और चट्टानों से घिरी हुई थी तथा उसमें से निकलना कठिन था। मैं उस यात्रा से जरा भी प्रसन्न नहीं था और अपने भाग्य को कोस रहा था। कुछ समय तक कुण्ठित बुद्धि होकर बैठा रहा।

पश्चात् उठ कर मैंने इधर-उधर घूमते हुए आश्चर्यपूर्वक देखा कि वह प्रदेश अत्यन्त बड़े-बड़े हीरों के समूहों से पटा हुआ है। उनको आश्चर्यपूर्वक देखते हुए पास में ही सैकड़ों विशाल अजगरों को देखकर मैं भयपरवश हो गया।

गुफाओं के समान जिनके जबड़े इतने लम्बे चौड़े थे जिनमें कि हाथी

शतानजगरान् विलोक्य साध्वसाधीनोऽभवम्। ते ह्यज
पूर्वोपवर्णिततत्सहजवैरिपतत्रिभयविह्वला दिवसं गिरिकन्दरासु नि
अन्धकारावतारे ततो निष्क्रामन्ति। अहं तस्यामुपत्यकायां
यथावसरं विश्राम्यन् सकलं तं दिवसमयापयम्। अस्तङ्गते च
किञ्चिद्देवखातमुपलभ्य शिलयैकया पिहिततत्सङ्कुचितद्वारः सर्प

प्रदेशम् = उपत्यकाभूमिम्, साश्चर्यम् = सविस्मयम्, अवालोकयम् = अप
ताश्च = हीरकनिकरान्, सकौतुकम् = औत्सुक्यपूर्वकम्, निर्वर्णयन् = निरीक्ष
अदूरे = समीप एव दन्तावलनिगरणपर्याप्तायामिमुखकन्दरान्–दन्तावलाः = ह
'दन्ती दन्तावले हस्ती' त्यमरः। तेषां, निगरणाय = भक्षणाय, पर्याप्त
सावकाशाः आयामाः दैर्ध्याणि येषां तथाविधानि मुखानि = वदनानि एव कं
गुहाः येषां तानित्युपमालंकारः। अतिपृथून् = अतिविशालान्, परःशता
शताधिकान्, अजगरान्, विलोक्य = दृष्ट्वा, साध्वसाधीनः = भयपरवशः, अ
अजगरान् वर्णयति ते हि अजगराः पूर्वोवर्णिततत्सहजवैरिपतत्रिभयविह्व
पूर्वम् उपवर्णिताः, तेषां सहजवैरिणः = स्वाभाविकशत्रवः, ये पतत्रिणः = प
तेषां भयेन = भीत्या, विह्वलाः, दिवसम्, गिरिकन्दरासु = पर्वतगुहासु, नि
= कृतात्मगोपना अंधकारावतारे = अन्धकारे सञ्जाते, ततः ता
गिरिकन्दराभ्यः, निष्क्रामन्ति = निर्गच्छन्ति। अहं = सिंधुवादः, तस
पूर्ववर्णितायाम्, उपत्यकायां = पर्वतासन्नभूमौ, भ्रमन् = विचरन्, यथाव
यथाकालम्, विश्राम्यन् = विश्रामं कुर्वन्, सकलं = सम्पूर्णं, तं दिवसं =
अयापयम् = अहापयम्। रवौ = सूर्ये च, अस्तङ्गते, किञ्चित् देवख
कांचन गुहाम्, 'देवखातबिले गृहे, इत्यमरः। उपलभ्य, एकया = अन्य
शिलया = पाषाणेन, पिहिततत्सङ्कुचितद्वारः–पिहितम् = आच्छादितम्

निगलने का भी पर्याप्त स्थान था।

वे अजगर पूर्ववर्णित उनके सहज शत्रु (गरूड़) पक्षियों के भय से
होकर दिन में पहाड़ी गुफाओं में छिपे रहते थे और अन्धेरा होने पर
बाहर निकलते थे। मैंने उस घाटी से निकलते हुए और अवसर पाकर
करते हुए पूरा एक दिन व्यतीत किया। सूर्य के अस्ताचल चले जाने

कथञ्चिदात्मानं सुरक्षितं मन्यमानः सहानीतं किञ्चिद्भोज्यं भुक्त्वाऽऽ-शीविषफूत्कारजनितसाध्वसोद्वेगो जाग्रदेव कथमपि तां निशामनैषम्।
उदिते च भगवति दिनकृति विनिर्गतेषु च तेषु कालसर्पेषु सातङ्को हीरकखण्डेषु परिभ्रमन्नपि तानि ग्रहीतुमनुदितोत्साहलेशो रात्रिजागरेण भृशं क्लान्त एकस्यां शिलायां पतित्वा निद्रितो मत्सविधे पतितो महतो मांसखण्डस्य तारशब्देन प्रबुद्धो गिरितटेभ्यः पतन्ति बहून्यपराणि

= देवखातस्य, संकुचितं संकीर्णं द्वारं येन सः, सर्पभयात् = अजगराणां भीतेः, आत्मानं = स्वं कथचित् = केनचित् प्रकारेण, सुरक्षितं मन्यमानः, सह = सार्द्धम्, आनीतं किंचित् भोज्यं = खाद्यं भुक्त्वा = खादित्वा, आशीविषफूत्कारजनित-साध्वसोद्वेगः आशीविषाणाम् = अज गराणां फूत्कारैः, जनितः = उत्पन्नः, साध्वसं = भयम्, तस्य उद्वेगः = व्याकुलता च यस्य सः (सिंधुवादः) जाग्रदेव = प्रबुद्ध एव, कथमपि, यथाकथञ्चन, तां निशां = रात्रिम्, अनैशम् = व्यपनयम्।
भगवति दिनकृति च = सूर्ये, उदिते = उदयं प्राप्ते, तेषु = कालसर्पेषु, च = अजगरेषु, विनिर्गतेषु = प्रयातेषु, सातंकः = भयभीतः, हीरकखंण्डेषु, परिभ्रन्नपि = विचरन्नपि, तानि = हीरकाणि, ग्रहीतुम् = आदातुम् अनुदितोत्साहलेशः-अनुदितः = नोद्गतः, उत्साहस्य = चित्तवृत्तिविशेषस्य लेशः यस्य सः, रात्रिजागरेण = रात्रौ प्रबोधेन, भृशम् = अत्यन्तं, क्लान्तः = म्लानः, एकस्यां शिलायाम् = अन्यतमे प्रस्तरखण्डे, पतित्वा = शयानः, निद्रितः = सुप्तः, मत्सविधे = मम पार्श्वे, पततः = पतितस्य, महतः = पृथुलस्य, मांसखण्डस्य = अमिषच्छेदस्य, तारशब्देन = उच्चनादेन, प्रबुद्धः = जागृतः, गिरितटेभ्यः = पर्वततटेभ्यः, पतन्तिं

एक गुफा देखी। एक चट्टान से उस (गुफा) के द्वार को ढँकते हुए, अजगरों के भय से किसी प्रकार अपने को सुरक्षित समझते हुए, साथ में लाई हुई भोज्य-सामग्री को खाकर अजगरों की फुंकार से उद्विग्न होकर मैंने जागते हुए वह रात किसी प्रकार व्यतीत की।

सूर्योदय होने पर और उन काल-सर्पों के चले जाने पर भयभीत होकर उन हीरे की चट्टानों पर घूमते हुए भी मेरे मन में उन्हें उठाने का जरा भी उत्साह नहीं था। रात में जागने के कारण मैं थक गया था। अतः एक चट्टान पर चढ़कर मैं

मांसखण्डानि पश्यन् विस्मित आसम्।

पूर्वं नाविकगणैर्वर्णितायां हीरकोपत्यकायामत्र च वणिग्जनैर्हीरक
सम्पादनायाऽऽश्रियमाणे चित्रेऽभ्युपाये अश्रद्धालुरभवम्। स उप
यथा वणिजो हि साहसिनोऽभितो गिरीन् समधिरुह्य ततो मांसखण्डा
उपत्यकायां निपात्य संसक्तानेकहीरकखण्डेभ्यस्तेभ्यो महागृध्रैः सन्निप

= अध आगच्छन्ति, बहूनि = प्रचुराणि अपराणि = अन्यानि, मांसखण्ड
पश्यन् = अवलोकयन्, विस्मित = अश्चर्यान्वितः, आसम् = अभूवम्।

पूर्वं नाविकणगैः = पोतवाहैः वर्णितायां हीरकोपत्यकायाम् = हीरकप्रचु
पर्वतासन्नभूमौ, अत्र च = अस्यां च हीरकसंपादनाय = हीरकाणि अर्जयि
आश्रियमाणे = अवलम्ब्यमाने, चित्रे = विस्मयकारिणि, अभ्युपाये = उप
आश्रद्धालुः = श्रद्धारहितः विश्वासरहित इत्यर्थः अभवम्। तमुपायं वर्णयति
= यथा हि = यस्मात् कारणात्, साहसिनः = साहससंयुक्ताः, वणिजः = व्यापारि
अभितः = सर्वतः, गिरीन् = पर्वतान्, समधिरुह्य = आरुह्य, ततः = तदनन्त
तेभ्यः = गिरिभ्यः, मांसखण्डानि, अधः उपत्यकायां, निपात्य = पातयि
संसक्तानेकहीरखण्डेभ्यः संसक्तानि = संलग्नानि, अनेकानि, हीरकण्डानि
तानि एवम्भूतेभ्यः, महागृध्रैः = विशालगृध्रपक्षिभिः, निपत्य = उत्पत्य, गिरितट
= पर्वततट स्थितान्, कुलायान् = नीडान् 'कुलायो नीडमस्त्रियाम्' इत्य
नीतेभ्यः तेभ्यः = मासंखण्डेभ्यः, ततः, पश्चात्, कोलाहलेन = कलकलनिना
तान्=महागृध्रान्, विद्राव्य=उड्डयनं कारयित्वा, हीरकखण्डानि,आत्मसात्कुर्व

सो गया और पास में ही विशाल मांसखण्ड के गिरने के शब्द से मैं जाग गया। पहाड़ी चढ़
से दूसरे मांसखण्डों भी गिरते हुए देखकर मैं आश्चर्यचकित हो गया।

पहले जहाजी यात्रियों ने इस हीरे की घाटी का वर्णन किया था
व्यापारियों द्वारा हीरों को प्राप्त करने के लिए किया जाने वाले विचित्र उपाय
मैं सुन चुका था। उसके प्रति मेरे मन में जरा भी विश्वास नहीं था। वह उ
यह है कि–साहसी व्यापारी चारों ओर से पहाड़ों पर चढ़कर वहाँ से इस घ
में मांसखण्डों को गिराते थे। उन मांसखण्ड़ों में अनेक हीरे चिपक जाते थे,
विशालगिद्ध उठाकर पहाड़ी किनारों के घोसलों की ओर ले जाते थे। उन्हें

गिरितटस्थान् कुलायान् नीतेभ्यस्तान् कोलाहलेन ततो विद्राव्य हीरकखण्डान्यात्मसात् कुर्वन्ति। तदेतत्सर्वमविश्वसन्नहं साम्प्रतं प्रत्यक्षीकुर्वन् संगृहीतस्थूलतमहीरकनिचय आत्मत्राणाय कैश्चिदतिपृथुलैर्मांसखण्डै-रात्मानमावेष्ट्य गृध्रपातं प्रतीक्षमाणो निश्चेष्टोऽपतम्।

अथापतिते तत्र गृध्रगण एकस्तेषु स्थविष्ठो मांसखण्डसमावेष्टितं मां चंच्वा विधृत्योपरि गिरिगतं स्वं नीडमनैषीत्। वणिजश्च कोलाहलं विदधुः। विद्राव्य च तां गृध्रं तत्र समेतास्ते मां तथाविधं विलोक्य

स्वायत्तीकुर्वन्ति। तदेतत् सर्वं = हीरकग्रहणोपायम्, अविश्वसन् = अश्रद्दधानः, सन् साम्प्रतं, प्रत्यक्षीकुर्वन् = दृशोर्विषयतां नयन्, संगृहीतस्थूलहीरकनिचयः-- संगृहीतः = समुपार्जितः स्थूलतमानां = महाप्रमाणानां हीरकाणां निचयः = राशिः येन सः, आत्मत्राणाय = स्वसंरक्षणाय, कैश्चित् = कतिपयैः, अतिपृथुलैः = विशालतमैः, मांसखण्डैः, आत्मानं = स्वम्, आवेष्ट्य = वेष्ट यित्वा, गृधपातम्= गृध्रानामाक्रमणं,प्रतीक्षमाणः = प्रतीक्षां कुर्वन् निश्चेष्टः = क्रियाकलापशून्यः,अपतम्।

अथ = अनन्तरं तत्र = हीरकोपत्यकायाम्, गृध्रगणे = गृध्राणां समूहे, आपतिते = समागते, तेषु = गृध्रेषु, स्थविष्ठः = अतिशयेन स्थूलः, एकः = अन्यतमो गृध्रः, मांसखण्डसमावेष्टितं = मांसखण्डे परिवृतं मां सिंधुवादम् चञ्च्वा = चञ्चूपुटेन, विधृत्य = सन्धार्य, गिरिगतं = पर्वतस्थं, स्वं नीडं = निजकुलायम् अनैषीत्=नयति स्म। वणिजश्च = व्यापारिणश्च, कोलाहलं, विदधुः = चक्रुः तं = गृध्रम् विद्राव्य = पलायनं कारयित्वा तत्र = तस्मिन्नीडे, समेताः = समुपागताः

में ही शोरगुल द्वारा उड़ाकर वे उन हीरों को आत्मसात् करते थे। इस सब बातों पर मैं जरा भी विश्वास नही करता था। परन्तु इस समय मैं उन्हें प्रत्यक्ष देख रहा था। मैंने आत्मरक्षा के लिए पहले कुछ बड़े हीरों को बटोरकर, उन एकत्रित विशालतम हीरों की राशि में अत्यन्त विशाल मांसखण्डों के द्वारा अपने को लपेट लिया तथा गिद्धोंके आने की प्रतीक्षा करता हुआ वहाँ निश्चेष्ट पड़ा रहा।

अनन्तर गिद्धों के झुण्ड के वहाँ आने पर उनमें से एक स्थूलकाय गिद्ध मांसखण्डों से लिपटे हुए मुझे चोंच द्वारा पकड़कर ऊपर पहाड़ में स्थित घोसले में ले गया। व्यापारियों ने वहाँ कोलाहल किया। उस गिद्ध को उड़ाकर जब वे

चकिता बभूवुः। मत्तश्च श्रुतनिखिलवृत्तान्तास्ते मद्धैर्यसाहसाध्यवसायांश्चिरं प्रसशंसुः।

अथ तैर्वणिग्जनैः स्वशिबिरं नीत्वाऽऽतिथ्येन सम्भावितस्तां क्षपां तैः सार्धमतिवाह्य मदीयपृथुलहीरकैर्विस्मितान्तरङ्गांस्तान् कैश्चन

ते = वणिजः मां सिंधुवादं तथाविधं = मांसखण्डैः परिवेष्टितम्, विलोक्य = दृष्ट्वा, चकिता बभूवुः = आश्चर्यमवाप्नुवम्। मत्तश्च = सिंधुवादात्, श्रुतनिखिलवृत्तान्ताः-श्रुतः = आकर्णितः, निखिलः = अद्यावधिकः, वृत्तान्तः = प्रवासवर्णनं यैस्ते, ते = व्यापारिणः, मद्धैर्यसाहसाध्यवसायान्-मम धैर्यं = धीरतां, साहसं, अध्यवसायम् = उद्योगं च, चिरं = बहुकालपर्यन्तं प्रशशंसुः।

अथ = पश्चात् तैः वणिग्जनैः = व्यापारिभिः स्वशिविरं = आत्मनः निवासभूमिम्, नीत्वा,आतिथ्येन सम्भावितः=विहितातिथित्कारः तां क्षपां = रात्रिं, तैः = वणिग्भिः, सार्धं = सह, अतिवाह्य = यापयित्वा, मदीयपृथुलहीरकैः-मदीयैः = मामकीनैः, पृथुलैः = विशालैः, हीरकैः, विस्मितान्तरङ्गान्-विस्मितं = साश्चर्यम्, अन्तरङ्गम् = चेतः, येषां तान्, तान् = वणिजः, कैश्चन = कतिपयैः हीरकोपहारैः = हीरकाणामुपायनैः, परितोष्य = सन्तोषं प्रदाय, तादृशातिघोरविपदः-तादृश्याः, अतिघोरायाः = भयावहायाः विपदः = आपत्तेः, अभिमुक्तये = मोचनाय, भगवन्तं = परमात्मानम्, अन्तः = चेतसि, स्तुवन् = कीर्तयन्, सूर्योदये = उदिते सूर्ये, तैः = व्यापारिभिः सह, ततः = तस्मात् स्थानात्, सम्प्रस्थितः = कृतप्रस्थानः, एकम् = अन्यतमं, पोतं = जलयानम्, आरुह्य=समधिरोहणं कृत्वा कर्पूरतरुभिः = कर्पूरवृक्षैः, पूरितं, घोणाग्रवर्तिपृथुश्रृङ्ग-बलात्-घोणाग्रवर्ति = नासाग्रे स्थितम्, 'घोणा नासा च नासिके' त्यमरः। पृथु

वहाँ एकत्र हुए तो उस अवस्था में मुझे देखकर उन्हें आश्चर्य हुआ। मेरे द्वारा सम्पूर्ण कहानी सुनकर उन्होंने मेरे धैर्य, साहस और उद्यम की बार-बार प्रशंसा की।

अनन्तर वे व्यापारी मुझे अपने शिविर में ले गए और मेरा यथोचित अतिथि सत्कार किया। मैंने वह रात उन यात्रियों के साथ बिताई। वे मेरे विशाल हीरों को देखकर आश्चर्यचकित हुए। उन्हें कुछ हीरे उपहार में देकर सन्तुष्ट करते

हीरकोपहारैः परितोष्य तादृशातिघोरविपदोऽभिमुक्तये भगवन्तमन्तःस्तुवन् सूर्योदये तैः सह ततः सम्प्रस्थितः सकुशलमासन्नस्थितां पोतावतारभुवं सम्प्राप्तः पोतमेकमारुह्य कपूरतरुभिः पूरितं घोणाग्रवर्तिपृथुशृङ्गबलात्करीन्द्रविदारणक्षेपणसमर्थैरनल्पैर्गण्डकैः समाकीर्णं रोहणं नाम द्वीपविशेषं पश्यन् कैश्चिद्धीरकाल्पखण्डैस्तद्द्वीपसुलभं वस्तुजातं संगृह्य कतिपयैर्दिवसैर्वासरपुरं ततश्च स्वनिवासभुवं विदामपुरं प्रत्यासदम्।

एवं सिन्धुवादः स्वां द्वितीयां सिन्धुयात्रामुपवर्ण्य हितवादाय पूर्ववच्छतं

उन्नतं यत् श्रृङ्गम् = विषाणं तस्य बलात् = सामर्थ्यात्। करीन्द्रविदारणक्षेपणसमर्थैः-करीन्द्राणां = गर्जराजानां, विदारणे = उत्पाटने, क्षेपणे च समर्थैः = शक्तिशालिभिः, अनल्पैः = बहुभिः, गण्डकैः = 'गेण्डा' पदवाच्यैः खड्गिभिः, 'गण्डके खड्गखड्गिनो' इत्यमरः। समाकीर्णं = समतात् व्याप्तं रोहणंनाम = तत्संज्ञकम्, द्वीपविशेषं, पश्यन् = अवलोकयन्, कैश्चित् = कतिपयैः, हीरकाल्पखण्डैः = हीरकाणाम् अल्पैः, खण्डैः, तद्द्वीपसुलभं = तस्मिन् द्वीपे सुलभं = प्राप्यम्, वस्तुजातं पदार्थसामग्रीम्, संगृह्य = सङ्कलय्य, कतिपयैः दिवसैः, वासरपुरं = समुद्रतट स्थितं नगरम्, (सम्प्राप्य), ततश्च = वासरपुरात् स्वनिवासभूमिं = निजिवासस्थनीम्, विदामपुरं = हारीतनृपतिराजधानीं प्रत्यासदम् = प्रतिनिवृत्तः।

एवम् = अनया रीत्या, सिंधुवादः स्वां = निजाम्, द्वितीयां, सिंधुयात्रां = समुद्रप्रवासम्, उपवर्ण्य = वर्णयित्वा, हितवादाय, पूर्ववत्, शतदीनारान् = सुवर्णमुद्राणां शतं, प्रदाय = समर्प्य, भूयोऽपि = पुनरपि, परे = द्वितीयस्मिन्, अहनि = दिने

हुए उस भयानक विपत्ति से छुटकारा पाने के लिए मन ही मन भगवान् की स्तुति कर, मैंने सूर्योदय होने पर उनके साथ प्रस्थान किया और सकुशल निकट स्थित बन्दरगाह पहुँचा गया। एक जहाज पर आरूढ़ होकर मैं उस रोहण द्वीप पर पहुँचा जो कपूर के वृक्षो तथा ऐसे गैंड़ों से भरा हुआ था जो अपने नाक के विशाल सींग की ताकत से हाथियों तक को चीर सकते थे। वहाँ से छोटे-छोटे हीरों से उस द्वीप में मिलनेवाली वस्तुओं को एकत्र कर थोड़े ही दिनों में वासरपुर पहुँच कर वहाँ से अपने निवासस्थान विदामपुर पहुँचा।

दीनारान् प्रदाय भूयोऽपि परेऽहनि भोक्तुम् तृतीययात्रावर्णनश्रवणेनात्मा विनोदयितुञ्च निमन्त्र्य सर्वैरतिथिभिः सह विससर्ज।

अन्येद्युश्च यथासमयं समुपस्थितेषु तेष्वभ्यागतेषु कृतभोजनेषु सिन्धुवा एवं स्वां तृतीययात्रां वर्णयितुमारेभे।

भोक्तुम् = भोजनं कर्तुम्, तृतीययात्रावर्णनश्रवणेन–तृतीयायाः यात्रायाः तृतीयसमुद्रप्रवासस्य, वर्णनस्य श्रवणेन = आकर्णनेन, आत्मानं = स्वं, विनोदयि = मनोरञ्जनं च कर्तुम्, निमन्त्र्य = निमन्त्रणं प्रदाय, सर्वैः = समस्तैः, अतिथि = अभ्यागतैः, सह = सार्धम् विससर्ज।

अन्येद्युश्च = द्वितीयस्मिन् दिने, तेषु अभ्यागतेषु = अथितिषु, यथासम यथावसरं समुपस्थितेषु = समुपागतेषु, कृतभोजनेषु = भोजनं कृतवत्सु, सिंधुवा एवम् = इत्थम् स्वां निजाम्, तृतीययात्रां = तृतीयं समुद्रप्रवासम्, वर्णयितुम् कथयितुम् आरेभे = उपचक्राम।

इस प्रकार सिंधुवाद ने हितवाद को अपनी दूसरी सिंधुयात्रा सुनाकर पूर्वव सौ दीनार देकर उसे पुनः दूसरे दिन भोजन के लिए निमन्त्रण देकर स अतिथियों के साथ उसे विदा किया।

दूसरे दिन सब अतिथियों के यथासमय उपस्थित होने और भोजन करने प सिंधुवाद अपनी तीसरी यात्रा का वृत्तांत इस प्रकार सुनाने लगा–



तृतीया सिन्धुयात्रा

तदनु सुखेन कालं यापयन् विस्मृतयात्राद्वयक्लेशभरः कुतूहलप्रचुरतया यौवनस्यालसगृहनिवासान्निर्विण्णोऽविगणितसिन्धुयात्रासुलभकष्टातिशयसम्भवः कैश्चिदिभ्यैः सभ्यैर्वणिग्जनैः सह भूयः प्रयातो वासरपुरमवाप्य पोताधिरूढोऽन्तरान्तरा मार्गपतितेषु द्वीपेषु सलाभं पण्यजातं विक्रीणानो दिवसगणसमाप्यां यात्रामुद्दिश्याऽवहम्।

तदनु = तत्पश्चात्, सुखेन = आनन्देन, कालं = समयं, यापयन् = हापयन्, विस्मृतयात्राद्वयक्लेसभरः विस्तृतः यात्रयोः = प्रथमद्वितीयसमुद्रप्रवासयोः, क्लेशभरः = कष्ट भारः येन सः। यौवनस्य = तारूण्यस्य, कुतूहलप्रचुरतया = अत्यधिकौत्सुक्येन, अलसगृहनिवासात् अलसः = आलस्यप्रचुरः, यः गृहे निवासः तस्माद्वेतोः, अविगणितसिंधुयात्रासुलभकष्यातिशयसम्भवः–अविगणितः = समुपेक्षितः, सिंधुयात्रयोः = द्वयोः समुद्रप्रवासयोः, कष्टातिशयस्य = अत्यन्तदुःखस्य, सम्भवः = उत्पत्तिः, येन सः। कैश्चित् = कतिपयैः, इभ्यैः = धनिभिः, इभ्यआढयो धनो स्वामी त्यमरः। सभ्यैः = सभायां सम्माननीयैः, वणिग्जनैः = व्यवसायिभिः, सह = साकम्, भूयः = पुनः, प्रयातः = निर्गतः, वासरपुरम् अवाप्य = आगत्य, पोताधिरूढः = प्रवहणम् आरूढः, अनन्तराऽन्तरा = मध्ये मध्येः, 'यथाऽन्तरेऽन्तरा अन्तरेण च मध्ये स्युः' इत्यमरः। मार्गपतितेषु = पथिस्थितेषु, द्वीपेषु, सलाभं = लाभपूर्वकम्, पण्यजातं = विक्रेयद्रव्यसमूहम्, विक्रीणानः = विक्रयं कुर्वाणः, दिवसगणसमाप्यां–दिवसानां गणैः समाप्यां = नैकदिनैः समापनयोग्यम्, यात्रां = समुद्रप्रवासम्, उद्दिश्य = उद्देशं विधाय, अवहम् = अग्रे प्रासर्पम्।

तीसरी समुद्री यात्रा

इसके बाद सुखपूर्वक समय बिताते हुए दोनों समुद्री यात्राओं के क्लेशों को भूलकर यौवनोचित उत्सुकता के कारण घर में निवास से खिन्न होकर समुद्री यात्राओं की विपत्तियों की परवाह न करते हुए मैं कतिपय धनी-मानी सभ्य व्यापारियों के साथ फिर से निकल पड़ा और वासरपुर पहुँचकर जहाज पर

एकस्मिन् दिवसे सिन्धुमध्ये प्रवहतोऽस्मान् सहसा समुद्भूतः कतिपयदिवसाननुस्यूतो भीष्मः प्रभञ्जन एकत्रान्तरीपे पोताध्यक्षेण परिहर्तुमिष्टेऽपि नियतेर्बलात्सरभसं समक्षिपत्। अथ संविग्नमनाः पोताध्यक्षोऽस्मानवादीत्-'इदमासन्नानि च कानिचिद् द्वीपान्तराणि हिंस्रवृत्तिभिः कैश्चनकचाचितशरीरैर्वन्यैर्जनैर्नरभक्षकैर्ह्रस्वाकृतिभिरप्यगण्यैरधिष्ठितानि इति।''

एकस्मिन् दिवसे, सहसा = अकस्मान्, समुद्भूतः = उत्पन्नः, कतिपयदिवसान् = कांश्चन दिनान्, अनुस्यूतः = अनुवर्तनशीलः, भीष्णः = भीषणः, 'दारुणं भीषणं भीष्मम्' इत्यमरः। प्रभञ्जनः = वात्याचक्रम्, सिन्धुमध्ये = समुद्रस्य अभ्यन्तरे, प्रवहतः = प्रयातान्, अस्मान् = यात्रिणः, एकत्र = एकस्मिन्, अन्तरीपे = द्वीपे, पोताध्यक्षेणः = प्रवहणकर्णधारेण, परिहर्तुम् = निराकर्तुम्, इष्टेऽपि = इच्छितेऽपि, नियतेः = भाग्यस्य 'भाग्य स्त्री नियतिर्विधिः' इत्यमरः। बलात् = प्रभावात्, सरभसं = वेगपूर्वकम्, समक्षिपत् = अपातयत्। अथ = अनन्तरं, संविग्नमनाः-संविग्न = समुद्विग्नं मनः यस्य सः, पोताध्यक्षः = नौकर्णधारः, अस्मान् = यात्रिणः अवादीत् = अकथयत्।

इदं = पुरोवर्तमानं (द्वीपम्) आसन्नानि = निकटवर्तीनि च कानिचित् = कतिपयानि, द्वीपान्तराणि = अन्यानि द्वीपानि, अगण्यैः = गणयितुमशक्यैः, हिंस्र वृत्तिभिः-हिंस्रा = घातुका, वृत्तिः = स्वाभावः, येषां तैः, कचाचितशरीरैः-कचैः = केशैः, 'कचः केशः शिरोरुहः इत्यमरः।' लोमभिरित्यर्थः। आचितानि = व्याप्तानि, शरीराणि येषां तैः, ह्रस्वाकृतिभिः-ह्रस्वाः आकृतयः येषां तथा-

सवार हो बीच-बीच में मार्ग में पड़नेवाले द्वीपों में लाभ के साथ विक्रेय वस्तुओं को बेचते हुए अनेक दिनों में समाप्त होने वाली यात्रा का उद्देश्य लेकर आगे बढ़ चला।

एक दिन समुद्र के बीच में अकस्मात् भयानक बवण्डर आ गया जो कुछ दिनों तक चलता रहा था। यद्यपि जहाज का अधिकारी एक द्वीप में हमें ले जाकर बवण्डर से बचाना चाहता था, तथापि उस बवण्डर ने प्रबल दुर्भाग्य के कारण आगे बढ़नेवाले हमलोगों को वेगपूर्वक फेंक दिया। अनन्तर उद्विग्न होकर

तदेतत्तस्य वचनं निशम्य भीता वयं तेन कथितमगणेयं घोराकृतिं वन्यमानुषव्रजमनुपदमेवास्मानुद्दिश्य त्वरयाऽऽगच्छन्तं दीर्घलोहित-लोमसच्छन्ननिखिलतनुपमश्याम। ते तु तीरमुपगम्य झटिति सिन्धौ क्षिप्तात्मानस्तरन्त उपसृत्य सर्वतोऽस्मत्प्रवहणं पर्यवेष्टयन् उच्चैः किमपि भाषमाणा अस्माभिरनवबुध्यमानभाषास्ते प्रवहणे रज्जुनिचयमलम्ब्य

विधैरपि। वामनैरपीति यावत्। नरभक्षकैः-मनुष्यभक्षिभिः, कैश्चन = कतिपयैः, वन्यैः = अरण्यवासिभिः, जनैः = मनुष्यैः, अधिष्ठितानि = व्याप्तानि इति।"

तदेतत् = पूर्वोक्तम्, तस्य पोताध्यक्षस्य, वचनं = वाक्यं, निशम्य = आकर्ण्य भीताः = भयाक्रान्ताः, वयं = यात्रिणः, तेन = पोताध्यक्षेण, यथाकथितं = कथानानुसारम्, अगणेयम् = असंख्येयं, घोराकृतिं–घोराः = भयंकराः, आकृतयो यस्य तम्। अनुपदमेव = अनन्तरमेव, अस्मान् = यात्रिणः उद्दिश्य, त्वरया = वेगेन, आगच्छन्तं = समायातं, दीर्घलोहितलोमसच्छन्ननिखिलतनुम् दीर्घाणि = आततानि, लोहितानि = रक्ताणि, यानि = लोमानि, तैः सच्छन्ना = आच्छादिता, निखिला = संपूर्णा, तनुः = शरीरं यस्य तम्। वन्यमानुषव्रजम्-वन्यानाम् = अरण्यवासिनां, मानुषाणां = मनुष्याणां, व्रजम् = समूहम्। अपश्याम = अद्राक्ष्म। ते तु = वन्यमानुषाः, तीरं = तटम्, उपगम्य = आगत्य, झटिति = तत्कालं, सिंधौ = समुद्रे, क्षिप्तात्मानः–क्षिप्तः = पातितः आत्मा यैः ते, तरन्तः = विहितसन्तरणः, उपसृत्य = समीपे आगत्य, सर्वतः सर्वाभ्यो दिग्भ्यः, अस्मत्प्रवहणम् = अस्माकं समुद्रयानम्, पर्यवेष्टयन् = परिवारितवन्तः। उच्चैः = तारस्वरेण,

जहाज के अधिकारी ने हमलोगों से कहा–

"यह निकटस्थ तथा कतिपय अन्य द्वीप उन अगणित हिंस्र जंगली मानवों से भरे हुए हैं, जिनके शरीर रोवेंदार हैं जो नरभक्षी और बौने हैं।"

उसकी इस बात को सुनकर हमलोग डर गए और हम लोगों ने देखा कि जैसा उसने वर्णन किया था उसी प्रकार भयानक आकृतिवाले अगणित वनमानुषों का समूह पीछे-पीछे ही हमलोगों की दिशा में वेग से आ रहा है और जिनका समस्त शरीर लम्बे लाल रोओं से ढँका हुआ है। वे किनारे पर आकर तत्काल समुद्र में कूद पड़े और तैरते हुए आगे बढ़कर उन्होंने चारों ओर से हमारे जहाज

पोतान्तरं प्राविशन्। बलाच्च प्रवहणं तीरमानीयास्माननिच्छतोऽपि रोधस्यवातारयन्।

एवं सिन्धुयात्राकुशलैः कैवर्तैर्दूरतः परिहृतप्रवेशेऽस्मिन् प्रदेशे नियत्या क्षिप्ता आत्मपरित्राणेऽक्षमास्तच्छन्दानुरोधेनताननुसरन्तो वर्त्मनि सुलभानि कानिचित्फलमूलानि प्राणसन्धारणाय भक्षयन्तश्च वयं कञ्चनाध्वानमतिक्रम्य कञ्चिन्महोत्सेधं विशालतोरणमायतबाह्याङ्गणप्रदेशं

किमपि = अव्यक्तम्, भाषमाणः = वदन्त, अस्माभिः = यात्रिभिः, अनवबुध्यमानभाषाः–अनवबुध्यमाना = अवेद्या, भाषा येषां ते तथोक्ताः।

ते = वन्यमानुषाः, प्रवहणे = जलयाने, रज्जुनिचयम् = रज्जुपाशम्, अवलम्ब = आश्रित्य, पोतांतरं = जलयानमध्ये, प्राविसन् = प्रवेशमकुर्वन्। बलाच्च = हठपूर्वकं च, प्रवहणं = जलयानं, तीरं = कूलम् आनीय, अनिच्छतः अस्मान् = यात्रिण, रोधसि = तटे, अवातारयन् = अवतारयन्ति स्म।

एवम् = अनेन प्रकारेण, सिंधुयात्राकुशलैः = समुद्रप्रवासेषु चतुरैः, कैवर्तैः = धीवरैः 'कैवर्ते दाशधीवरौ' इत्यमरः। परिहृतप्रवेशे–परिहृतः = परित्यक्तः प्रवेशे = आगमनं यस्मिन् तस्मिन्, अस्मिन् = एतस्मिन्, प्रदेशे = द्वीपभूमौ नियत्या = भाग्येन, क्षिप्ताः = पातिताः, आत्मपरित्राणे = स्वसंरक्षणे, अक्षमाः = असमर्था, तच्छन्दानुरोधेन तेषां = वन्यमानुषाणां, छन्दस्य = अभिप्रयास्य, 'अभिप्रायच्छन्द आशयः' इत्यमरः अनुरोधेन तान् = वन्यमानुषान्, अनुसरन्तः = अनुगच्छन्तः, वर्त्मनि = मार्ग, सुलभानि = प्राप्याणि, कानिचिद्-कतिपयानि, फलमूलानि =

को घेर लिया। वे जोर से कुछ बोलते थे जिसे हम लोग समझ नहीं पा रहे थे। वे जहाज की रस्सियों के सहारे जहाज में घुस गये और जबरदस्ती उस जहाज को किनारे लाकर न चाहते हुए भी हमें किनारे पर उतार दिया।

इस प्रकार हमलोग भाग्यवश ऐसे प्रदेश में लाकर फेंके गए, जहाँ कुशल समुद्री नाविक भी दूर से ही प्रवेश का परित्याग करते थे। वहाँ हमलोग आत्मरक्षा में असमर्थ थे। उनका अनुसरण करते हुए मार्ग में सुलभ कतिपय कन्दमूलों फलों को प्राणधारण के लिए खाते हुए हमलोगों ने कुछ मार्ग अतिक्रमण कर ऐसे प्रासाद को देखा जो अत्यन्त विशाल और जिसका मुख्यद्वार बड़ा तथा

प्रासादमद्राक्ष्म। तदन्तश्च बलात्प्रवेशिता एकत्र गिरिकूटोपमं नारास्थिसञ्चयमन्यत्र च मांसश्रपणाय कृताननैकान् गर्तानवलोक्य भयेन कम्पमानाः कञ्चनकालमालेख्योल्लिखिता इव निश्चलाङ्गा अतिष्ठाम। साध्वसावलुप्तधृतयोऽध्वश्रमपरिखिन्ना वेपथुस्खलच्चरणाश्च

फलानि मूलानि च, प्राणसन्धारणाय = प्रणान् रक्षितुम्, भक्षयन्तः = आस्वादयन्तश्च वयं = यात्रिणः, कञ्चन = अविदितम्, अध्वानं = मार्गम्, अतिक्रम्य = गत्वा कञ्चित् = अन्यतमम्, महोत्सेधं = महोन्नतं विशालतोरणं = विशालद्वारबाह्यभागम्, तोरणोऽस्त्री बहिर्द्वारम् इत्यमरः। आयतबाह्याङ्गणप्रदेशम्-आयतः = विशालः, बाह्यः अङ्गणप्रदेशः यस्य तम् प्रासादं हर्म्यम्, अद्राक्ष्म = अवालोकयाम। तदन्तश्च-तस्य = प्रासादस्य, अन्तः = अभ्यन्तरे च, बलात् = हठात्, प्रवेशिताः = कारितप्रवेशाः, एकत्र = एकस्मिन् स्थले, गिरिकूटोपमं-गिरेः = पर्वतस्य, कूटस्य = शिखरस्य,उपमा = सादृश्यं यस्य तम् नरास्थिसञ्चयं-नराणां = मनुष्याणां, अस्थनां सञ्चयं = राशिं, अन्यत्र च = अपरस्मिंश्च प्रदेशे, मांसश्रपणाय = मांसं पाचयितुम्, कृतान् = विहितान्, नैकान् = नानाविधान्, गर्तान्, अवलोक्य = दृष्ट्वा, भयेन = भीत्या, कम्पमानाः = वेपमानाः, कञ्चन कालं = स्वल्पसमयपर्यन्तम् आलेख्योल्लिखिता इव चित्रलिखिता इव निश्चलाङ्गाः-निश्चलानि = निश्चेष्टानि, अङ्गानि येषां ते अतिष्ठाम = अवर्तमहि। साध्वसावलुप्तधृतयः-साध्वसेन = भयेन, अवलुप्ता = नष्टा, धृतिः = धैर्यं, येषां ते, अध्वश्रमपरिखिन्नाः-अध्वनः = मार्गस्य, श्रमेण = परिश्रमेण परिखिन्नाः = परिश्रान्ताः, वेपथुस्खलच्चरणाश्च-वेपथुना = कम्पेन, 'अथ वेपथुः कम्पः'

बाहरी आँगन विस्तृत था। उसके भीतर उन्होंने हमें बलात् प्रवेश कराया। वहाँ हमलोगों ने एक ओर मनुष्यों की अस्थिराशि को देखा जिसकी तुलना पर्वत-शिखर से की जा सकती थी तथा दूसरी ओर मांश पकाने के लिए बनाये गये अनेक गड्ढों को देखा। फलस्वरूप हमलोग भय से काँप गये और कुछ समय तक चित्रलिखित निश्चल से हो गये। भय के कारण हमारा धैर्य नष्ट हो गया। मार्ग के परिश्रम से हमलोग थक गये तथा काँपने के कारण हमारे पैर लड़खड़ाने लगे और हमलोग जमीन पर अचेत होकर गिर पड़े।

वयं निश्चेतना भूमावपताम।

अस्तमुपगते च भगवति चण्डदीधितौ समहास्वनं द्वारमुद्घाट्य करालाकृतिं तालोच्छ्रयं भालस्थलज्वलदेकलोहितचक्षुषं व्याय तुरङ्गमायतमुखमावक्षःस्थलप्रलम्बमानाधरं दन्तावलश्रवसं कङ्कनि नखाग्रं पुरुषमेकं निरीक्ष्य गतप्राणा इव वयं निश्चेतनाश्चिरमतिष्ठा

इत्यमरः। स्खलन्तः = पतन्तः चरणाः = पादाः येषा ते वयं = सार्थ निश्चेतनाः = चेतनाशून्याः, भूमौ = पृथिव्याम्, अपताम = स्खलितवन्तः

'भगवति चण्डदीधितौ-चण्डाः दीधितयः (किरणाः) यस्य तस्मिन् सूर्यना अस्तम् उपगते = अस्ताचलं प्रमाते सति, पुरुषमेकं = पुरुषान्यतमाम् निरी अवलोक्य गतप्राणाः इव = जीवनरहिताः इव, निश्चेतनाः = चेतनाशून्याः = बहुकालपर्यन्तम्, अतिष्ठाम समहास्वनं = महाशब्दपूर्वकम्, द्वारं = उद्घाटच, आगतं = समायातम्, करालाकृतिं-कराला = भीषणा आकृ स्वरूपं यस्य तम्,तालोच्छ्रयं =तालवृक्षवत् उन्नतम् भालस्थलज्वलदेकलोहित भालस्थले = ललाट प्रदेशे, ज्वलत् = दीप्यमानम्, एकं लोहितं = रक्तं, चक्षु नेत्रं यस्य तम्। घोरघोणम्-घोरा = भयंकरा, घोणा = नासिका 'घोणा ना नासिकेत्यमरः' यस्य तम्। व्यायतदंष्ट्रं-व्यायता = दीर्घा दंष्ट्रा यस्य तुरङ्गमायतमुखम्-तुरङ्गस्येव = अश्वस्येव, आयतं = विस्तृतं, मुखं = यस्य तम्। आवक्षःस्थलप्रलम्बमानाधरम्-आवक्षस्थलम् = वक्षस्थलमभिव्या प्रलम्बमानः = नीचैः पतनशीलः, अधरः = अधरोष्ठः यस्य तम्। दन्तावल दन्तावलस्येव = गजस्येव, श्रवसी = कर्णौ यस्य तम्, कंकनिशितनख ककस्येव = तन्नाम्नः, लोहपृष्ठपर्यायस्य पक्षिविशेषस्येव, निशिताः = ती

सूर्यास्त होने पर जोर की ध्वनि के साथ दरवाजा खोलकर आए उग्रपुरुष को हमलोगों ने देखा। उसकी आकृति भीषण थी। ऊँचाई ताड़ के थी। उसके ललाट में लाल नेत्र चमक रहा था। उसकी नासिका भयंकर उसकी दाढ़ी फैली हुई थी। उसका विस्तृत मुख घोड़े की तरह लंबा था। अधर वक्षस्थल तक लटक रहा था। उसके कान हाथी के समान थे, नखाग्र कंक पक्षी के समान तीखे थे। उसे देख कर हमारे मानों प्राण च

अथास्मासु लब्धचेतनेषु साकूतं विर्वर्णयन् स मामुपसृत्य गृहीत्वा च शौनिक इव मेषशावकं सर्वतः परीक्षमाणोऽस्थिचर्मावशेषमुपलभ्यात्यजत्। क्रमेण चास्मत्सहचरेषु प्रत्येकं तथैव परीक्षमाणः पोताध्यक्षम् स्थविष्ठं समुपलभ्य कुन्तेन निशितेन सपत्रीकृत्य वैश्वानरं प्रज्वाल्य शूलाकृत्याभ्यन्तरं

नखाग्राः यस्य तम्, लोहपृष्ठस्तु कङ्कः स्यात्" इत्यमरः। परुषतरम् = अत्यन्तं कर्कशम् पुरुषं निरीक्ष्य। गतप्राणा इव वयं, निश्चेतना = चेतानाशून्याः, चिरं, अतिष्ठाम = स्तिता अभवाम।

अथ = अनन्तरम्, अस्मासु = प्रवासिषु, लब्धचेतनेषु–लब्धा = प्राप्ता, चेतना = चैतन्यं यैस्तेषु, साकूतं = साभिप्रायं, निवर्णयन् = निरीक्षणं कुर्वन् सः = परुषतरः पुरुषः, माम् = सिंधुवादम्, उपसृत्य = अग्रे आगत्य, गृहीत्वा च शौनिकः = बधिकः, मेषशावकम् = अवतर्णकमिव। सर्वतः = सर्वैः प्रकारैः, परीक्षमाणः = परीक्षां कुर्वन्, अस्थिचर्मावशेषम् = अस्थ्नां चर्मणां च अवशेषो यस्मिंस्तम्, उपलभ्य = प्राप्य, अत्यजत्। क्रमेण च, अस्मत्सहचरेषु = अस्माकं सहयोगिषु, तथैव = तेनैव प्रकारेण, परीक्षमाणः, पोताध्यक्षं = नौकर्णधारम् स्थविष्ठम् = अतिशयेन स्थूलम्, समुपलभ्य = प्राप्य, निशितेन = तीक्ष्णेन, कुन्तेन = भल्लेन, सपत्रीकृत्य = सपक्षबाणविद्धं कृत्वा, वैश्वानरम् = अग्निम् =अग्निर्वैश्वानरो वह्निः' इत्यमरः। प्रज्वाल्य = सन्दीप्य, शूलाकृत्य = लौहादिकीलकेन वेधनम् कृत्वा, अभ्यन्तरम् = गृहान्तः, नीत्वा जघास = भक्षयामास। समाप्तभोजनः-समाप्तं = सम्पन्नं, भोजनम् = अशनं यस्य सः, चं आगत्य = समुपस्थाय, वज्रनिर्घोषभीषणेन = भयंकरेण, घर्घरस्वरेण = घर्घरध्वनिना, दिशः = आशाः

और हमलोग बहुत देर तक निश्चेष्ट पड़े रहे।

अनन्तर हमारे होश में आने पर उसने मुझे गौर से देखते हुए पास पहुँच कर जिस प्रकार कसाई भेड़ के बच्चे की चारों ओर से परीक्षा करता है उसी प्रकार मेरी परीक्षा कर मुझे अस्थिचर्मावशेष पाकर छोड़ दिया। इसी प्रकार क्रमशः हमलोगों के प्रत्येक साथियों की परीक्षा करता हुआ वह जहाज के अधिकारी के पास गया। उसे मोटा-ताजा समझ तीखे भाले से छेदकर शूल द्वारा आग में सेंककर भीतर ले जाकर खा लिया। भोजन के बाद आकर वज्र के

नीत्वा जघास। समाप्तभोजनश्चागत्य वज्रनिर्घोषभीषणेन घर्घर दिशोऽभिपूरयन् सुष्वाप। प्रभाते चोत्थितोऽस्मान् भीतिविहस्तांस् प्रासादे समुत्सृज्य क्वचिदयासीत्।

तस्मिंश्च कियद्दूरं गते तत्प्रबोधनभयेन निखिलां रात्रिं तूष्णीं वयं शोकोद्गारैः सकलमेव तं सौधं प्रतिध्वनयन्तोऽस्मत्साधा

अभिपूरयन् = व्याप्नुवन् सुष्वाप = निदद्रौ। प्रभाते = प्रातःकाले च उत्थि प्रबुद्धः, भीतिविहस्तान्–भीत्या = भयेन, विहस्तान् = व्याकुलान् 'विहस्तव्य समौ' इत्यमरः। अस्मान् = सार्थवाहान्, तत्रैव = पूर्ववर्णिते, प्रासादे = समुत्सृज्य क्वचित्, अयासीत् = आगमत्।

तस्मिंश्च = नरभक्षके, कियद्दूरं = स्वल्पदूरं, गते = प्रयासे तत्प्रबोधनभयेन-तस्य प्रबोधनस्य = जागरणस्य भयेन = भीत्या, निखिलां = रात्रिं = निशां, तूष्णीं= मौनं, स्थिता = वर्तमानाः, वयं = यात्रिणः, शोको = दुःखपूर्णैः विलापैः, सकलमेव = संपूर्णमेव, तं सौधं = प्रासादम्, प्रतिध्व = प्रतिध्वनिभिः निनादयन्तः, अस्मत्साधारणवैरिणः–अस्माकं सहजशत्रोः = नरराक्षसस्य, नानाविधान् = अनेकप्रकारान् निबर्हणोपायान्-निबर्हणस्य = मा निर्बहणमित्यादितः मारणं प्रतिघातनमिति पर्यन्तम्, अमरोक्ताः मारणपर्यायाः। उ = साधनानि, विचिन्तयन्तोऽपि = विमृशन्तोऽपि, एकमपि समुचितं = योग्यं, = कर्मयोग्यम् (उपायं) न उपलभ्य = न प्राप्य, सचिन्ताः = चिन्तामग्नाः नि = संपूर्ण, तं दिवसं, तस्मिन् द्वीपे = नरराक्षसैरधिष्ठिते, भ्रमन्तः = वि

समान भयंकर घरघराहट से दिशाओं को व्याप्त कर सो गया। प्रातः उठकर हमलोगों को भयभीत अवस्था में उसी महल में छोड़ कहीं चला

उसके दूर चले जाने पर हम लोग जो उसके जागने के भय से पूरी रात बैठे हुए थे, इस समय वहीं अपने शोकमय चीत्कारों से पूरे महल को प्रति कर रहे थे। हमलोगों उस शत्रु को मारने के लिए अनेक प्रकार के उपायों को हुए एक भी समुचित उपाय को न पाकर चिन्तामग्न थे। तथा दिन भर में घूमते हुए सुलभ कन्दमूल फलों को खाते थे। उस समय हमलोग केवल की कृपा के अधीन थे तथा सायं पुनः महल में लौट आते थे।

वैरिणस्तस्य निबर्हणोपायान् नानाविधान् विचिन्तयन्तोऽपि नैकं समुचितं कर्मण्यमुपलभ्य सचिन्तास्तं दिवसं तस्मिन् द्वीपे भ्रमन्तः फलमूलानि यथालाभं भक्षयन्तः परमेश्वरानुग्रहैकशरणाः सायं भूयस्तं प्रासादं प्रत्यावर्तामहि।

स तु नरपिशाचः पूर्ववत् प्रतिनिवृत्यास्मास्वेकं कवलीकृत्याऽऽ-प्रभातमशेत। एवं जीवितनिराशानस्मान् सिन्धुनिमज्जनमेव शरणं मन्यमानांस्तथाकर्तुं प्रवृत्तान्निरीक्ष्यैकोऽन्धतामिस्रपातकविभीषिकयाऽऽ-त्मघातान्निरवारयत्।

यथालाभम् सुलभानि, फलमूलानि, च, भक्षयन्तः = आस्वादयन्तः, परमेश्वरानु-ग्रहैकशरणाः परमेश्वरः, तस्य अनुग्रहः = कृपाप्रसाद एव, एकम् = अनन्यं शरणम् 'आश्रयः' येषांः ते। सायं = सन्ध्याकाले भूयः = पुनः तं प्रासादं = भवनं प्रत्यावर्तामहि = परावर्तिताः स्मः।

स तु नरपिशाचः, पूर्ववत् = प्रतिदिवसमिव प्रतिनिवृत्य = परावर्तनं कृत्वा, अस्मासु = अवशिष्टेषु यात्रिषु एकम् अन्यतमं, कवलीकृत्य = ग्रासं विधाय भक्षयित्वेत्यर्थः। आप्रभातम् = प्रातः कालपर्यन्तम्, अशेत = निद्रां विदधे। एवं अनेन प्रकारेण, जीवितनिराशान् = स्वजीवनं प्रति नैराश्यपूर्णान्, सिन्धुनिमज्जनमेव-सिंधौ = समुद्रे, निमज्जनं = ब्रुडनमेव, शरणम् = अवलम्बनं मन्यमानान्, तथाकर्तुम् = आत्मघातं विधातुम्, प्रवृत्तान् = उद्यतान्, अस्मान् यात्रिणः निरीक्ष्य एकः = अन्यतमः सहयात्री अन्धतामिस्रपातकविभीषिकया-अन्धतामिस्रे = तन्नाम्नि नरके, पातकस्य = पतनस्य, या विभीषिका = भीतिः, तया। आत्मघातात् = आत्महत्यातः, निरवारयत् = परावर्तयति स्म।

वह पिशाच पूर्ववत् लौटकर हमलोगों में से एक को अपना ग्रास बनाकर प्रातःकाल तक सोता था। उस समय हमलोग जीवन के प्रति निराश हो चुके थे तथा समुद्र में डूबने को ही सहारा समझकर उसके लिए उद्यत थे। यह देखकर एक ने "अन्धतामिस्र" नामक नरक में गिरने का भय दिखाकर हमें आत्यहत्या से बचा लिया।

अथाहं तान् मत्सहचरानेवमब्रुवम्।

'आर्याः! नन्वयं द्वीपः काष्ठप्रचुरः तत्तेभ्यः फलकानि सम्पा क्वचिद् गूढं निक्षिप्य तदुपयोगौपयिकमवसरं प्रतीक्षेमहि। मया ह्य पुरुषादहतकस्य विनाशायैक उपायश्चिन्तितः। तस्मिन् किल साफल्यमुप सधैर्यमत्रैव कमपि पोतं सम्भाव्यागममनुपालयन्तः कालं क्षपये

अथ = पश्चात्, अहं = सिन्धुवादः तान् मत्सहचरान् = मम सहयोगि यात्रिणः एवं = वक्ष्यमाणरीत्या, अब्रुवम् = अकथयम्–"आर्या! = सभ्याः! इति वाक्यालंकारे। अयम् = एषः, द्वीपः काष्ठप्रचुरः = काष्ठैः परिपूर्णः। तत् तस्मात् कारणात्, तेभ्यः = काष्ठेभ्यः, फलकानि = पट्टिकाः, सम्पाद्य निर्माय, क्वचित् = कुत्रचित् स्थाने, गूढं = गुप्तं, निक्षिप्य = संस्था तदु पयोगौपयिकम्–तेषां = काष्ठफलकानाम्, उपयोगाय = उपयोगं विधा औपयिकम् = उपयुक्तम्, अवसरं = कालं, प्रतीक्षेमहि = प्रतीक्षां करवाम। = यतः, मया = सिन्धुवादेन, अस्य = एतस्य, पुरुषादहतकस्य–पुरुषान् नरान्, अत्ति = भक्षयतीति पुरुषादः स चासौ हतकः पुरुषादहतकः = न नरभक्षकः, तस्य, विनाशाय = विनाशं कर्तुम्, एकः = अन्यतमः, उपा चिन्तितः = विमृष्टः। तस्मिन् किल = उपाये, साफल्यम् उपगते = सफले सति, सधैर्यं = धीरतापूर्वम्, अत्रैवं = अस्मिन्नेव द्वीपे, कमपि, सम्भाव्याग सम्भाव्यः = अनुमेयः, आगमः = आगमनं, यस्य तं, पोतं = जलया अनुपालयन्तः = प्रतीक्षमाणः, कालं = समयं, क्षपयेम = हापयेम। अन्यथ = एवमसति, फलकाश्रयेण = काष्ठफलकानवलम्ब्य, समुद्रं = सागरं, आश्र

अनन्तर मैंने अपने साथियों से इस प्रकार कहा–"सज्जनों! यह द्वीप लकड़ि से भरा हुआ है। अतः उनसे फलकों का निर्माण कर उन्हें गुप्त स्थान में रख उनका उपयोग करने के लिए हमें अवसर की प्रतीक्षा करनी चाहिए। मैंने नरभक्षी पुरूष को मारने के लिए एक उपाय सोच लिया है। उसके सफल तक हमें यहाँ पर धैर्यपूर्वक किसी जहाज के आने की प्रतीक्षा करते हुए व्यतीत करना चाहिए। अन्यथा फलकों का आश्रय लेकर समुद्र में तै चाहिए। यद्यपि फलकों के सहारे समुद्र में तैरना खतरों से भरा हुआ है त

अन्यथा तु फलकाश्रयेण समुद्रमाश्रयेम। अपायबहुलमपि फलकाश्रयेण सिन्धुतरणं नूनमेतन्नरपिशाचमुखकन्दराप्रवेशाच्छ्रेय' इति ते तु एतमुपायमन्वमन्यन्त। अथ वयं बृहन्ति काष्ठफलकानि प्रत्येकं नरत्रयवहनपर्याप्तावकाशानि पर्यकल्पयाम।

सायं च स्ववसतिं भूयः प्रत्यागच्छाम। सोऽपि नररूपधरोऽन्तको यथासमयमुपेत्यास्मास्वेकं जग्ध्वा निदद्रौ। तं च सघर्घरस्वनं निद्रावशमा-

= अवलम्बामहि। (यद्यपि) फलकाश्रयेण, सिन्धुतरणं = समुद्रोल्लङ्घनम्, अपायबहुलं = विविधविघ्नैः व्याप्तम्, (तथापि) एतत् = सिन्धुतरणं, नूनं= निश्चयेन, नरपिशाचमुखकन्दराप्रवेशात् =नरः पिशाच इवेति नरपिशाच, मुखं कन्दरेवेति मुखकन्दरा, नरपिशाचस्य मुखकन्दरायां प्रवेशात् श्रेयः = कल्याणकरम् इति। ते तु = महत्सहचराः, एतम् = मन्निवेदितम्' उपायम्, अन्वमन्यन्त = समर्थितवन्तः। अथ = पश्चात्, वयं = तद्वीपान्तःस्थाः सहयात्रिणः, बृहन्ति = महाप्रमाणानि, काष्ठफलकानि = काष्ठपट्टिकाः, प्रत्येकम् = एकमेकमिति प्रत्येकम्, नरत्रयवहनपर्याप्तावकाशानि-नराणां = मनुष्याणां, त्रयस्य = त्रिकस्य, वहने = धारणे, उपवेशन इत्यर्थः, पर्याप्तः = प्रचुरः, अवकाशः = स्थानं = येषु तानि, पर्यकल्पयाम = व्यरचयाम।

सायं च = सन्ध्यायां च, भूयः = पुनः, स्ववसतिं = निजगृहं, प्रत्यागच्छाम = प्रति निवर्तामहि। सोऽपि नररूपधरः = मनुष्यवेषे स्थितः, अन्तकः = यमः, यथासमयं = स्वसमयेन, उपेत्य = आगंत्य, अस्मासु यात्रिषु एकम् = अन्यतमं जग्ध्वा = भक्षयित्वा, निदद्रौ = सुष्वाप। तं च = नरान्तकं, सघर्घरस्वनं = घर्घरध्वनिकुर्वाणं, निद्रावशं = सुप्तम्, आकलय्य = ज्ञात्वा, अस्मासु यात्रिषु

यह उपाय नरपिशाच के मुखरूपी गुफा में जाने से कही अधिक श्रेयस्कर है। उन सभी साथियों ने मेरे इस उपाय का अनुमोदन किया। पश्चात् हमलोग ने ऐसे विशाल लकड़ी के पटरों का निर्माण किया जिनमें प्रत्येक पर तीन मनुष्यों के बैठने का पर्याप्त स्थान हो।

हमलोग फिर सायंकाल अपने निवास-स्थान लौट आये। वह भी मनुष्य वेशधारी यम यथासमय आकर हमलोगों में से एक को खाकर सो गया। उसको

कलय्यास्मासु धीरधियो नवजना अहं च लोहशूलमग्नौ प्रताप्य तच्चक्षु
निक्षिप्य तमन्धतामनयाम।

सोऽप्यविषह्यवेदनया भृशं तुद्यमानस्तारमाक्रोशन् दूरे स्थितेष्वस्मा
कञ्चन विधर्तु कृतप्रयत्नोऽपि बन्ध्यश्रम इतस्ततः परामृशन् द्वारदेशमवा
कुत्रापि प्रययौ।

तस्मिश्चापगतमात्रे वयं सिन्धुरोधो निगूहितं काष्ठफलकसमुदय

धीरधियः धीरा = धैर्यशीलिनी, धीः बुद्धिः येषां ते, नवजनाः नवाश्च ते ज
तरुणाः, अहं च = सिन्धुवादः, लोहशूलं = लोहनिर्मितं कुन्तम्, अग्नौ प्रताप्य
तापयित्वा, तच्चक्षुषि-तस्य = नरपशोः, चक्षुषि = नेत्रे, निक्षिप्य = पातयित्
तं = नरपशुं, अन्धतां = दृष्टिशून्यताम्। अनयाम = नीतवन्तः।

सोऽपि = नरराक्षसः अविषह्यवेदनया-अविषह्या चासौ वेदना, तया
सोढुमशक्येन कष्टेन, भृशम् = अत्यन्तं, तुद्यमानः =पीड्यमानः, तारम् = उ
आक्रोशन् = समाक्रन्दन्, दूरे, स्थितेषु = वर्तमानेषु, अस्मासु = यात्रिषु, कं
= यात्रिणं, विधर्तुम् = ग्रहीतुम्, कृतप्रत्यनोऽपि-कृतः = विहितः, प्रयत्नः
प्रयासः येन, एवंभूतोऽपि, वन्ध्यश्रमः-वन्ध्यः = व्यर्थः, श्रमः = परिश्रमो य
सः, इतस्ततः, परामृशन् = संस्पृशन्, द्वारदेशं = द्वारभूमिं, अवाप्य = आग
कुत्रापि = अज्ञातस्थले, प्रययौ = प्राचलत्।

तस्मिंश्च = नरभक्षके, अपगतमात्रे = प्रयात एव, वयं यात्रि
सिन्धुरोधोनिगूहितं-सिन्धोः = समुद्रस्य, रोधसि = तटे, निगूहितं = गुप्तरू
स्थापितम्, काष्ठफलकसमुदयम् = काष्ठफलकानां समूहम्, अवाप्य = लब्ध्

नाक बजाते देखकर और सोता हुआ समझकर हमलोगों में से नौ धैर्यश
व्यक्तियों ने और मैंने लोहे के शूल को गरमकर उसकी आँख में डाल उसे अ
बना दिया।

वह भी असह्य वेदना से अत्यन्त पीड़ित होकर जोर से आक्रोश करते
दूर पर उपस्थित किसी को पकड़ने के लिए प्रयत्न करने लगा और निष्
होकर इधर उधर टटोलते हुए द्वार पर पहुँचकर कहीं चला गया।

उसके जाते ही समुद्र के किनारे छिपाए हुए लकड़ी के फलकों की राशि

वाप्यानाकर्ण्य तद्गर्जनं तं मृतं मत्वा निर्विशङ्काः कस्यचित् प्रवहणस्यागमनं सम्भावयन्त आप्रभातमतिष्ठाम। प्रभातायां च तस्यां युगायमानायां निशायां तमस्मदरातिमात्मतुल्याकारप्रमाणाभ्यामपराभ्यां नरहतकाभ्यां समनुस्त्रियमाणं सत्वरमापतन्तमद्राक्ष्म।

तांश्चावलोक्य ससम्भ्रमं फलकान्यधिरुह्य तानि क्षेपणीभ्यां प्रेरयन्तः सत्वरं पलायामहि। ते तु नराधमा अस्मान्निरीक्ष्य क्रोधेन दशनान्

तद्गर्जनं-तस्य = नरराक्षसस्य, गर्जनं = सिंहनादम्, अनाकर्ण्य = अश्रुत्वा तं, मृतं = निष्प्राणं, मत्वा = ज्ञात्वा, निर्विशङ्काः = संन्देहमुक्ताः, कस्यचित् = अनिर्धारितस्य प्रवहणस्य = जलयानस्य, आगमनं, सम्भावयन्तः = तर्कयन्तः, आप्रभातं = प्रातःकालपर्यन्तम्, अतिष्ठाम = अवर्तामहि। तस्यां च अनुभूतायाम्, युगायमानानयां = युगवद् दीर्घकालायाम्, निशायां = रात्रौ, प्रभातायां = प्रातःकालरूपेण परिणतायां सत्याम्, तम् अस्मदरातिम् = अस्माकं यात्रिणां शत्रुम्, आत्मतुल्यप्रमाणाभ्याम् आत्मना = स्वेन, तुल्यं = समानं, प्रमाणम् = आकारः, आकृतिः ययोः। ताभ्याम्, नरहतकाभ्यां =मनुष्याधमाभ्यां, समनुस्त्रियमाणं = समनुवर्तमानं, सत्वरं = सवेगं, अपतन्तं=समागच्छन्तम्,अद्राक्ष्म= अवलोकयाम।

तांश्च = नराधमान्, अवलोक्य = दृष्ट्वा, ससम्भ्रमं = सवेगं, फलकानि = काष्ठपट्टिकाः, अधिरुह्य = समुपविश्य, तानि = फलकानि, क्षेपणीभ्याम् = नौकादण्डाभ्यां 'नौकादण्डः क्षेपणी स्यात्'इत्यमरः। प्रेरयन्तः = चालयन्तः, सत्वरं = शीघ्रं पलायामहि। ते तु नराधमाः = दुष्टाः, अस्मान् = यात्रिणः, निरीक्ष्य = दृष्ट्वा, क्रोधेन = कोपेन, दशनान् = दन्तान्, पेषयन्तः = चूर्णयन्तः,

---

पाकर, उसकी गर्जना को न सुनने से उसे मरा हुआ समझकर निशङ्क हो किसी जहाज के आगमन की प्रतीक्षा करते हुए सुबह तक हमलोग वहाँ ठहरे। युग के समान प्रतीत होनेवाली रात्रि जब सुबह में बदल गई तब हम-लोगों ने अपने उस शत्रु को जिनके पीछे उसी के आकार एवं प्रकार के दो दुष्ट आ रहे थे, आते हुये देखा।

उन्हें देखकर जल्दी-जल्दी उन फलकों पर बैठ कर उन्हें डाँडों से चलाते हुए हम जल्दी भागने लगे। उन दुष्टों ने हमें देखकर क्रोध से दाँत पीसते हुए बड़ी

पेषयन्तो महतीः शिला अस्मत्फलकेषु तरसाऽस्यन्तस्तानि चूर्णीकृत्य सर्वान् सिन्धुतलेऽमज्जयन्। केवलमहमुभाभ्यां सहचराभ्यां सह फलकमेकमधिरूढो नियत्या तस्या विपदोऽभिरक्षितः सिन्धुमध्यगच्छम्।

तत्र च महोर्मिषु क्वचिन्निमज्जन्तः क्वचिच्चोन्मज्जन्तो वयं देवैकनाथाः संशयग्रस्तहृदास्तां क्षपामक्षपयाम। प्रातश्च सुदैववशेन क्वचिद् द्वीपे क्षिप्ताः सानन्दं तत्र समृद्धा मृद्वीका यथेच्छमुपभुज्य कञ्चिच्छ्रममपानयाम।

महतीः = विशालाः, शिलाः = पाषाणान्, अस्मत्फलकेषु = अस्माकं काष्ठपट्टिकासु, तरसा = वेगेन, अस्यन्तः = क्षिपन्तः, तानि = फलकानि चूर्णीकृत्य = पेषयित्वा, सर्वान् = यात्रिणः, सिन्धुतले = समुद्रान्तस्तले अमज्जयन् = अमज्जायामासुः। केवलम्, अहं = सिन्धुवादः, उभाभ्यां = द्वाभ्यां सहचराभ्याः = सहयात्रिभ्यां, सह, एकम् = अन्यतमं, फलकं = काष्ठपट्टिकाम् अधिरूढः = समुपविष्टः, नियत्या = भाग्येन, तस्याः = अनिर्वचनीयायाः विपदः = कष्टपरम्परायाः अभिरक्षितः=सर्वतः,सुरक्षितः सिन्धुमध्यं = समुद्राभ्यन्तरम् अध्यगच्छम्= प्राप्नवम्।

तत्र च = सिन्धुमध्ये, महोर्मिषु =-महत्यश्च ताः उर्मयाः = तारङ्गाः, ता क्वचित् = कुत्रचित्, निमज्जन्तः = ब्रुडनशीलाः, क्वचित् = कस्मिंश्चित् स्थले उन्मज्जन्तः = संतरन्तः, वयं = यात्रिणः, देवैकनाथाः = भाग्यैकशरण संशयग्रस्तहृदयाः। संशयग्रस्तं = संदेहाकुलं, हृदयं = चेतः, येषां ते, तां क्ष = तां रात्रिम् अक्षपयाम = व्यतीतवन्तः। प्रातश्च = प्रभाते च, सुदैववशेन = सौभाग्यवशेन, क्वचित् = कुत्रचित्, द्वीपे, क्षिप्ताः = पतिताः (वयं) सानन्दं = हर्षपूर्वकं, तत्र द्वीपे, समृद्धाः = फलिताः, मृद्वीकाः = द्राक्षाफलानि, यथेच्छं =

चट्टानों को हमारे फलकों की ओर वेग से फेंकते हुए, उन्हें चकनाचूर क सभी मनुष्यों को समुद्र में डुबो दिया। केवल मैं अपने दो साथियों के साथ ए पटरे पर बैठकर भाग्य से उन विपत्तियों से बचता हुआ समुद्रके बीच आ पहुँच

वहाँ उन लहरों में कहीं डूबते हुए तो कहीं उतराते हुए हम लोगों ने भाग्य के अधीन और सन्देहग्रस्त होकर उस रात्रि को व्यतीत किया। प्रातः सौभाग्य हमलोग एक द्वीप में आ पहुँचे और वहाँ पर आनन्दपूर्वक अच्छी तरह फलों

अवतीर्णायां च निशायां तीरं सम्प्राप्य प्रसुप्ता अत्यायत-प्रमाणस्याजगरस्यैकस्य विसर्पणशब्देनाऽदूरोत्थितेन प्रबुद्धा अभवाम।

स चाजगरः क्षणादस्मास्वेकं मुक्तये कृतवृथाप्रयत्नं न्यगिलत्।

उर्वरितैकसहचरोऽहं "हन्त! दुखाद्दुःखान्तरं प्राप्तौ स्वः नराशनात्कथञ्चिद्विमुक्तौ साम्प्रतं सर्पमुखमनुप्रविष्टौ" इति जीविते निराश उच्चैराक्रन्दम्।

स्वेच्छापूर्वकम्, उपभुज्य = समास्वाद्य, किञ्चिच्छ्रमं = स्तोकं परिश्रमम्, अपानयाम = दूरीकृतवन्तः।

निशायां = रात्रौ, अवतीर्णायां = समागतायां, तीरं = तटम्, सम्प्राप्य = समागत्य, प्रसुप्ताः = प्रकर्षेण निद्रिताः, अत्यायतप्रमाणस्य-अत्यायतं = विशलतमं, प्रमाणं यस्य तस्य, एकस्य = अन्यतमस्य, अजगरस्य = सर्पविशेषस्य, अदूरोत्थितेन = निकटोद्भवेन, विसर्पणशब्देन = सर-सरध्वनिना प्रबुद्धा अभवाम = जागरणशीलाः आस्म। स च अजगरः = विशालसर्पः, क्षणात् = मुहुर्तेनैव अस्मासु यात्रिषु एकम् = अन्तमं, मुक्तये = मोचनाय कृतवृथाप्रयत्नं-कृतः = विहतः, वृथा = निष्फलः, प्रयत्नः = उद्योगः, येन तं न्यगलित् = कचवलीचकार।

उर्वरितैकसहचरः-उर्वरित् = अवशिष्ट एकः सहचरः = मित्रं यस्य सोऽहं = सिन्धुवादः 'हन्ते'ति खेदसूचकमव्ययम्। दुःखात् = एकस्याः विपदः, दुःखांतरम् = अन्यां विपदं प्राप्तो स्वः = अनुभवावः। नराशनात् = मनुष्यभक्षकात् पुरुषात्, कथञ्चित् = केनापि प्रकारेण कष्टसाध्येन, विमुक्तौ, साम्प्रतम् = अधुना,

---

फूले अंगूरों को भरपेट खाकर कुछ थकावट दूर की।

रात में सोये हुए हम लोग किनारे पर अतिविशाल अ .गर के सरकने की सर-सर ध्वनि से जाग गए। वह अजगर क्षण भर में हम लो-ों में से एक को, जो छुड़ाने के लिए व्यर्थ प्रयत्न कर रहा था, निगल गया।

अब मेरा एक ही साथी बचा हुआ था। मैं जीवन के प्रति निराश हो चुका था। जोर-जोर से चिल्लाया-"हाय! हम दोनों एक विपत्ति से छूटकर दूसरी विपत्ति में आ पहुँचे। नरभक्षी से किसी प्रकार छुटकारा पाया तो सम्प्रति अजगर

अथावयोर्निकटवर्तिनं शाखिनमारुह्य स्थितयोरधस्तादुपगतो महाकायोऽजगरः स्वफूत्कारवेगेन मत्तः किञ्चिदधोवर्तिन्यां शाखायां स्थितं तं मदीयमेकाकिनं सहचरं निगीर्य कुत्रापि न्यलीयत।

एवमेकावशेष आत्मनोऽपि तामेव गतिं सम्भावयन् जीवितनिराशः सिन्धौ निमज्य मर्तुकामोऽपि भूयो जीवनाशया प्रणोदितो रक्षायै परमेश्वरं भूयो भूयः प्रार्थयमानोऽकस्माद् दूरादागच्छत् प्रवहणमेकपश्यम्। शिरः

सर्पमुखम् = जगरस्य मुखम्, अनुप्रविष्टौ = प्रवेशं कृतवन्तौ, इति = एवं जीविते = स्वजीवनं प्रति निराशः = नैराश्यव्याप्तः, उच्चैः = तारस्वरेण, आक्रन्दम् = व्यलपम्।

अथ = पश्चात्, निकटवर्तिनं = समीपस्थं, शाखिनं = वृक्षम्, आरुह्य = समधिरुह्य, स्थितयोः = वर्तमानयोः, आवयोः = सहचरयोः, अधस्तात् = नीचैः, महाकायः = विशालप्रमाणः, अजगरः = सर्पविशेशः, मत्तः इति पञ्चम्यर्थे तसिल् प्रत्ययः। मदपेक्षया किञ्चित् अधोवर्तिन्यां = निम्नायां, शाखायां, स्थितं = वर्तमानं, तं मदीयं = मामकीनं, एकाकिनम् = असहायम्, सहचरं = मित्रं, स्वफूत्कारवेगेन-स्वस्य, फूत्कारस्य = फू-फूकरणस्य, वेगेन = जवेन, निगीर्य= कवलीकृत्य, कुत्रापि = कस्मिंश्चिदपि अज्ञातस्थले, न्यलीयत =अदृश्यतां गतः।

एवम् अनेन प्रकारेण एकावशेषः = अनन्यः, आत्मनोऽपि = स्वस्यापि, तामेव = मत्सहचरेणानुभूतां गति दुर्दशां सम्भावयन् = कल्पयन्, जीवितनिराशः = स्वजीवनं प्रति आशां परित्यजन्, सिन्धौ = समुद्रे, निमज्य = ब्रुडनं कृत्वा,

---

के मुख में जा पड़े।"

पश्चात् निकटवर्ती वृक्ष पर चढ़कर ठहरे हुए हम दोनों में से नीचे आने वाले विशालकाय अजगर ने फूँ-फूँ करते हुए वेगपूर्वक मुझसे थोड़ी नीची डाल पर बैठ हुए मेरे एकाकी मित्र को निगला और अदृश्य हो गया।

इस प्रकार अकेला बचा हुआ मैं स्वयं उसी प्रकार दुर्गति की कल्पना करते हुए जीवन के प्रति निराश हो, समुद्र में डूब मरना चाहते हुए भी फिर से जीवन की आशा से प्रेरित होकर, रक्षा हेतु परमेश्वर की बार-बार प्रार्थना करने लगा

स्थपटेन च कृतसङ्केतस्तत्स्थजनावधानमाकृष्य गृहीतसङ्केतैः पोतवाहैः सपदि सम्प्रेषितां नावमेकामारुह्य पोतं सम्प्राप्नवम्।

विदितमदद्भुतवृत्तान्ताः पोतवर्तिनो वणिजो मां विपत्सिन्धुतरणायाभिनन्द्य विशीर्णं मन्नेपथ्यं विलोक्य नवेन तेन भोजनोपहारैश्च मामन्वगृह्णन्।

तैश्च सहितः कानिचिदहानि द्वीपान्तरेषु वाणिज्यया द्रविणमुपार्जयन्

मर्तूकामोऽपि = मरणेच्छुरपि, भूयः = पुनः, जीवनाशया = प्राणरक्षणस्याशया, प्रणोदितः = प्रेरितः, रक्षायै = रक्षणं कर्तुम्, परमेश्वरं = भगवन्तं भूयो भूयः = वारं वारं, प्रार्थयमानः = याचमानः, अकस्मात् सहसा, दूरात् आगच्छत् = समायत्, एकं प्रवहणं = पोतम्, अपश्यं = दृष्टवान्। शिरःस्थपटेन = मस्तकस्थितया वस्त्रपट्टिकया च कृतसंकेतः-कृतः = विहतः संकेतः येन सः। तत्स्थजनावधानं-तत्रस्थितनतानां यात्रिजनानां अवधानं = ध्यानम्, आकृष्य = आवर्ज्य, गृहीतसंकेतैः = प्राप्तसंकेतैः, पोतवाहैः = नौकानियामकैः, 'नियामकाः पोतवाहा' इत्यमरः। सपदि = तत्कालं, सम्प्रेषिताम्, एकां नावं = नौकाम्, अरुह्य = उपविश्य, पोतं = प्रवहणं सम्प्राप्नवम् = समागमम्।

विदितममाद्भुतवृत्तांतः-विदितः = ज्ञातः, मम = सिन्धुवादस्य, अद्भुतः = आश्चर्यकारकः, वृत्तांतः = प्रवासवर्णनं यैस्ते पोतवर्तिनः = जलयानस्थिताः, वणिजः = सार्थवाहाः माम्, विपत्सिन्धुतरणाय-विपदेव = आपत्तिरेव, सिन्धुः = समुद्रः, तस्य तरणाय = सन्तर्तुम्, अभिनन्द्य = प्रशंसां विधाय, विशीर्णं = गलितं, मन्नेपथ्यं = मम सिन्धुवादस्य, नेपथ्यं = वेषं वसनमित्यर्थः।

और अकस्मात् दूर से आते हुए एक जहाज को देखा। पगड़ी के कपड़े से संकेत करता हुआ मैं उस पर सवार लोगों का ध्यान अपनी ओर आकृष्ट कर संकेत पानेवाले जहाजी यात्रियों द्वारा तत्काल प्रेषित एक नाव पर बैठ कर उस जहाज पर पहुँचा।

मेरे आश्चर्यकारक वृत्तांत को सुनकर जहाज में सवार व्यापारियों ने विपत्तिरूपी सागर से बचने के लिए मेरी प्रशंसा कर मेरे वस्त्रों को जीर्ण शीर्ण देखकर नया वस्त्र देकर और भोजन कराते हुए मेरे ऊपर अनुग्रह किया।

उनके साथ कुछ दिन तक अनेक द्वीपों में व्यापार द्वारा धनोपार्जन करते हुए

सालहतं नाम चन्दनद्रुमप्रभवं द्वीपमुपगत्य संगृहीतप्रचुरचन्दनस्ततः प्रस्थातुकामः पोताध्यक्षेणैवमुक्तः-

"आर्य! एतानि पण्यवस्तूनि मत्पोतमारूढपूर्वस्य मार्गे दैवान्मृतस्यैकस्य वणिकश्रेष्ठस्य विक्रीयाखिलं तद्धनं विदापुरं सम्प्राप्तेन भवता तद्दायादेभ्यो दीनमानमभ्यर्थये।"

'आकल्पवेषो नेपथ्यम्' इत्यमरः। नवेन = नवीनेन, तेन =नेपथ्येन, भोजनोपहारैश्च = भोज्यपदार्थसमर्पणैश्च, मां = सिन्धुवादन्, अन्वगृह्णन् = अनुगृहीतवन्तः।

तैश्च = वणिग्भिः, सहितः, कानिचित् = कतिपयानि, अहानि = दिनानि, द्वीपान्तरेषु = अन्येषु द्वीपेषु, वाणिज्यया = व्यापारेण, द्रविणं = धनम्, उपार्जयन् = संपादयन्, सालहतं नाम = तदाख्यं, चंदनद्रुमप्रभवं-चंदनद्रुमाणां प्रभवः = उत्पत्तिस्थानं द्वीपम्, उपगत्य = आगत्य, संगृहीतप्रचुरचंदनः- संगृहीतम् = एकत्रितं, प्रचुरं = प्रभूतं, चंदनकाष्ठराशिः, येन सः, ततः = तस्मात् द्वीपात् प्रस्थातुकामः = प्रस्थानं कर्तुमिच्छुः, पोताध्यक्षेण = प्रवहणकर्णधारेण, एवम्, उक्तः = कथितः।

आर्य! = भद्र! मत्पोतं = मदीयं जलयानम्, आरुढपूर्वस्य = पूर्वं कृतारोहणस्य, मार्गे, दैवात् = दुर्भाग्यात्, मृतस्य, एकस्य वणिक् श्रेष्ठतमस्य व्यापारिणः, एतानि = पुरोवर्तीनि, पण्यवस्तूनि = विक्रेयपदार्थान्, विक्रीय = विक्रयं कृत्वा, तद् धनं, विदामपुरं = तन्नाम नगरं, सम्प्राप्तेन = गतवता, भवता, तद्दायादेभ्यः-दायं = विभाजनीयं धनम् आददते = गृह्णन्ति ये ते दायादाः तस्य = वणिक् श्रेष्ठस्य, दायादेभ्यः = पुत्रादिभ्यः उत्तराधिकारिभ्यः दीयमानं =

मैं "सालहत" नाम के द्वीप पर पहुँचा जहाँ चन्दन वृक्ष होते थे। वहाँ प्रचुर चन्दन एकत्रित कर जब मैं वहाँ से जाने की इच्छा करने लगा, तब जहाज के अधिकारी ने मुझसे कहा–

"आर्य! ये विक्रेय वस्तुयें उस वणिक् श्रेष्ठ की हैं जो मेरे जहाज पर पहले सवार हुआ था और दुर्भाग्यवश मार्ग में मर गया। मैं प्रार्थना करता हूँ कि इन्हें बेचकर इससे प्राप्त समम्त धनराशि जब आप विदामपुर पहुँचे तो उनके उत्तराधिकारियों को दे दें।"

इत्युक्त्वा स तत्पण्यजातमदर्शयत्। तथेत्यभ्युपगम्य पश्यन्नहं तेषु स्यूतेषूल्लिखितमात्मनोऽभिधानमवलोक्य पोताध्यक्षं तं द्वितीययात्रायां प्रसुप्तं मामेकाकिनं परित्यज्यापसृतं प्रत्यभिज्ञायापृच्छम्-

''आर्य! किन्नामधेयोऽसौ यस्यैतद्वस्तुजातम्?'' इति।

सोऽब्रवीत्-''भद्र! एतानि तानि विदामपुरवासिनो वणिगग्रगण्यस्यार्य-सिन्धुवादस्य। यः किल द्वीपमेकमवतीर्य सहसाऽदृश्यतां गत इति।''

समर्प्यमाणम्, अभ्यर्थये = प्रार्थये।''

इति उक्त्वा = एवं कथयित्वा, सः पोताध्यक्षः तत् पण्यजातं = तं विक्रेयवस्तुसमूहम्, अदर्शयत् = दर्शितवान्, तथा = एवमेवास्तु इति = इत्थम् अभ्युपगत्य = स्वीकृत्य, स्यूतेषु तेषु = अनुस्यूतासु तासु गोणीषु, उल्लिखित्तम्, = अङ्कितम्, आत्मनः = स्वस्य, अभिधानं = नाम, अवलोक्य = दृष्ट्वा। द्वितीययात्रायां = द्वितीयसमुद्रप्रवासे, प्रसुप्तं = निद्रितं, माम्, एकाकिनम् = एकलं परित्यज्य, अपसृतं = गतवन्तं तं पोताध्यक्षं = नौकर्णधारं, प्रत्यभिज्ञाय = परिचित्य, अपृच्छम् = पृष्टवान्।

"आर्य! किं नामधेयः-किं नामधेयं यस्य सः। असौ वणिक्श्रेष्ठ, यस्य, एतद्वस्तुजातम् = अयं पण्यराशिः।"इति।

सः = पोताध्यक्षः, अब्रवीत् = अकथयत्। 'भद्र! एतानि तानि = विक्रेयवस्तूनि, विदामपुरनिवासिनः = एतत्संज्ञकनगरे निवसतः, वणिगग्रण्यस्य = श्रेष्ठोद्योगपतेः,आर्यसिन्धुवादस्य, विद्यन्त इत्यध्याहार्यम्। यः किल, एकं द्वीपम्, अवतीर्य = अवरुह्य, सहसा, अदृश्यताम् = दृशोः अविषयताम्, गतः = प्राप्तः।' इति।

यह कहकर उसने मुझे सम्पूर्ण वस्तुयें दिखायीं। 'ठीक है' ऐसा कहकर मैंने उन्हें देखा और उन वस्तुओं पर अपना नाम देखकर मैंने पहचाना कि यह वही जहाज का अधिकारी है जो दूसरी यात्रा में मुझे सोए हुए छोड़कर चला गया था। मैंने उससे पूछा "महोदय! उस यात्री का नाम क्या था जिसकी ये वस्तुयें हैं।"

उसने उत्तर दिया–"महोदय! विदमपुर निवासी वणिक श्रेष्ठ आर्य सिन्धुवाद की ये वस्तुयें हैं। जो एक द्वीप पर उतरकर अकस्मात् अदृश्य हो गया था।"

आर्य! सोऽहं सिन्धुवादोऽयं भवांस्तस्मिन् द्वीप एकाकिनं सुप्तं परित्यज्यापयात'' इति ब्रुवाणं मां क्षणं निर्वर्ण्य प्रत्यभिज्ञाय च प्रहृष्टः ''आर्य सिन्धुवाद! दिष्ट्या भवन्तं तीर्णापदं भूयो विलोकयामि'' इति समभिनन्द्य तत्पण्यजातं मदधीनमकरोत्।

ततश्च प्रस्थितोऽहं मार्गे द्वीपभ्रमाधायिनो महिष्ठान् कमठान्, धेनूरिव पयस्विनीश्चित्रवर्णाः काश्चिन्मत्स्यीः साश्चर्यं विलोकयन् क्रमेण वासरपुरं

"आर्य! = भद्र! 'सोऽहं सिन्धुवादः, यम्' भवान्, तस्मिन् द्वीपे = हीरकप्रचुरे द्वीपे, एकाकिनं सुप्तं = निद्रितम्, परित्यज्य = मुक्त्वा, अपयातः = निर्गतः" इति = एवं, ब्रुवाणम् = उक्तवन्तं मां, क्षणं = मुहूर्तम्, निर्वर्ण्य = निरीक्ष्य, प्रत्यभिज्ञाय च = परिचित्य, प्रहृष्टः = आनन्दितः, "आर्य!सिन्धुवाद!, दिष्टया = भाग्येन, भवन्तं तीर्णापदं तीर्णाः = उल्लङ्घिताः, आपदः = विपत्तयः येन तम्, भूयः, विलोकयामि, इति एवं समभिनन्द्य = स्तुत्वा तत्पण्यजातं = तं विक्रेयवस्तुसमूहम्, मदधीनं = मम परवशम्, अकरोत् = व्यधात्। मार्गे = पथि, द्वीपभ्रमाधायिनः = द्वीपभ्रांति कुर्वाणान्, महिष्ठान् = स्थूलतमान्, कमठान् = कच्छपान्, पयस्विनीः = दुग्धप्रदात्रीः, धेनुरिव = गौः इव, चित्रवर्णाः नानारङ्गरञ्जिताः काश्चित् = कतिपयाः, मत्स्यीः = मत्स्याङ्गनाः साश्चर्यं विलोयन् क्रमेण, वासरपुरम्, सम्प्राप्य = आगत्य, समुपार्जिताऽपरिमितवसुविसरः-समुपार्जितः = सम्पादितः, अपरिमितः = प्रमाणातीतः वसुविसरः = धनराशिः येन सः। दीनेभ्यः = दरिद्रेभ्यः, अतिसृष्टविपुलधनः-अतिसृष्टम् = वितीर्णं, विपुलं = प्रचुरं, धनं येन सः, विषयसुखानां = वैषयिकानाम् (इन्द्रिय-विषयसम्बद्धनाम्) आनन्दानाम्, उपभोगे = समास्वादे, एकपरः = तत्परः, सानन्दं = सहर्षं, समयं = कालम्, अयापयम् = व्यतीतवान्।"

"आर्य ! वही मैं सिन्धुवाद हूँ जिसे आप उस द्वीप पर अकेले सोए हुये छोड़ कर चले गये थे" मैंने कहा।

वह क्षण भर मुझे देखकर और पहचानकर आनन्दित हुआ–"आर्य सिन्धुवाद! भाग्य से मैं आपको पुनः देख रहा हूँ, जिन्होंने इतनी आपत्तियों को पार किया है" इस प्रकार मेरा अभिनन्दन करते हुए उसने वे समस्त वस्तुयें मेरे अधीन कर दीं।

इसके बाद वहाँ से प्रस्थान करते हुए मैंने मार्ग में विशाल कछुओं को आश्चर्यपूर्वक देखा जो द्वीपों का भ्रम उत्पन्न कर रहे थे। उसी प्रकार अनेक

सम्प्राप्य समुपार्जितापरिमितवसुविसरो दोनेभ्योऽतिसृष्टविपुलधनो विषयसुखोपभोगैकपरः समयमयापयम्।''

इत्येवं तृतीयसिन्धुयात्रावर्णनं परिसमाप्य सिन्धुवादः पूर्ववद्धितवादाय दत्तशतदीनारः सर्वैरतिथिभिः सहान्येद्युर्भोक्तुं चतुर्थयात्रावर्णनमाकर्णयितुं चानुरुध्य तं विससर्ज। अन्येद्युश्च स यथासमयं निर्वर्तितभोजनेषु तेषु सहितवादेषु दत्तावधानेष्वित्थं स्वां चतुर्थीं सिन्धुयात्रां वर्णयामास-

इत्येवम् = अनेन प्रकारेण तृतीयसिन्धुयात्रावर्णनं-तृतीयायाः सिन्धोः = समुद्रस्य, यात्रायाः = प्रवासस्य, वर्णनं = प्रतिपादनं, परिसमाप्य सिन्धुवादः, पूर्ववत् = प्रथमद्वितीयदिनवत्, हितवादाय = भारवाहिने, दत्तशतदीनारः-दत्तं = समर्पितं, शतं दीनाराणां येन सः, अतिथिभिः = अभ्यागतैः, सह = साकम्, अन्येद्युः = द्वितीयस्मिन् दिने चतुर्थयात्रावर्णनं, आकर्णयितुम् = श्रोतुम् च, अनुरुध्य = निवेद्य, तं = हितवादम्, विससर्ज = गृहगमनाय अनुमतिं ददौ।'

अन्येद्युश्च = चतुर्थदिने च, सः = सिन्धुवादः, सहितवादेषु = हितवादसहितेषु, तेषु = अतिथिषु, निवर्तितभोजनेषु-निवर्तितं = सम्पादितं, भोजनम् = अशनं यैस्तेषु, दत्तावधानेषु दत्तं = समर्पितं, अवधानं = ध्यानं, यैः एवम्भूतेषु सत्सु, इत्थं = वक्ष्यमाणप्रकारेण, स्वां = निजाम्, चतुर्थी = तुरीयां, सिन्धुयात्रां = समुद्रप्रवासं, वर्णयामास = वर्णयति स्म।

रंगबिरंगी मत्स्यागनाओं को देखा जो दुधारू गायों के समान प्रतीत हो रहीं थीं। क्रमशः मैं वासरपुर पहुँचा। वहाँ मैंने अपरिमित सम्पत्ति जो अर्जित की थी, उनसे दीनदुखियों को अधिक मात्रा में दान कर, खूब मौज करते हुए आनन्दपूर्वक दिन बिताने लगा।

इस प्रकार अपनी तीसरी समुद्री यात्रा का वर्णन समाप्त कर सिन्धुवाद ने हितवाद को सौ दीनार दिये तथा सभी अतिथियों के साथ दूसरे दिन भोजन करने के लिए और चौथी यात्रा का वृत्तान्त सुनने के लिये अनुरोध कर उसे घर जाने की अनुमति दी।

दूसरे दिन हितवाद के साथ यथासमय सभी अतिथियों के भोजन सम्पन्न कर के दत्तचित्त होने पर वह अपनी चौथी समुद्री यात्रा इस प्रकार सुनाने लगा।



चतुर्थी सिन्धुयात्रा

एवं सुखान्यनन्यसुलभानि भुञ्जानोऽपि भूयो व्युत्थितसमुद्रयात्रोत्कटोत्साहः सम्भाव्यलाभान्युच्चावचानि वस्तूनि संगृह्य पोतमारूढः पौरस्त्यान्तरीपानुद्दिश्य प्रायाम्। एकस्मिन् पुनरहनि समुत्थितया भीषणया वात्यया भग्नप्रवहणेष्वस्मासु बहवः सपदि प्राणांस्तत्यजुः।

कतिपयावशिष्टवणिग्जनसहायो दैवात् फलकमेकमारुह्य वीचिवेगेन

"एवं पूर्ववर्णितरीत्या, अनन्यसुलभानि न अन्यैः सुलभानि = इतरैः अप्राप्याणि, सुखानि = आनन्दानि, भुञ्जानोऽपि = आस्वादयन्नपि, भूयः = पुनः व्युस्थितसमुद्रयात्रोत्कटोत्साहः-वि = विशेषण, उत्थितः = उत्पन्नः, समुद्रयात्रायाः = सागरप्रवासस्य उत्कटः उत्साहः यस्य सः सिन्धुवादः, सम्भाव्यलाभानि- सम्भाव्यः = शक्यः, लाभः = प्राप्तिः, येषु तानि, उच्चावचानि = नानाभेदानि वस्तूनि, संगृह्य, पोतम् = जलयानम् , आरुढः = प्रविष्टः सन् पौरस्त्यान्तरीपान्- पुरो भवाः पौरस्त्यः, अन्तः = मध्ये, गताः आपः = जलानि येषां ते अन्तरीपाः। पौरस्त्याः = पूर्वदिग्भवा ये अन्तरीपाः = द्वीपाः, तान् 'द्वीपोऽस्त्रियामन्तरीपम्' इत्यमरः। उद्दिश्य, प्रायाम् = प्रयाणं कृतवान्। पुनः, एकस्मिन् = अन्यतमे, अहनि = दिवसे, समुत्थितया = समुद्गतया, भीषणया = भयङ्करया, वात्यया = वातचक्रेण, भग्नप्रवहणेषु, भग्नं = त्रुटितं, प्रवहणं = जलयानं येषां तेषु, अस्मासु = यात्रिषु, बहवः = यात्रिणः, प्राणान्, तत्यजुः=अमुञ्चन्, मृता इत्यर्थः।

कतिपयावशिष्टवणिग्जनसहायः-कतिपये = केचन, अवशिष्टाः = सावशेषाः,ज़ीविता इत्यर्थः। ये वणिग्जनाः = व्यापारिणः, ते एव सहायाः =

चतुर्थ समुद्री यात्रा

इस प्रकार यद्यपि मैं दूसरों के अप्राप्य सुखों का उपभोग कर रहा था तथापि फिर से मेरे मन में समुद्री यात्रा का उत्कट उत्साह जागा और जिनसे लाभ हो सकता था ऐसी अनेक प्रकार की वस्तुओं को एकत्रित कर जहाज पर सवार हो कर पूर्वी द्वीपों की ओर चल पड़ा। पुनः एक दिन उठे हुए भयानक बवंडर से जब हमारे जहाज टूट गये तो उसमें सवार अनेकों ने तत्काल प्राण छोड़ दिये।

कतिपय बचे हुए व्यापारियों के साथ मैं भाग्यवश एक पटरे पर सवार

समुह्यमान एकत्र द्वीपे प्रक्षिप्तः कानिचित् फलानि संभुज्य पीत्वा च प्रस्रवणाम्भः किञ्चित् समुच्छ्वसितः शुचार्त्तः क्षीणबलतया द्वीपस्थानि वस्तून्यवलोकयितुमप्यनुत्सहमानस्तत्रैव सिन्धुरोधसि निपत्य निद्रितोऽभूवम्। प्रभातायां यामिन्यामुदिते भगवति दिवाकरे प्रबुध्यमानानितस्ततो विचरतः कांश्चिद्वसतो दूराद्विलोक्य शरणाशया तत्रोपसृतानस्मानकस्मादापतिताः परःशता असिताङ्गाः पुरुषाः समुपगम्य

सहचराः यस्य, सोऽहं सिन्धुवादः, दैवात् = भाग्यात्, एकम्, फलकं = काष्ठपट्टिकाम्, आरुह्य = समधिरुह्य, वीचिवेगेन-वीचिनां = तरङ्गानां, वेगेन = जवेन, समुह्यमानः = धार्यमाणः, एकत्र = एकस्मिन्, द्वीपे, प्रक्षिप्तः = पतितः, कानिचित्, फलानि, सम्भुज्य = समास्वाद्य, प्रस्रवणाम्भः = निर्झरस्य, अम्भः = जलं, पीत्वा = पानं कृत्वा, किञ्चित् = स्तोकं, समुच्छ्वसितः = निःश्वसन्, शुचा = दुःखेन, आर्तः = पीडितः, क्षीणबलतया-क्षीणं = नष्टं, बलं = शक्तिः यस्य सः क्षीणबलः तस्य भावः क्षीणबलता, तया = दौर्बल्येन, द्वीपस्थानि = द्वीपे वर्तमानानि, वस्तूनि = पदार्थान्, अवलोकयितुम् = द्रष्टुमपि अनुत्सहमानः अनिच्छन्निति भावः। तत्रैव = तस्मिन्नेव,सिन्धुरोधसि-सिन्धोः = सागरस्य, रोधसि = तटे, निपत्य = पतित्वा, निद्रितोऽभूवम् = अस्वपम्। यामिन्यां = रात्रौ, प्रभातायां = प्रातःकालरूपेण परिणतायाम्, भगवति दिवाकरे = श्रीसूर्यनारायणे, उदिते = उदयांचलं याते, अकस्मात् = सहसा, आपतिताः = आगताः, परःशता =शताधिकाः, असिताङ्गाः = कृष्णवर्णाः पुरुषाः, प्रबुध्यमानान्= जागरणं कुर्वतः इतस्ततः विचरतः = विचरणशीलान्, कांश्चित् = कतिपयान्, वसतः = कृतनिवासान् दूरात्, विलोक्य = दृष्ट्वा, शरणाशया = रक्षणस्य, आश्रयस्य, आशया, तत्र = तस्मिन् द्वीपे, उपसृतान् = अग्रे प्रसर्पतः, अस्मान्

होकर लहरों के वेग से बहता हुआ एक द्वीप पर फेंका गया। वहाँ कुछ फल खाकर और झरने का पानी पीकर मैं कुछ साँस ले सका। किन्तु शोक से व्याकुल मेरी शक्तिक्षीण होने के कारण द्वीप में स्थित वस्तुओं को देखने का उत्साह मुझमें नहीं रह गया था। अतः वहीं पर समुद्र के किनारे सो गया। रात्रि व्यतीत होने तथा प्रातःकाल सूर्योदय होने पर हम लोग जाग गये और इधर-उधर विचरण करनेवाले वहाँ दूर से ही कुछ बस्तियों के लोगों को देखकर शरण की आशा से उनकी ओर बढ़ने लगे। ऐसी अवस्था में हमें देखकर सैनिक खड्गधारी

बन्दिनोऽकार्षुः, गणशश्चास्मान् विभज्य स्वगृहाभिमुखभिजग्मुः।

अहं पञ्चभिरपरैः सहचरैः सहैकं गृहमनायिषि। अथ ते काल-पुरुषाः कानिचिद् वृक्षमूलानि वितीर्यास्मान् संकेतैस्तानि भक्षयितुं प्रेरयामासुः। स्वयं तान्यनास्वाद्य केवलमस्मतांस्तानि भोक्तुम् कृतानुरोधाँस्तान् वीक्ष्य शङ्काकुला अपि क्षुधाऽऽतुरा मत्सहचरा यथेच्छं

= यात्रिणः, समुपगम्य = प्राप्य, बन्दिनः अकार्षुः पारतन्त्र्ये निगडितवन्तः, गणशश्च = अनेकेषु च समूहेषु अस्मान् = यात्रिणः, विभज्य = पृथक कृत्वा, स्वगृहाभिमुखम् = निजगृहं समुद्दिश्य, अभिजग्मुः = गतवन्तः।

अहं = सिन्धुवादः, पञ्चभिः, अपरैः = इतरैः, सहचरैः = सहयात्रिभिः, सह = सार्धम्, एकम् = अन्यतमं, गृहं = कक्षाम्, अनायि = नीतः। अथ = पश्चात्, ते = पूर्वोक्ताः, कालपुरुषाः = नरान्तकाः, वृक्षमूलानि = वृक्षाणं मूलानि, वितीर्य = दत्वा, अस्मान् सहयात्रिणः, सङ्केतैः = चेष्टाभिः, तानि = वृक्षमूलानि, भोक्तुम् = आस्वादयितुम्, कृतानुरोधान्-कृतः = विहितः, अनुरोधः = निवेदनं, यैः तान्, वीक्ष्य = दृष्ट्वा, शङ्काकुलाः, अपि = सन्देहग्रस्ताः अपिः, क्षुधया = बुभुक्षया, आतुराः = व्याकुलाः,मत्सहचराः = मम सुहृदः, यथेच्छं = यथाकामं तानि = वृक्षमूलानि, जघसुः = भक्षितवन्तः। अहं तु तान् = कालपुरुषान्, सन्दिहानः = शङ्कमानः, तानि, प्रत्यादिशम् = निषेधितवान्। अस्मत्सहचराः = मम सहयात्रिणः, तानि = वृक्षमूलानि, भुक्त्वा = जग्ध्वा, अचिरात् = शीघ्रं विस्मृतात्मानः-विस्मृतः आत्मा, यैस्ते किमपि = अव्यक्तं, प्रलपितुम् = प्रलापं कर्तुम्, आरभन्त = उपाक्रमन्त तैश्च = कालपुरुषैः, उपहृतम् = समानीतं नारिकेलतैलपाचितं =नारिकेलतैलेन विंहितपाकम्, ओदनं = तण्डुलं, आतृप्ति

पुरुष अकस्मात् मेरे पास आ पहुँचे और मुझे बन्दी बना लिया। हमें अनेक समूहों में विभक्त कर वे अपने घर की ओर ले गये।

मैं अन्य पाँच सहयात्रियों के साथ एक कमरे में ले जाया गया। पश्चात् वे कालपुरुष कुछ वृक्षमूलों को देकर हमें संकेतों से खाने के लिये प्रेरित करने लगे। स्वयं न खाकर केवल वे उन्हें हमें ही खाने के लिए प्रेरित कर रहे थे। उनको देखकर हमारे साथी यद्यपि शंकाकुल थे तथापि भूख से व्याकुल होकर वे उन्हें यथेच्छ खाने लगे। मैंने तो उनके प्रति सन्देह करते हुए उनका बहिष्कार किया। थोड़ी

तानि जघसुः। अहं तु तान् सन्दिहानस्तानि प्रत्यादिशम्। अचिराच्चास्मत्सहचरास्तानि भुक्त्वा विस्मृतात्मानः किमपि प्रलपितुमारभन्त। तैश्चोपहृतं नारिकेलतैलपाचितमोदनमातृप्तेरभुञ्जत। अनिच्छन्नप्यहं प्राणसन्धारणाय किञ्चिदभ्यवाहरम्।

ते हि कालपुरुषाः पुरुषादापसदा अस्मान् प्रथममोषधिविषेण विमोह्य तैलपक्वोदनेन पीवरतां नीत्वा भोक्तुमकामयन्त। एवं पीनतामापादिता-

=तृप्तिपर्यन्तम्, अभुञ्जन् = अभक्षयन्। अनिच्छन्नपि = अवाञ्छन्नपि, अहं=सिन्धुवादः, प्राणसन्धारणाय = जीवनरक्षायै, किञ्चित् = स्वल्पम्, अभ्यावाहरम् =अभक्षयम्।

हि = यतः, पुरुषादापसदाः = नीचाः मनुष्यभक्षकाः, ते कालपुरुषाः = नरान्तकाः, प्रथमम् = आदौ, अस्मान् = सहयात्रिणः, औषधिविशेषेण = विशिष्टिप्रकारेण औषधेन विमोह्य = मोहं प्रापयित्वा, तैलपक्वोदनेन = नारिकेलतैलपाचितेनान्नेन, पीनतां = पुष्टतां, नीत्वा, भोक्तुं = भक्षयितुम्, अकामयन्त = ऐच्छन्। एवं, पीनतां = पुष्टताम्, आपादिताः = प्रापिताः, तपस्विनः = वराकाः, मम, सखायः = मित्राणि, क्रमेण = क्रमशः, तेषां = पुरुषादापसदानाम्,आमिषतां = भोज्यताम् अयासिषुः = गतवन्तः। मृत्योः = मरणस्य, भयेन = भीत्या, प्रत्यहं = प्रतिदिनं क्षीयमाणः = दुर्बलतां नीयमानः, अत्यल्पं = स्वल्पतमम्, अश्नन् = भुञ्जानः, अस्थिपञ्जरावशेषः-अस्थ्नां पञ्जरमेव अवशेषो यस्य सः, मत्पीवरतनुतां-मम, पीवरा = पुष्टा, या तनुः = शरीरं तस्याः भावः मत्पीवरतनुता, ताम्, प्रतीक्षमाणैः = प्रतीक्षां कुर्वाणैः, कञ्चन = स्वल्पं, कालं = समयं, विमुक्तः = परित्यक्तः, स्वच्छन्दं = स्वेच्छानुरूपं, चरितुं = भ्रमितुमपि, अनुमतः = अभ्यनुज्ञातः, कमपि समयं =

देर में मेरे साथी उन्हें खाकर स्वयं को भूलते हुए कुछ प्रलाप करने लगे। और उनके द्वारा दिये हुये नारियल के तेल में पके हुए चावल का उन्होंने आकंठ भोजन किया। न चाहते हुए भी मैंने प्राण-रक्षा के लिए कुछ खाया।

वे अधम नरभक्षी हमलोगों को पहले विशेष प्रकार की औषधि से बेहोश कर फिर तेल से पके हुए चावल खिलाकर हृष्ट-पुष्ट करते हुए खाना चाहते थे। इस प्रकार हृष्ट-पुष्ट होकर मेरे बेचारे मित्र क्रम से उनके भक्ष्य बन गये। मैं तो मृत्यु के भय से प्रत्येक दिन दुर्बल होता हुआ अत्यन्त स्वल्प भोजन करने से अस्थिपंजर

स्तपस्विनो मम सखायः क्रमेण तेषामामिषतामयासिषुः। अहं तु मृत्योर्भयि प्रत्यहं क्षीयमाणोऽत्यल्पमश्नन्नस्थिपञ्जरावशेषो मत्पीवरतनुतां प्रतीक्षमाणैस्तैः कञ्चन कालं विमुक्तः स्वच्छदं चरितुमप्यनुमतः कमपि समयं चिन्तासन्ततमनैषम्।

एवं लब्धावसर एकस्मिन् वासरे तां वसतिं विहाय पलायने मतिं व्यधाम्। मन्निरीक्षणकार्यनियोजितेनानुमितमत्पलायनाभिप्रायेण स्थविरेणैकेन परावर्तितुम् समाहूयमानोऽपि त्वरितगतिस्तस्य दृशोर-

स्वल्पं कालं, चिन्तासन्ततं = निरन्तरचिन्तायुक्तम्, अनैषम् = नीतवान्।

एवम्, लब्धावसरः-लब्धः = प्राप्तः, अवसरः = कालः येन सोऽहं सिन्धुवादः। एकस्मिन् = अपरस्मिन्, वासरे = दिवसे, तां वसतिं = निवासभूमिं, विहाय = परित्यज्य, पलायने, मतिं = बुद्धिं, व्यधाम् = अकुर्वन्, मन्निरीक्षणकार्यनियोजितेन-मां निरीक्षितुं नियुक्तेन, अनुमितमत्पलायनाभिप्रायेण अनुमितः = सम्भावितः मम पलायनस्य अभिप्रायः = आशयः येन तेन, एकेन = अन्यतमेन, स्थविरेण = वृद्धेन, परावर्तितुं समाहूयमानः = अमान्त्र्यमानोऽपि, त्वरितगतिः-त्वरिता = वेगशीला, गतिः = गमनं यस्य, एवम्भूतः सन्, तस्य = स्थविरस्य, दृशोः = नेत्रयोः, आगोचरः = अविषयः, अभवम्। सप्त, वासरान् = दिवसान्, निरन्तरं = सततं, प्रधावमानः = पलायमानः तत्र = द्वीपे, उपलब्धैः = प्राप्तैः भूरिभिः = प्रचुरैः नारिकेलफलैः केवलं निवारितक्षुत्पिपासः- क्षुत् च पिपासा च क्षुत्पिपासे निवारिते = शमिते, क्षुत्पिपासे = बुभुक्षा जलपानेच्छा च येन सः, प्रतिक्षणं = प्रतिपलं मदन्वेषणपराणां-मम अन्वेषणे संलग्नानां, तेषां = नरभक्षिणाम् आसंत्तिं = सामीप्यं, विशङ्कमानः = तर्कयन्,

मात्र रह गया। वे मेरे हृष्ट-पुष्ट होने की प्रतीक्षा कर रहे थे। कुछ समय के लिये मुझे छोड़ दिया गया था तथा स्वच्छन्द विचरण के लिये मुझे अनुमति मिली थी। इस प्रकार मैंने कुछ समय निरन्तर चिन्ता में व्यतीत किया।

एक दिन अवसर मिलने पर मैं वह स्थान छोड़कर भागने का विचार करने लगा। मेरे निरीक्षण के लिये नियुक्त एक वृद्ध जो मेरे भागने के विचार का अनुमान लगा चुका था, उसके द्वारा वापस बुलाये जाने पर भी मैं अपनी गति तेज करता हुआ उसकी आँखों से ओझल हो गया। निरन्तर सात दिन तक

गोचरोऽभवम्। सप्तवासरान् निरन्तरं प्रधावमानस्तत्रोपलब्धैर्भूरिभिर्नारिकेलफलैः केवलं निवारितक्षुत्पिपासः प्रतिक्षणं मदन्वेषणपराणां तेषामासत्तिं विशङ्कमानः कथमप्यष्टमे दिवसे सिन्धुतटमुपगतः कांश्चित् सिताङ्गान् जनान् प्रचुरमरिचनिचयव्यापृतान् विलोक्य निर्भयं तानुपासरम्।

"कुतो भवान्?" इति मद्देशभाषायां पृच्छतस्तानुदितप्रहर्षोऽहं निखिलं स्वागमप्रकारमकथयम् नराशनमुखगतस्यापि मम ततो विमुक्तिवृत्तान्तमाकर्ण्य विस्मितास्ते सानन्दं मामभ्यनन्दन्।

कथमपि = केनापि कष्टसाध्येन उपायेन अष्टमे दिवसे सिन्धुतटं = समुद्रतीरम् उपागतः = प्राप्तः, कांश्चित् = कतिपयान्, सिताङ्गान् = श्वेतववर्णान्, जनान् = मनुष्यान् प्रचुरमरिचनिचयावचयव्यापृतान् -प्रचुरः = बहुलः यः मरिचनियचः = मरिचराशिः, तस्य अवचये = सञ्चये, व्यापृताः तान् विलोक्य = दृष्ट्वा, निर्भयं = निःशङ्कः, तान् = सिताङ्गान् जनान्, उपासरम् = उपसर्पम्। भवान्, कुतः = कस्मात् स्थानात् (समागतः इत्यध्याहार्यम्)। इति मद्देशभाषायां = मम मातृभाषयां, पृच्छतः अहं = सिन्धुवादः, निखिलं = पूर्णं, स्वागमप्रकारं = निजागमविधानं, अकथयम् = अवर्णयम्। नराशनमुखगतस्य-नराशनां = नरभक्षिणां पुरुषाणां, मुखेषु, गतः = प्राप्तः तथाविधस्यापि, मम, ततः = तस्मत् स्थानात्, विमुक्तिवृतान्तम् = विमुक्तेः वृत्तम्, आकर्ण्य = श्रुत्वा, विस्मिताः = आश्चर्यचकिताः, ते = श्वेतपुरुषाः, माम्, सानन्दम् = आमोदपूर्वकम्, अभ्यनन्दन् = प्रशशंसुः।

दौड़ता हुआ मैं वहाँ पर प्रचुर मात्रा में उपलब्ध नारियल के फलों से ही केवल भूख-प्यास बुझाता रहा, प्रत्येक क्षण मेरी खोज में लगे हुए उनके पास में आने की शंका करता हुआ मैं किसी प्रकार आठवें दिन समुद्र के किनारे पहुँचा। वहाँ पर कुछ गौरवर्ण पुरुषों को मिर्च की राशि को प्रचुर मात्रा में एकत्रित करते हुए देखकर निर्भय होकर उनके पास पहुँचा।

"आप कहाँ से आ रहे हैं?" इस प्रकार मेरी देशभाषा में पूछनेवाले उन लोगों को मैंने प्रसन्न होकर अपने आगमन का सम्पूर्ण वृत्तान्त सुनाया। नरभक्षी के मुख में जाने पर भी मेरी मुक्ति की कहानी सुनकर वे आश्चर्यचकित और आनन्दित होकर मेरा अभिनन्दन करने लगे।

अथ तैः सह कानिचिदहानि मरिचसञ्चयकर्मणि तत्रातिवाह्य प्रवहणमधिरूढस्तेषां निवासभुवं द्वीपमेकमुपागतस्तैः सकुतुकं तत्रत्यनरपतिं सम्प्रापितोऽभवम्, स च परमोदाराशयोऽस्मद्वृत्तान्तश्रवणविस्मितात्मा मह्यमुपहृतनववसनो मां समाराधयितुमधिकृतान् समादिदेश। तत्र च समृद्धे द्वीपे महनीये गृहे वसन् प्रत्यहमभिवर्धमानराजप्रसादो राजानुवर्तिभिरधिकारिभिरिभ्यैर्जनैश्च सहोपचितस्नेहः सुखेनावात्सम्।

अथ = पश्चात्, तत्र = द्वीपे, तैः = सिताङ्गैः जनैः सह मरिचसञ्चयकर्मणि = मरिचानामेकत्रीकरणस्य कार्ये, कानिचित्, अहानि = दिनानि, अतिवाह्य = व्यतीत्य, प्रवहणं = जलयानम्, अधिरूढः, तेषां = जनानां, निवासभुवं = वसतिस्थलीम्, एवं द्वीपम् उपागतः = समायातः, तैः = जनैः, सुकुतुकं = कौतूहलपूर्वकं, तत्रत्यं = तन्निवासिनं, नरपतिं = राजानं, सम्प्रापितोऽभवम्। ते जनाः मां तत्रत्यनरपतेः सविधे प्रापयन्ति स्म इत्यर्थः। परमोदाराशयः परमः = अत्यन्तं, उदारः = औदार्यपूर्णः, आशयः = स्वभावः यस्य सः, सः = नरपतिश्च अस्मद्वृत्तान्तश्रवणविस्मितात्मा-मम सिन्धुवादस्य, वृत्तान्तस्य = सिन्धुयात्रावृत्तस्य, श्रवणेन = आकर्णनेन, विस्मितः = आश्चर्यचकितः, आत्मा यस्य सः, मह्यम्, उपहृतनववसनः-उपहृतं = प्रदत्तं, नवं = नूतनं, वसनं = वस्त्रं येन तथाभूतः सन् मां समाराधयितुं = सेवितुम्, अधिकृतान् = अधिकारिणो जनान्, समादिदेश = आज्ञापयामास। तत्र च समृद्धे = वैभवप्रचुरे, द्वीपे महनीये = विशाले, गृहे =प्रासादे, वसन् = विहतनिवासः, प्रत्यहं = प्रतिदिनम्, अभिवर्धमानराजप्रसादः-अभिवर्धमानः = एधमानः राजप्रसादः-राज्ञः प्रसादः = कृपा यस्मिन् सः, राजानुवर्तिभिः = राज्ञः अनुचरैः, अधिकारिभिः इभ्यैः =

पश्चात् उनके साथ वहाँ पर कुछ दिन मिर्च को एकत्रित करने में समय बिताकर मैं जहाज पर सवार होकर उनकी निवास भूमि के एक द्वीप पर पहुँचा और उनके द्वारा वहाँ के राजा के पास पहुँचाया गया। वह अत्यन्त उदार स्वभाव का था। मेरे वृत्तान्त को सुनकर आश्चर्यचकित होते हुए उसने मुझे नवीन वस्त्र प्रदान किये और मेरी सेवा करने के लिए अधिकारियों को आदेश दिया। उस सम्पन्न विशाल द्वीप के घर में रहते हुए प्रत्येक दिन राजा की कृपा बढ़ने लगी, राजा के अनुचर अधिकारी और सैनिकों के साथ मेरा स्नेह बढ़ने

एकदा तत्रत्यान्निखिलान् जनान् नराधिपमपि तुरगानपर्याणानवल्गानपादग्रहणीकानारोहतोऽवलोक्य विस्मितो राजानमपृच्छम्- "देव! समृद्धेऽत्र भवद्राज्ये कथं तुरङ्गमाः पर्याणवल्गापादग्रहिकाभिरसज्जिताः समारुह्यन्ते?" इति। स तु तेषां नामाप्यजानन् व्यस्मयत।

अथाहं लोहचर्मकारानुपेत्य प्रदर्शितादर्शस्तान्यश्वपर्याणादीनि सम्पाद्य नृपाय समुपाहरम्। स च तैः स्ववाह्यम् तुरङ्गममलङ्कृत्य तमधिरूढः

धनिकैः,'इभ्य आढ्यो धनी स्वामी' इत्यमरः। जनैः = लोकैः सह उपचितस्नेहः- उपचितः वृद्धिङ्गतः, स्नेहः = प्रेमा यस्य सः, सुखेन = आनन्देन अवात्सम् = निवासमकुर्वम्।

एकदा = एकवारं तत्रत्यान् = तन्निवासिनः, निखिलान् = समस्तान् जनान्, नराधिपं = राजानमपि, अपर्याणान् = पर्याणरहितान्, अवल्गान् = मुखरज्जुरहितान् अपादग्रहणीकान् = पादारोहणरहितान्, तुरङ्गान् = अश्वान्, आरोहतः = अधिरुढ़ान्, अवलोक्य = दृष्टवा, विस्मितः = आश्चर्यान्वितः, राजानं = तद्द्वीपाधिपतिं, अपृच्छम् = पृष्टवान्।

"देव = राजन्!" समृद्धे = वैभवशालिनि, अत्र, भवद्राज्ये, कथं, तुरङ्गमाः = अश्वाः, पर्याणवल्गापादग्रहणिकाभिः-पर्याणं च वल्गा च पादग्रहणिका चेति पर्याणवल्गापादग्रहणिकाः (इतरेतरद्वन्द्वः) ताभिः, असज्जिताः = अनलङ्कृताः, समारुह्यन्ते = समुपविश्यन्ते इति। स तु = नरपतिः, तेषां = पर्याणादीनां नाम अपि, अजानन् = अज्ञात्वेत्यर्थः। व्यस्मयत = आश्चर्यचकितोऽभूत्।

लगा। इस प्रकार मैं वहाँ सुखपूर्वक रहने लगा।

एक बार वहाँ पर मैंने सम्पूर्ण लोगों को तथा राजा को भी ऐसे घोड़ों पर सवार होते हुए देखा जिनपर न तो जीन थी, न तो लगाम थी और न तो पावदान था। यह देखकर आश्चर्यचकित होते हुए मैंने राजा से पूछा-

"महाराज! आपके इस सम्पन्न राज्य में लोग किस प्रकार बिना जीन, लगाम और पादग्राहिका (पावदान) के ही घोड़ों पर सवार होते हैं?"

वह तो उनका नाम तक नहीं जानता था। यह सुनकर मैं आश्चर्यचकित हो गया।

पश्चात् मैंने लोहार और चर्मकारों के पास जाकर उन्हें नमूना दिखाते हुए उनके द्वारा जीन आदि बनवाकर राजा को उपहारस्वरूप अर्पित किये। उसने

प्रसन्नमना बहुपारितोषिकं मह्यम् व्यतरत्। अथाधिकारिभिरिभ्यजनैश्चान्यैः सम्प्रार्थितस्तानि पर्याणादीनि विरचय्य तेभ्य उपहृत्य तैः प्रसन्नमानसैः प्रदत्तं विपुलं वसु समुपार्जयम्। सर्वेषां च स्नेहपात्रमभवम्।

प्रत्यहं राजसभामुपासीनं मामेकस्मिन्नहनि भूपतिरुवाच-

"आर्य! भवन्तं गुणाकरं विलोक्योपस्निह्यतीवास्माकमन्तरात्मा

अथ = अनन्तरं, अहं = सिन्धुवादः, लोहचर्मकारान् = लोहकारांश्चर्मकारांश्च उपेत्य = सम्प्राप्य, प्रदर्शितादर्शः-प्रदर्शितः, आदर्शः = प्रतिकृति येन एवंभूतः सन् तानि अश्वपर्याणादीनि वस्तूनि, सम्पाद्य = निर्माप्य, नृपाय = तद्वीपाधिपाय, समुपाहरम् = प्रादाम्। स च = नृपः तैः पर्याणादिभिः, स्ववाह्यम् = स्वेन समारोहणीयम्, तुरङ्गमम् = अश्वम्, अलङ्कृत्य = भूषयित्वा, तं = तुङ्गमम्, अधिरूढ़ः = समुपविष्टः, प्रसन्नमनाः = प्रसन्नं मनो यस्य सः, बहु = प्रचुरम्, पारितोषिकं = समुपहारं, मह्यमिति दानार्थे चतुर्थी। व्यतरत् = समर्पयत्, अथ = पश्चात् अधिकारिभिः, अन्यैश्च, इभ्यजनैः = धनिकनागरिकैः सम्प्रार्थितः = निवेदितः, तानि पर्याणादीनि = अश्वालङ्करणानि, विरचय्य = निर्माप्य, तेभ्यः = अधिकारिभ्यः धनिभ्यश्च, उपहृत्य प्रसन्नमानसैः = प्रहृष्टान्तरङ्गैः तैः प्रदत्तं, विपुलं = बँहुलं वसुं = धनं, समुपार्जयम् = समपादयन्। सर्वेषां च स्नेहपात्रम् अभवम् = आसम्।

प्रत्यहं = प्रतिदिनं, राजसभाम्, उपासीनं = समुपस्थितं, मां = सिन्धुवाम्, एकस्मिन्नहनि = एकदिने, भूपतिः राजा, उवाच = कथयामास।

"आर्य! भवन्तं = त्वां गुणाकरं -गुणानाम् आकरं = निधिं विलोक्य = दृष्ट्वा, अस्माकं सर्वेषाम् अन्तरात्मा, उपस्निह्यतीव = प्रेम्णा द्रवीभवतीत्युत्प्रेक्षालङ्कारः

अपने वाहनयोग्य अश्व को सजाकर और उस पर आरूढ़ हो प्रसन्नचित्त से मुझे प्रचुर परितोषिक दिया। अनन्तर अधिकारियों और अन्य धनी-मानी व्यक्तियों द्वारा प्रार्थना किये जाने पर मैंने जीन आदि का निर्माण कराकर उन्हें अर्पित किया तथा प्रसन्नचित्त होकर उनके द्वारा अर्पित विपुल धन अर्जित किया। इस प्रकार मैं सभी का स्नेहभाजन बन गया।

मैं प्रतिदिन राज सभा में उपस्थित होता था कि एक दिन राजा ने मुझसे कहा-
"आर्य! आप जैसे गुणों की खान को देखकर हमारी अन्तरात्मा अत्यन्त

सर्वाश्चास्मदीयाः प्रकृतयो भवन्तमनुरक्ताः। अद्यैकस्मिन् विषये भवन्तं किञ्चिदनुरोद्धुमिच्छामि न तदार्येण प्रत्याख्येयम्'' इति।

अहं तं प्रत्यवोचम्-''सर्वथा प्रभवति देवोऽस्योपकारभरक्रीतस्य शरीरस्य। तद्यथेच्छमादेशदानेनानुगृह्यतामयञ्जन इति।''

''आर्य! भवन्तमिह कृतदारपरिग्रहं सुखिनं द्रष्टुमिच्छामि''। इत्येवंवादिनस्तस्य प्रणयप्रार्थनामिमां प्रत्यादेष्टुमसञ्जातसाहसोऽहं

सर्वाश्च = सकलाश्च, अस्मदीयाः = मामकीनाः, प्रकृतयः = पौरश्रेणयः, प्रजा इत्यर्थः। 'प्रकृतयः पौराणां श्रेणयोऽपि चे' त्यमरः। भवन्तं = त्वाम्, अनुरक्ताः = प्रेम्णा द्रवीभूताः। अद्य, एकस्मिन् विषये, भवन्तं, किञ्चित् अनुरोधं = निवेदितुम्, इच्छामि = वाञ्छामि। तत् = निवेदनम् आर्येण-श्रीमता न प्रत्याख्येयम् = न निषेधितव्यम् इति''।

अहं तं = नरपतिं, प्रत्यवोचम् = प्रत्युदतरम्। ''देव = श्रीमान्, उपकाभरक्रीतस्य = उपकारभरैः विहितक्रयस्य, अस्य = एतस्य, शरीरस्य = देहस्य, सर्वथा = सर्वप्रकारेण, प्रभवति = समर्थोऽस्ति, तत् = तस्मात् कारणात्, अयं जनः = एष मानवः, यथेच्छम् = इच्छापूर्वकम्, आदेशदानेन = आज्ञाप्रदानेन, अनुगृह्यताम् = प्रसाद्यताम्'' इति सिन्धुवादस्य विनयोक्तिः।

''आर्य! इह = अस्मिन् द्वीपे, भवन्तं = त्वां, कृतदारपरिग्रहं-कृतः = विहितः दाराणां = भर्यायाः ''भर्या जायाऽपि पुंभूम्नि दाराः स्यात्'' इत्यमरः। परिग्रहः = स्वीकारो येन तम्, विवाहितमित्यत्यर्थः, सुखिनम् = आनन्दितम्, द्रष्टुम् = अवलोकयितुम् इच्छामि। इत्येवंवादिनः तस्य = नृपस्य, इमां = दारपरिग्रहविषयिणीं प्रणयप्रार्थनां = प्रेमपूर्वकं निवेदनं प्रत्यादेष्टुं = निराकर्तुम्

प्रसन्न होती है। हमारी सम्पूर्ण प्रजा आप पर अनुरक्त है। आज मैं एक विषय पर आपसे कुछ अनुरोध करना चाहता हूँ। आप उसको अस्वीकरा न करें।"

मैंने उन्हें उत्तर दीया–आपने मेरा यह शरीर उपकारों के भार से खरीद लिया है। महाराज का इस पर पूरा अधिकार है अतः आप इस व्यक्ति पर स्वेच्छापूर्वक आदेश का अनुरोध करते हुए कृपा करें।

"आर्य! मैं चाहता हूँ कि आप विवाह करें और सुखी हों।"

इस प्रकार जब वे मुझसे प्रेमपूर्वक अनुरोध करने लगे, तब मैं उनकी प्रेम

'यथाज्ञापयति देव' इति तदभ्युपागमम्। अथैकया तरुण्या रमण्या कृतोद्वाहस्तया सह गार्हस्थ्यसुखमनुभवन्नपि जन्मभूमिस्नेहेन बलवत्तरेण प्रेरितस्ततोपसरणावसरं प्रतीक्षमाणः कालं कञ्चनाक्षपयम्।

एवं मयि ततः पलायनोपायन्वेषणपरायणे कस्यचिदस्मत्प्रणयिनः प्रातिवेशिकस्य भार्या रुगार्ता सहसाऽम्रियत। तं च शुचा व्याकुलं समाश्वासयितुं गतः 'चिरञ्जीव' इति वदन्नहं तेनोक्तः-

"प्रत्यादेशो निराकृतिः" इप्यमरः। असञ्जातसाहसः-न सञ्जातं = न समुत्पन्नं, साहसं = धैर्य यस्य सोऽहं सिन्धुवादः, देव = श्रीमान्, यथा = येन प्रकारेण आज्ञापयति = आदिशति (तथैव करोमिति अध्याहार्यम्)। इति, तत् = निवेदनम्, अभ्युपागमम् = स्वीकृतवान्। अथ पश्चात् एकया = अन्यतमया, तरुण्या = युवत्या, रमण्या = सुन्दर्या स्त्रिया,कृतोद्वाहः = विवाहं कृत्वा, तया = रमण्या सह, गार्हस्थ्यसुखं = गृहस्थाश्रमोचितमानन्दम्, अनुभवन् = उपभुञ्जन्नपि, बलवत्तरेण = अत्युत्कटेन, जन्मभूमिस्नेहेन = मातृभूमिप्रेम्णा प्रेरितः, ततः तस्माद्द्वीपात्, अपसरणावसरं = निर्यमनवेलां प्रतीक्षमाणः = प्रतीक्षां कुर्वन्, कञ्चन कालं अक्षपयम् = अयापयम्।

एवम् = अनेन प्रकारेण, मयि सिन्धुवादे, ततः = तस्माद्, द्वीपात्, पलायनोपायान्वेषणपरायणेः-पलायनस्य उपायानाम्, अन्वेषणे = तत्परे सति, कस्यचित्, अस्मत् प्रणयिनः = मम स्नेहभाजनस्य, प्रातिवेशिकस्य = प्रतिवेशिनः, रुगार्त्ता = रोगपीडिता भार्या = पत्नी, सहसा = अकस्मात्, अम्रियत = प्राणांस्त्यक्तवती। शुचा = दुःखेन, व्याकुलं = व्यग्रं, तं च =

पूर्वक प्रार्थना को ठु करा न सका। "महाराज जैसी आज्ञा दें" ऐसा कहते हुए मैंने उनकी प्रार्थना को स्वीकार किया। अनन्तर एक युवती के साथ मेरा विवाह हुआ। मैं उनके साथ यद्यपि गृहस्थोचित सुख का अनुभव कर रहा था तथापि, अपनी जन्मभूमि के उत्कट प्रेम से प्रेरित होकर वहाँ से निकलने के अवसर की प्रतीक्षा करते हुए मैंने वही कुछ समय बिताया।

इस प्रकार मेरे वहाँ से भागने का उपाय खोजने के लिये उद्यत होने पर एक दिन मेरे स्नेही किसी पड़ोसी की पत्नी रोगग्रस्त होककर अकस्मात मर गयी। जब मैं उस दुःखी को आश्वासन देने के लिए गया कि "तुम चिरञ्जीवी रहो।"

"भद्र! किमिदमसम्बद्धं प्रार्थयसे? ननु घटिकामात्रावशेषो मज्जीवनावधिः, अचिरादेव प्रिययोपरतया सह भूमौ निखातो भविष्यामि। सोऽयमेतद्देशस्याचारो यद्दम्पत्योरेकस्मिन् मृतेऽपरोऽपि तेन सार्धं भूमिसात् क्रियते। सर्वैरपि जनैरलङ्घनीयोऽयं नृशंसः समुदाचार इति।

ईदृशनृशंसाचारश्रवणसञ्जातसाध्वसे मयि तस्य सम्बन्धिनो बान्धवाः सखायः प्रतिवेशिनश्च तदौर्ध्वदैहिककर्मसंविधानाय समाजग्मुः, तां च

प्रातिवेशिकं समास्वासयितुम् = आश्वासनं प्रदातुम्, गतः = प्रयातः "चिरं = बहुकालपर्यन्तं, जीव = प्राणाम् धारय" इत्येव वदन् = कथयन् तेन प्रातिवेशिकेन, उक्तः कथितः-ननु, मज्जीवनावधिः-मम जीवनस्य, अवधिः = कालः, घटिकामात्रावशेषः-घटिकामात्रमवशेषो यस्य तथाभूतो वर्तत इति शेषः। अचिरादेव = स्वल्पेनेव समयेन, उपरतया = मृतया, प्रियया = प्रेयस्या, सह = साकं, भूमौ = पृथिव्यां, निखातो भविष्यामि = भूगर्भस्थो भविश्यामीत्यर्थः। सोऽयं, एतद्देशस्य = एतद्राष्ट्रस्य, आचारः = व्यवहारः, यत् दम्पत्योः एकस्मिन् मृते = उपरते, अपरः = इतरोऽपि,तेन = मृतेन, साकं = सह, भूमिसात् क्रियते। सर्वैरपि जनैः = एतद्वीपस्थैः सकलैरपि मनुष्यैः, अनुलङ्घनीय = लङ्घयितुमशक्यः, नृशंसः = क्रूरः, समुदाचारः = देशाचार इति। मयि = सिन्धुवादे, ईदृशनृशंसाचारश्रवणसञ्जातसाध्वसे-

ईदृशः = एवंविधः, नृशंसः = क्रूरः, 'नृशंसो घातुकः क्रूरः' इत्यमरः। यः आचारः = देशव्यवहारः, तस्य श्रवणेन = आकर्णनेन, सञ्जातं = समुत्पन्नं, साध्वसं = भयं यस्य, तस्मिन् सति, तस्य सम्बन्धिनो बान्धवाः सखायः तदौर्ध्वदैहिककर्मसंविधानाय-तस्य = प्रतिवेशिकस्य, यत् और्ध्वदैहिकं कर्म =

तो उसने मुझसे कहा-

"मित्र! तुम यह क्या असंगत कामना कर रहे हो, अरे मेरे जीवन की तो कुछ ही घड़ियाँ शेष हैं। अतिशीघ्र ही अपनी प्रेयसी के साथ जनीन में गाड़ा जाऊगाँ। क्योंकि यह हमारे देश की परम्परा ही है कि पति पत्नी में से एक के मरने पर दूसरे की भी उनके साथ गाड़ा जाता है। इस नृशंस परम्परा का कोई भी उल्लघंन नहीं कर सकता।"

इस नृशंस परम्परा को सुनकर मैं घबड़ा गया। उसी समय उसके सम्बन्धी बान्धव, मित्र और पड़ोसी अन्तयोष्टि क्रिया सम्पन्न करने के लिए आये।

तस्योपरतां भार्याम् महार्घनेपथ्येन सञ्छाद्य विभूष्य च समग्रैरलङ्करणैः शवयाने बद्ध्वा शोकोचितनेपथ्येन तद्भर्त्रा सम्बन्धिबान्धवैश्च समनुसृतामदूरवर्तिनोऽत्युच्चस्यैकस्य शिखरिण उपत्यकां नीत्वाऽपनीतपिधान एकत्र महागर्ते रज्जुभिरवातारयन्। तदनु तस्याः पतिमापृष्टबान्धवगणमविहितप्रतिबन्धलेशं तत्रैव शवयाने पार्श्वनिहिताशनजलपूर्णकलशे निवेश्य तस्मिन्नेवातिगभीरे गर्तेऽवतार्य गर्तमुखञ्च शिलया समाच्छाद्य

अत्येष्टिसंस्कारः, तस्य संविधानाय = सम्पादनाय समाजग्मुः, तस्य प्रतिवेशनिः, उपरतां = मृतां तां च भार्यां = पत्नीं,महार्घनेपथ्येन = बहुमूल्यवेषेन, संच्छाद्य = समावृत्य, समग्रैः = पूर्णैः, अलङ्करणैः = विभूषणैः, विभूष्य च = समलङ्कृत्य च, शवयाने बद्ध्वा = निगडयित्वा, शोकोचितनेपथ्येन-शोकस्य = दुःखस्य, उचितं = योग्यं, नेपथ्यं = वसनं यस्य तेन। तद्भर्त्रा = तस्य पत्या, सम्बन्धिबान्धवैश्च = सम्बन्धिभिः बान्धवैश्च समनुसृतां = अनुगमशालिनीम्, अदूरवर्तिनः = समीपस्थितस्य, अत्युच्चस्य = उन्नततमस्य एकस्य शिखरिणः = पर्वतस्य, उपत्यकां = आसन्नवर्तिनीं भूमिं नीत्वा, अपनीतपिधने-अपनीतं = दूरीकृतं पिधानम् = आच्छादनं "आपिधनतिरोधानपिधानाच्छादनानिच" इत्यमरः। यस्य तस्मिन् एकत्र,महागर्ते = विशालबिले, रज्जुभिः, अवातारयन् = अवतारयन्ति स्म। तदनु, आपृष्टबान्धवगणम् -आपृष्टः बान्धवगणः येन तम्, अविहितप्रतिबन्धलेशम् -अविहितः प्रतिबन्धलेशः येन तम्, तस्याः = स्त्रियः, पतिं = भर्तारं, पार्श्वनिहिताशनजलपूर्णकलशे-पार्श्वे = निकटे, निहिते = स्थापिते, अशनं = भोजनं जलपूर्णकलशश्च यस्मिंस्तस्मिन्, तत्रैव = पूर्वोक्त एव, शवयाने, निवेश्य = उपवेश्य, तस्मिन्नेव अपनीतपिधाने, अतिगभीरे =

उन्होंने उसकी मृत भार्या को अमूल्य वस्त्रों से ढका और समग्र अलंकारों से सजाया और शवयान पर बाँधा। उसके पीछे तत्कालोचित वेष धारण कर उसका पति एवं उसके सम्बन्धीजन जा रहे थे। वे उस शव को निकटस्थ एक अत्युच्च पर्वत की घाटी पर ले गये और एक बड़ी खाई में उसके ऊपर का ढक्कना हटाकर रस्सियों से उस शव को नीचे उतार दिया। पश्चात उसके पति को जब बन्धु-बान्धओं ने बिदा दी और सभी प्रतिबन्ध हटा दिये तब उस निरीह को भी उसी शवयान में जिसके निकट भोजन-सामग्री और जलपूर्ण कलश रखा

स्वं स्वं गृहमयासिषुः। ईदृक्क्रूचारनित्यपरिचिततया सर्वथाऽनाकुलांस्तांस्तद्बान्धवान् विलोक्य विस्मयोद्वेगशबलस्वान्तोऽहं नितरां कुण्ठितमतिरभवम्। राजानं च तमवोचम् -"देव! जीवितजननिखननाचारमिमं जगति क्वचिदप्यदृष्टश्रुतपूर्वं भवद्राज्ये प्रचलन्तं वीक्षमाणस्य मम दलतीव हृदयम्। अमानुषः सोऽयं समुदाचार" इति।

अतलस्पर्शिनि, गर्ते, अवतार्य, गर्तमुखं च = महागर्तस्य द्वारं च, शिलया = पाषाणेन, समाच्छाद्य = समावृत्यं, स्वं स्वं गृहं = निजगृहं प्रति, अयासिषुः = परावर्तन्त। ईदृशक्रूराचारनित्यपरिचिततया-ईदृशः = एवंविधः, क्रूरः यः आचारः = देशव्यवहारः, तेन नित्यं = प्रत्यहं परिचितः, तस्य भावः तया, सर्वथा, अनुकूलान् = निःशङ्कान् तान् तद्बान्धवान्, विलोक्य= दृष्ट्वा, विस्मयोद्वेगशबलस्वान्तः-विस्मयेन उद्वेगेन, शबलं = मिश्रित, स्वान्तं = हृदयं यस्य सोऽहं सिन्धुवादः, नितराम् = अत्यन्तं, कुण्ठितमतिः, कुण्ठिता = निष्क्रिया, मतिः = बुद्धिः, यस्यैवम्भूतोऽभवम्। राजानं अवोचम् = अकथयम्।

"देव! = राजान्, इमं जीवितजननिखननाचारं-जीवितानां = सप्राणानां, जनानां = लोकानां, निखननस्य = भूमिसात्करणस्य आचारं = देशव्यवहारम्, जगति क्वचिदपि, अदृष्टश्रुतपूर्वं = पूर्वमनवलोकितमनाकर्णितश्च, भवद्राज्ये, प्रचलन्तं = प्रवर्तमानं, वीक्षमाणस्य = अवलोकितवतो मम (सिन्धुवादस्य) हृदयं = तेतः, दलतीव = स्फुटतीव, अमानुषः = मनुष्येतरः राक्षसोचितः, सोऽयं = पूर्ववर्णितः, समुदाचारः = देशाचारः" इति।

हुआ था, बैठते हुए उसी गहरी खाई में उतारकर और उसके मुँह को चट्टान से ढककर वे लोग अपने-अपने घर चले गये! उसके बन्धु-बान्धव इस प्रकार के क्रूर आचरण से नित्य परिचित होने के कारण जरा भी व्याकुल नहीं थे। उन्हें देखकर मेरा मन विस्मय और उद्वेग से भर गया और मेरी मति कुण्ठित हो गयी। मैंने राजा से कहा-

"महाराज! मैंने दुनियाँ में कहीं भी जीवित व्यक्ति को गाड़ने की क्रूर परम्परा न तो देखी थी और न सुनी थी। इसे आपके राज्य में प्रचलित होते हुए देखकर मेरा अन्तःकरण विदीर्ण हो रहा है। यह आचरण अत्यन्त अमानवीय है।" उसने कहा-

सोऽब्रवीत्- आर्य! किमत्र क्रियतामनुल्लङ्घनीये नियमे? एतेन खलु नियमेन सर्वानप्यधिकुर्वताऽहमपि संयतोऽस्मि। दुर्दैवाद्यदि देवीमतिजीवेयं मयापि सैवेयं गतिर्निर्विवादमनुगन्तव्या'' इति।

अहं पुनरवदम्-'देव! किमेष नियमो वैदेशिकेष्वपि प्रवर्तते? स उवाच-''अथ किं? नियममेतद, द्वीपवर्तिसर्वजनसाधारणोऽयं नियमो न केनाप्युल्लङ्घनीय'' इति।

एतदाकर्ण्य चिन्ताक्रान्तोऽहं खिन्नमना गृहं परावर्ते। दैवात् भार्या

सोऽब्रवीत् = राजा प्रावोचत्- "आर्य! अनुलङ्घीनीये = लङ्घयितुमशक्ये, अत्रनियमे = विधाने, किं क्रियतां? सर्वानपि = द्वीपनिवासिनोऽपि, अधिकुर्वता = शासितवता, एतेन = ईदृशेन खलु नियमेन, अहमपि द्वीपाधिपतिः संयतः = बद्धोऽस्मि। दुर्दैवात् = दुर्भाग्यात्, यदि देवीम् अतिजीवेयम् = यदि देव्या अनन्तरं जीवेयम्, मत् पूर्वं यदि देवी म्रियतेत्यर्थः। ममापि सैवेयं गतिः = अनुमरणरूपा, निर्विवादं = निःसन्देहम् अनुगन्तया = अनुसर्तव्या इति।

अहं पुनः अवदम् = अपृच्छम्। 'देव! श्रीमान् एष नियमः = अनुमरणरूपोऽयं विधिः, वैदेशिकेष्वपि = विदेशनिवासिष्वपि प्रवर्तते किम् = प्रचलति किम्?

स उवाच = राजा प्रत्युदतरत्- "अथ किम्? नियमं, एतद्द्वीपवर्तिसर्वजनसाधारणः एतस्मिन् द्वीपेवर्तिनां सर्वेषां जनानां साधारणः (समानः) अयं नियमः। केनापि = जनेन न, उल्लङ्घनीयः = उल्लङ्घयतिुं न शक्यः'' इति।

एतत् = इदम्, आकर्ण्य = श्रुत्वा, चिन्ताक्रान्तः = चिन्ताभिः आक्रान्तः,

"आर्य! इस अलङ्घ्य नियम के विषय में क्या किया जा सकता है? यह नियम सभी के लिए है। और मैं भी इसके द्वारा बाँधा गया हूँ। दुर्भाग्यवश यदि महारानी के बाद में जीवित रहता हूँ तो मुझे भी निर्विवाद रूप से इसी गति का अनुसरण करना होगा।"

मैंने फिर पूछा "महाराज! क्या यह नियम विदेशवासियों पर भी लागू है? उसने कहा-"और क्या! यह नियम है, निश्चितरूप से इस द्वीप में रहनेवाले सभी लोगों के लिए समान है, इसे कोई नहीं टाल सकता।"

यह सुनकर मैं चिन्तित हुआ और खिन्न होकर घर लौटा, दुर्भाग्यवश यदि

चेत् प्रथमं म्रियेत हन्त मयाऽपि सानुगन्तव्येति विचारेण दीर्णहृदयः स्वल्पतमेऽपि तस्या अस्वास्थ्ये भृशमुद्विग्नास्तस्या भाविनिधन-मुत्प्रेक्ष्यान्तर्वेपमानचेता अतिक्लेशेन कमपि कालमत्यवाहयम्।

अथैकदा मद्दुर्दैवमहिम्ना वस्तुतः सा मदीया दयिता केनाप्य-साध्येनामयेनाक्रान्ता दिष्टान्तमवापि। अवशश्चाहं तस्याः शवेन सह दैवमाक्रोशन् सकलैः सभ्यैरिभ्यैश्च महागौरवेण स्वयं नरपतिना चानु-

---

खिन्नमनाः-खिन्नं मनः यस्य सोऽहं सिन्धुवादः, गृहं = निजसदनं परावर्ते = समागतः, 'दैवात् = भाग्यात्, भार्या = पत्नी, प्रथमं =पूर्वं, म्रियेत चेत् = यदि, तर्हि हन्तेति दुःखसूचकमव्ययम ममाऽपि सा भार्या, अनुगन्तव्या'' इति विचारेण = कल्पनया, शीर्णहृदयः-शीर्णं = विदारितं, हृदयं = चेतः यस्य सः, स्वल्पतमेऽपि = अत्यन्तं न्यूनेऽपि तस्याः = भार्याया, अस्वास्थ्ये, भृशम्, उद्विग्नः =व्याकुलः, तस्याः भावि = अनागतं, निधनं = मरणम्, उत्प्रेक्ष्य=सम्भाव्य, अन्तर्वेपमानचेताः-अन्तः = अभ्यन्तरे, वेपमानं = कम्पमानं,चेतः = अन्तःकरणं यस्य सः, अतिक्लेशेन = महता कष्टेन, कमपि कालं,अत्यवाहयम् =आगमयम्।

अथा, एकदा, मद्दुर्दैवमहिम्ना-ममदुर्दैवस्य = दुर्भाग्यस्य, महिम्ना = प्राबल्येन, वस्तुतः = यथार्थरूपेण, मदीया = मामकीना, सा दयिता = पत्नी, केनापि = अनिर्वचनीयेन, असाध्येन = अचिकित्स्येन, आमयेन = रोगेन 'उपतापरोगव्याधिगदाऽऽमया।' इत्यमरः। अक्रांता = ग्रस्ता, दिष्टान्तं = मृत्युम् 'दिष्टांतः प्रलयोऽत्ययः। अंतो नाशो द्वयोर्मृत्युः' इत्यमरः। अवाप, अवशः = पराधीनः च अहं, तस्याः = मृतभार्यायाः, शवेन = मृतदेहेन, सह दैव = भाग्यम्, आक्रोशन् = निन्दन्, सकलैः = समस्तैः, सभ्यैः = सभास्थितैः,

---

पत्नी पहले मर जाय तो मुझे भी इसका अनुसरण करना पड़ेगा। इस विचार से विदीर्ण होकर उसके जरा भी बीमार पड़ने पर मैं उद्विग्न होता था, उसकी भावी मृत्यु की कल्पना कर मेरा अन्तःकरण काँप उठ ता था और अत्यन्त क्लेश से मैं समय व्यतीत करता था।

पश्चात एक बार मेरे दुर्दैव के कारण वस्तुतः मेरी पत्नी किसी असाध्य रोग से ग्रस्त होकर मर गई। पराधीन अवस्था में मुझे उसके साथ यमपुरी पहुँचाया गया। उस समय में अपने दैव को कोस रहा था। सम्पूर्ण सभासद, धनी मानी

म्रियमाणः कृतप्राणरक्षणभिक्षः शोकार्तरावभरितदिशावकाशोऽप्यस्पृष्टनिखिलजनहृदयः पितृसदनमनीये। सवेशभूषां मद्योषां प्रथमं समुत्सृज्य मामपि सपाथेयजलं महागर्तेऽधो निधाय पिधाय च तन्मुखं सनृपाः सर्वे ततः प्रातिष्ठन्त।

अहं चाधस्तलं सम्प्राप्तो गुहामेकां निरन्तरविकीर्णशव सहस्र-

इभ्यैश्च =धनिकैः, मद्गौरवेण = मदीयसम्मानेन, स्वयं, नरपतिना = राज्ञा च, अनुम्रियमाणः = अनुगम्यमानः, कृतप्राणरक्षभिक्षः-कृता = विहिता, प्राणरक्षणस्य भिक्षा येन सः, शोकार्तरावभरितदिशावकाशः-शोतकार्तरावैः = दुःखभयाक्रोशध्वनिभिः, भरिताः = पूरिताः, दिशानाम् (अयं भागुरिसम्मत आबन्तप्रयोगः) अवकाशाः = स्थानानि येन एवम्भूतोऽपि, अस्पृष्टनिखिलजनहृदयः-अस्पृष्टानि निखिलजनानां हृदयानि येन सोऽहं सिन्धुवादः। पितृसदनं = श्मशानम्, अनीये = नीतः। प्रथमं = पूर्वं, सवेषभूषां = वेषेण भूषया च सहितां, मद्योषां = मम स्त्रियं, समृत्सृज्य = गर्ते निपात्य, सपाथेयजलं = पाथेयेन जलेन च सहितं, मामपि = सिन्धुवादं, महागर्ते = विशालनिखाते, अधः = नीचैः, विधाय = विन्यस्य, तन्मुखं = गर्तद्वारं च, पिधाय = समाच्छाद्य, सनृपाः = राज्ञा सहिताः, सर्वेः नागरिकाः ततः = श्मशानात्, प्रतिष्ठन्त = परावर्तन्त।

अहं च अधस्तलं सम्प्राप्तः = नीचैः गच्छन्, निरंतरविकीर्णशवसहस्रपूतिगंधां-निरंतरं = सततं निरवकाशं वा, विकीर्णानां = प्रक्षिप्तानां, शवानां, सहस्रस्य, पूतिगधः=दुर्गन्धो यस्याम्। आसन्नमरणकतिपयजीवितनिखातजनमंदनिःश्वासश्रवणसंदारितहृदयाम्-आसन्नं = निकटं, मरणं = मृत्युः येषां ते आसन्नमरणाः, एवभूताः =मृतप्रायाः, कतिपयाः = विरलाः, जीविताः = प्राणधारिणः, निखाताः

तथा मेरे गौरव के अनुसार स्वयं राजा भी मेरा अनुसरण कर रहे थे। मैं अपने प्राणों की रक्षा की भीखमाँग रहा था। मेरे शोकपूर्ण आक्रंदन से समस्त दिशायें गूंज उठती थी। परंतु उन लोगों पर उसका जरा भी असर नहीं हुआ। उन्होंने सर्वप्रथम वेषभूषा से अलंकृत पत्नी को तथा बाद में भोजन तथा जल के साथ मुझे भी उस विशाल खाई में नीचे रख दिया और उसका मुँह ढककर वे सभी लोग वहाँ से चले गये।

मैं नीचे की ओर पहुँचा और वहाँ एक गुफा देखी। वहाँ चारों ओर निरंतर

पूतिमन्धामासन्नमरणकतिपयजीवितनिखातजनमन्दनिःश्वासश्रवण-सन्दारितहृदयामपश्यम्। एकत्र च स्थितः स्थूलतमैर्वाष्पबिन्दुभिश्चिरमात्मानं समभ्युक्ष्य शोकोद्गारैस्तां गुहां प्रतिध्वनयन् सर्वथा निराशोऽप्यनुत्सृष्टजीविताशः प्राणसन्धारणान्वेषणप्रकारं चिन्तयन् सह सम्प्रेषितं किञ्चित् पाथेयकं भुक्त्वा निश्चेतन इव निशां व्यनैषम्। सविधस्थिते प्रत्यहमत्यल्पं भुज्यमानेऽपि क्रमेण क्षीणतामुपेयुषि मदन्नसंग्रहे नितरां जीवननिराशं एकस्मिन्नहनि संस्थितमवतार्यमाणं पुरुषमेकं तमनुगच्छन्तीं जीवन्ती तद्भार्या चाऽपश्यम्। जीवितस्नेहेन नृशंसहृदयीकृतो व्यपगतसद-

= भूमिसात्कृताः ये जनाः = मानवः, तेषां मंदनिश्वासस्य = शनैरुच्छ्वसितस्य, श्रवणेन = आकर्णनेन, सन्दारितं = भेदितं, हृदयम् = अन्तःकरणं यया ताम् एकाम् = अन्यतमां, गुहां = कन्दराम्, अपश्यम् = अवालोकयम् एकत्र च, स्थितः = वर्तमानः, स्थूलतमैः = वर्तुलैः, वाष्पबिन्दुभिः = अश्रुकणैः, चिरं = बहुकालं यावत् आत्मानं, समभ्युक्ष्य = आर्द्रीकृत्य, शोकोद्गारैः = दुःखविलापैः तां गुहां प्रतिध्वनयन् = प्रनिनिनादयन्, सर्वथा निराशोऽपि अनुत्सृष्टजीविताशः- न उत्सृष्टा = न परित्यक्ता, जीवितस्य = जीवनस्य आशा येन सोऽहं, प्राणसंधारणान्वेषणप्रकारं-प्राणसन्धारणस्य = जीवनरक्षणस्य, अन्वेषणप्रकारं चिन्तयन् = विमृशन्, सह सम्प्रेषितं = प्रदत्तमित्यर्थः। किञ्चित्, तत् पाथेयकम् = मार्गभोज्यान्नं भुक्त्वा = उपभुज्य, निश्चेतन इव = चेतनाशून्य इव, निशां = रात्रि, व्यनैषम् = अक्षपयम्। सविधस्थिते = निकटवर्तिनि, प्रत्यहं = प्रतिदिनम्, अत्यल्पं = स्तोकं, भुज्यमाने = खाद्यमानेऽपि, मदन्नसङ्ग्रहे-मम भोज्यपदार्थसञ्चये, क्रमेण, क्षीणतां = कृशताम्, उपेयुषि = प्राप्ते सति, नितराम् = अत्यन्तं, जीवननिराशः-जीवने = प्राणरक्षणे नैराश्यपूर्णा।

बिखरे हुए हजारों शवों की दुर्गन्ध आ रही थी। मरणासन्न कतिपय जीवित गाड़े हुए व्यक्तियों के मंद निःश्वास को सुनकर हृदय फट रहा था। एक कोने में खड़ा रहकर मैं स्थूलतम आँसुओं द्वारा अपने शरीर को भिगाते हुये और शोकपूर्ण उद्गारों से उस गुफा को प्रतिध्वनित करता हुआ जीवन के प्रति सर्वथा निराश होकर भी जीवन की आशा को न छोड़कर प्राणधारण के उपाय को खोजने लगा। साथ में भेजा हुआ नाश्ता खाकर मैंने अचेतन के समान वह रात बिताई।

सद्विवेकोऽहं पिहिते गर्तमुखे सहसा तां पृष्ठतः समुपेत्य शिलाघातमहनम्, तया च सहावतारित्तं पाथेयं जलं स्वायत्तीकृत्य कञ्चन कालं जीवितोऽतिष्ठम्। एवं काश्चन जीविताः स्त्रियः काञ्चिच्च पुरुषान् समये समये निहत्य तत्पाथेयापहरणायत्तजीवितः कालमक्षपयम्।

एकस्मिन् दिने सद्योहतैकयोषिदारान्मन्दं पदशब्दं निःश्वासस्वनं चाश्रृणवम्। तां दिशमनुसृत्य गतोऽहं मत्समीपादपसरदिव किञ्चिद्वस्तु ध्वान्तेनानुपलक्ष्यमाणविशेषमलक्षयम्। संकुचितायां गुहायां

एकस्मिन्नहनि = एकस्मिन् दिने, संस्थितम् = मृतम्, अवतार्यमाणम् एकं पुरुषं, तम्, अनुगच्छन्तीम् = अनुसरन्तीं, तद्भार्यां च अपश्यम् = अवालोयम्। जीवितस्नेहेन = प्राणानां मोहेन, नृशंसं = कठोरं, हृदयं, यस्य सः, तथापि जीतितस्नेहेन नृशंसहृदयः कृतः इति नृशंसहृदयी कृतः (अभूततद्भावे च्विप्रत्ययः) व्यपगतसदसद्विवेकः- व्यपगतः = नष्टः, सदसतोः विवेकः यस्य सोऽहं पिहिते = आच्छादिते, गर्तमुखे = गर्तद्वारि, सहसा तां = भार्यां, पृष्ठतः = पृष्ठभागात, समुपेत्य = उपगम्य, शिलाघातं = शिलायाः, आघातः = प्रहारः यस्यां क्रियायामतिति क्रियाविशेषणम्। अहनन् -अमारयम्। तया = स्त्रिया च सह अवतारितं पाथेयं = मार्गभोज्यान्नं, जलं च, स्वायत्तीकृत्य = आत्मसात् कृत्वा कञ्चन कालं, जीवितः = प्राणवान्, अतिष्ठं = स्थितः। एवं, काश्चन, जीविताः = सप्राणाः, स्त्रियः, कांश्चिच्च पुरुषान्, समये समये = यथाकालम्, निहत्य = मारयित्वा, तत्पाथेयापहरणायत्तजीवितः-तेषां = मया निहतानां स्त्रीपुरुषाणां पाथेयानां = मार्गभोज्यान्नानाम्, अपहरणे = लुण्ठने, आयत्तं = आधीनं जीवितं = जीवनं यस्य सोऽहं कालम्, अक्षपयम् = अहापयम्।

मैं पास में रखी हुई खाद्य सामग्री को स्वल्पमात्रा में खा रहा था जिससे वह क्रमशः कम होती जा रही थी। इससे मैं जीवन के प्रति अत्यन्त निराश हो गया।

एक दिन मैंने मरे हुए एक पुरुष को उतारते हुए तथा उसकी जीवित पत्नी को उसका अनुसरण करते हुए देखा। जीवन के प्रति स्नेह होने के कारण मेरा हृदय कठोर बन गया। मेरा सदसद्विवेक नष्ट हो गया। मैंने उस खाई के मुँह के ढक दिये जाने पर, अकस्मात् पीछे की ओर से आकर चट्टान के प्रहार से उस स्त्री को मार डाला। उसके साथ उतरे हुए पाथेय (अन्न) और जल को अपने

तस्यामवाकशिरास्तदनुसरन् केनचित्समयेन गुहावसाने छिद्रमेकं मत्प्रवेशपर्याप्तावकाशं प्राप्य संकोचितगात्रो विनिर्गत्य बहिरागतः पुनरपि प्रत्यागतजीविताशः सिन्धुरोधःस्थितमात्मानमवलोकयम्। मयाऽनुस्त्रियमाणं च कञ्चन जलौकसं शवभक्षणाय तां गुहां प्रविश्य प्रतिनिवर्तमानं निरधारयम्।

अथाहं भूयस्तां गुहां प्रपिश्य संगृहीतप्रचुरशवालङ्करणरत्न-

एकस्मिन् दिने, सद्यः तत्कालं, हतां मृताम् एकां, योषितं = स्त्रियम्, आरात् = समीपं च मन्दं = शनैः, पदशब्दं = चरणन्यासध्वनिं, निःश्वासध्वनं = उच्छ्वासशब्दं च, अशृणवम् =आकर्णयम्, तां दिशम् अनुसृत्य गतः अहं मत्समीपात् = ममनिकटत एव, अपसर्पदिव = प्रसर्पणशीलं किञ्चिद्वस्तु ध्वान्तेन = अन्धकारेण, अनुपलक्ष्यमाणविशेषणम्- अनुपलक्ष्यमाणः = अप्रतीयमानः, विशेषः = रूपादिः यस्य तत्, किञ्चित् वस्तु, अलक्षयम् = समभावयम्। संकुचितायां तस्यां गुहायां = कन्दरायाम्, अवाक्शिराः = कृताधो मस्तकः, तत् = वस्तु, अनुसरन् = अनुगच्छन्, केनचित् = स्वल्पेन समयेन, गुहावसाने = कन्दरन्याः समाप्तौ, मत्प्रवेशपर्याप्तावकांशम् प्रवेशस्य पर्याप्तोऽवकाशो यस्मिस्तत्, एकं छिद्रं = रन्ध्रं, प्राप्य, सङ्कोचितगात्रः- सङ्कोचितं गात्रं = शरीरं येन सः, विनिर्गत्य = निष्क्रम्य, बहिः = बाह्यप्रदेशे, आगतः, पुनरपि, प्रत्यागतजीविताशः प्रत्यागता = प्रतिनिवृत्ता, जीवितस्य,आशा यस्य सोऽहं सिन्धुवादः, सिन्धुरोधःस्थिते = समुद्रस्य तटे वर्तमानम्, आत्मानम्, अवालोकयम्= अपश्यम्। मयां = सिन्धुवादेन अनुस्त्रियमाणम् = अनुवर्तमानं च कञ्चन जलौकसं-जलमेव ओकः = गृहं, यस्य तं = जलनिवासिनं जन्तुम्, शवभक्षणाय = शवान् भक्षयितुं, तां गुहां = कन्दरां प्रविश्य = प्रवेशं विधाय, प्रतिनिवर्तमानं, निधारयम् = निर्णीतवान्।

अथ = अनन्तरं, अहं, भूयः = पुनः तां गुहां = कन्दरां, प्रविश्य संगृहीत-

---

अधिकार में लेकर कुछ समय तक मैं जीवित रहा। इस प्रकार कुछ जीवित स्त्रियों को और पुरुषों को समय-समय पर मारकर उनकी भोजन-सामग्री के अपरहण से मैं अपना समय बिता रहा था।

एक दिन तत्काल मरी हुई एक स्त्री को देखा तथा उसके पास से ही आने वाली मन्द पदध्वनि और निःश्वास को सुना। उस दिशा को ओर बढ़ते हुए मुझे

मौक्तिकराशिः निष्क्रमणावसरं प्रतीक्षमाणो द्वित्रैर्दिनैस्तत्रापतन्तं पोतमेकमद्राक्षम्। तत्र च श्रुतमदद्भुतवार्तैस्तैः प्रशंसितसाहसः कैश्चिद्दिनैर्निरपायं गृहान् सम्प्राप्त आमोदप्रमोदमात्रव्यसायोऽवसम्।

एवमुक्त्वा सिन्धुवादस्तानतिथिवरान् सहितवादानन्येद्युर्भोजनाय पञ्चमसिन्धुयात्राकर्णनाय चागन्तुं सम्प्रार्थ्य विससर्ज। हितवादं च

प्रचुरशवालङ्करणरत्नमौक्तिकराशिः-संगृहीतः = एकत्रितः, प्रचुरः = बहुलः शवानाम्, अलङ्करणानां = भूषणानां, रत्नानां मौक्तिकानां च राशिः येन सोऽहं निष्क्रमणावसरं = निर्गमस्य वेलाम् प्रतीक्षमणाः, द्वित्रैः, दिनैः = दिवसैः, तत्र = सिन्धुरोधसि, आपतन्तम् = आगच्छन्तम्, एकम् = अन्यतमं, पोतं = समुद्रयानम्, अद्राक्षम् = अपश्यम्। तदधिरूढैश्च = तस्मिन् आरुढैश्च, गृहीतमत्सङ्कतैः-गृहीतः प्राप्तः, मम संकेतः यैस्तैः, प्रेषितं, प्लवं = लघुनौकाम्, आरुह्य = अधिरुह्य, पोतं सम्प्राप्नवम्। तत्र च = तस्मिन्, पोते, श्रुतमदद्भुतवार्तैः-श्रुता = आकर्णिता, मम अद्भुता = विस्मयकारिणी वार्ता = वृत्तान्तः यैस्तैः, तैः=पोतयात्रिभिः प्रशंसितसाहसः-प्रशंसितं अभिनन्दितं, साहसं =धैर्यं यस्य सः कैश्चित् दिनैः, निरपायं = निर्विघ्नम्, गृहान् सम्प्राप्तः, आमोदप्रमोदमात्रव्यवसायः = मनोरंजनमात्रक्रियः अवसम्।

एवम् उक्त्वा, सिन्धुवादः, सहितवादान् तान् अतिथिवरान् = अभ्यागतश्रेष्ठान् अन्येद्युः, भोजनाय = भोजनं कर्तुम् पञ्चमसिन्धुयात्राकर्णनाय च-पंचमी या सिन्धुयात्रा, तस्याः आकर्णनाय, च आगन्तुम् = समायातुं, सम्प्रार्थ्य = निवेद्य,

ऐसा प्रतीत हुआ कि मेरे पास से कोई चीज सरक रही है जो अन्धेरे के कारण दिखाई नहीं पड़ रही थी। उस संकुचित गुफा में नीचे की ओर सिर कर उसका अनुसरण करते हुए कुछ समय के बाद गुफा के अन्त में मैंने एक छेद को देखा और मेरे प्रवेश योग्य पर्याप्त स्थान पाकर अपने शरीर को सिकोड़ते हुए वहाँ से निकलकर मैं बाहर आया। फिर से मेरे मन में जीने की आशा लौट आई। उस समय मैंने अपने को समुद्र के किनारे देखा। मैंने जिसका अनुसरण किया वह जलजन्तु शव भक्षण के लिए उस गुफा में जाकर वापस जा रहा था, ऐसा मैंने देखा।

पश्चात् मैंने पुनः उस गुफा में प्रवेश कर शवों के प्रचुर अलंकार रत्न और

र्ववद्दीनारशतमतिसृज्य समतोषयत्।

अन्येद्युश्च समागतांस्तानुद्दिश्य सिन्धुवाद एवं स्वां पञ्चमीं यात्रां ांसितुमुपचक्रमे।

ससर्ज = गृहगमनायानुमतिं प्रददौ। हितवादं च पूर्ववत् दीनारशतम्, तिसृज्य = समर्प्य, समतोषयत = प्रसादयति स्म।

अन्येद्युश्च = द्वितीयस्मिन् दिवसे च समागतान्, तान् = अतिथिवरान्, द्दिश्य सिन्धुवादः, एवं, स्वां, पंचमीं यात्रां, शंसितुम् = वर्णयितुम् उपचक्रमे प्रारभत।

ोतियों की राशि को एकत्र कर निकलने के अवसर की प्रतीक्षा करते हुए दो ीन दिनों में ही वहाँ आने वाले एक जहाज को देखा। उस पर सवार व्यक्तियों ारा मेरा संकेत पाकर भेजी हुई नौका पर बैठ कर जहाज पर पहुँचा। वहाँ पर री आश्चर्यजनक कहानी को सुनकर उन्होंने मेरे साहस की प्रशंसा की। थोड़े ी दिनों में मैं सकुशल घर पहुँचा और आमोद-प्रमोद में मग्न होकर वहाँ रहने ागा।

यह कहकर सिन्धुवाद ने हितवाद के साथ उन अतिथियों को दूसरे दिन भोजन करने के लिए तथा पाँचवीं समुद्री यात्रा को सुनने के लिए आने की प्रार्थना कर छोड़ दिया और हितवाद को पहले की भाँति सौ दीनार देकर सन्तुष्ट किया।

दूसरे दिन आए हुये अतिथियों को सिन्धुवाद अपनी पाँचवी यात्रा इस प्रकार सुनाने लगा।



पञ्चमी सिन्धुयात्रा

एवं मया प्रत्यहमुपभुज्यमानैः सुखैर्मां पुनरपि सिन्धुयात्रासाहसाङ्गीकारान्निवारयितुमपर्याप्तैर्भूयो विचलितहृदयः पञ्चमीं यात्रामुद्दिश्य प्रस्थातुम् सन्नद्धोऽभवम्। भृतके पोतेऽविश्वसन् स्वकीयेन व्ययेनाभिनवं पोतं निर्माप्य सर्वोपकरणैः परिकरितं तं सञ्चितवाणिज्योपयोगिवस्तुनिकरः

एवं मया प्रत्यहं = प्रतिदिनम्, उपभुज्यमानैः = सेव्यमानैः, सुखैः = आनन्दैः मां पुनरपि, सिन्धुयात्रासाहसाङ्गीकारात्= सिन्धुयात्रायाः = समुद्रप्रवासस्य, साहसस्य = धैर्यस्य, अङ्गीकारात् = स्वीकारात्, निवारयितुम् = परावर्तयितुम्, अपर्याप्तैः = असमर्थैः (सुखैः) भूयः, विचलितहृदयः-विचलितं = चंचलं, हृदयं = चेतः यस्य सोऽहं सिन्धुवादः पञ्चमीं यात्राम्, उद्दिश्य = अभिलक्ष्य, प्रस्थातुम् सन्नद्धः = बद्धपरिकरः, अभवम्।

भृतके = भाटकेनोपयोज्ये, पोते = समुद्रयाने, अविश्वसन् = अश्रद्दधानः, स्वकीयेंन व्ययेन, अभिनवं = नूतनं पोतं, निर्माप्य, सर्वोंकरणैः = समस्ताभिः सामग्रीभिः, परिकरितं = सज्जितं, तं पोतं, समारुह्य सञ्चितवाणिज्योपयोगिवस्तुनिकरः सज्जितः = एकत्रितः, वाणिज्यस्य = व्यापारस्य, उपयोगिनां = समुपयुक्तानां, वस्तूनां = पदार्थानां, निकरः = राशिः, येन सः, सपण्यजातान्- पण्यजातैः = विक्रेयवस्तुसमूहैः सहितान्, वणिजः = व्यापारिणः, अधिरोप्य = समुपवेश्य, वाते = पवने, अनुकूले = दिगनुरूपे, वहति = प्रचलति सति, प्रस्थितः = प्रयातः, कैश्चित् दिनैः विजनं = मनुष्यशून्यम् एकम् द्वीपं, प्रापम्। तत्र च चञ्चुपुटोद्घाटितमुखांतरविनिर्गच्छन्नवशावकं-चञ्चुपुटाभ्याम् उद्घाटितं समुन्मीलितं

पाँचवी समुद्री यात्रा

इस प्रकार मैं प्रत्येक दिन अनेक सुखों का उपभोग कर रहा था, जो मुझे फिर से समुद्री यात्रा का साहस करने के लिए रोक नहीं सकते थे। इन्हीं सुखों ने मुझे पुनः विचलित किया और मैं पुनः पाँचवीं यात्रा करने के लिए सन्नद्ध हो गया। किराए के जहाज पर विश्वास न रखते हुए मैंने अपने खर्च से नए जहाज का निर्माण करा कर, उसे सभी उपकरणों से सुज्जित कर, उस पर व्यापारोचित

समारुह्यान्यांश्च वणिजः सपण्यजातानधिरोप्यानुकुले वहति वाते प्रस्थितः, कैश्चिद्दिनैर्विजनमेकं द्वीपं प्रापम्। तत्र चैकमतिविशालमण्डजाण्डं चञ्चू-पुटोद्घाटितमुखान्तरविनिर्गच्छन्नवशावकमपश्यम्। मया तत् स्प्रष्टुम् निषिद्ध्यमाना अपि मत्सहचरा मद्वचनमुपेक्ष्य कुठारेण तदण्डं विभिद्य तं शावकं खण्डशोऽवकृत्य स्वयं विशीर्णशुष्कपर्णसमेधितेऽनले शूलाकृत्य जघसुः।

अवसिताभ्यवहारेषु तेषु नभसि दूरादापतन्तौ तच्छावकपितरौ विलोक्य

यत् मुखं = वदनं, तस्य अन्तरात् = मध्यात्, विनिर्गच्छन् = विनिष्क्रामन्, नवः = नवीनः, शावकः = शिशुः यस्मिंस्तत्। एकम् = अपरम्, अतिविशालं = महाप्रमाणम्, अण्डजाण्डम् = अण्डजस्य पक्षिणः अण्डम्, अपश्यम् = अद्राक्षम्। मया, तत् = अण्डं, स्प्रष्टुम् = स्पर्शकरणाय, निषिध्यमानाः = निवार्यमाणः, अपि मत्सहचराः = मम सहयात्रिणः, मद्वचनं = मदीयं सदुपदेशम् उपेक्ष्य, कुठारेण तत् = अतिविशालम्, अण्डं विभिद्य = विदार्य, तं, शावकं = पक्षिशिशुं, खण्डशः, अवकृत्य = कर्तयित्वा, स्वयम् = आत्मनैव, विशीर्णशुष्कपर्णसमेधिते-विशीर्णानि = विकीर्णानि, शुष्कानि = नीरसानि, आर्द्रतारहितानीत्यर्थः। यानि पर्णानि = वृक्षपत्राणि, तैः समधिते = प्रज्वालिते, अनले = अग्नौ, शूलाकृत्य = लोहकीलकेन वेध्य परिपच्य च, जघसुः=भक्षयामासुः।

तेषु अवसिताभ्यवहारेषु-अवसितः अभ्यवहारः यैस्तेषु = समापितभोजनेषु सत्सु, नभसि = आकाशे, दूरात्, आपतन्तौ = समागच्छन्तौ तच्छावकपितरौ=

वस्तुओं का संग्रह करते हुए सवार हो तथा विक्रेय वस्तुओं को बेचनेवाले अन्य व्यापारियों को भी सवार कराकर अनुकूल हवा बहने पर मैंने प्रस्थान् किया। कुछ ही दीनों में मैं एक निर्जन द्वीप में पहुँचा। वहाँ पर एक ऐसे विशाल पक्षी के अण्डे को देखा जिसमें से अपनी चोंच को खोलते हुए शिशु निकल रहा था। मैंने यद्यपि उसका स्पर्श करने से अपने साथियों को रोका तथापि उन्होंने मेरे वचन की उपेक्षा कर कुल्हाड़ी द्वारा उस अण्डे को फोड़कर और उस शिशु को टुकड़े-टुकड़े कर स्वयं फैले हुए सूखे पत्तों की प्रज्वलित आग में उसे पका कर खाया।

भोजन के पश्चात् वे आकाश में उस शावक के माता-पिता को दूर से आते

सम्भ्रमाकुलतां गतेषु पोताध्यक्षो विज्ञातैतच्छकुन्तानुभावस्तस्या विपदः समुद्धरणाय त्वरितं प्रवहणमारोढुं सर्वानन्वबध्नात्।

अथ तौ पक्षिणौ क्रेङ्कारैर्दुःश्रवैर्भग्नाण्डसन्दर्शनेन द्विगुणीकृतैः सकलमेव तं द्वीपमपूरयताम्, वैरनिर्यातनपरौ च क्षणाच्चच्चूपुटविधृताभिर्विशालाभिः शिलाभिरभिवर्षन्तावस्मत्प्रवहणं खण्डशः कृत्वा तत्रस्थान् नाविकान् यात्रार्थिनश्च चूर्णीकृत्य जलधितलं प्रापयामासतुः।

माता च पिता च पितरौ इति एकशेषद्वन्द्वः। "मातापितरौ पितरौ" इत्यमरः। विलोक्य = दृष्ट्वा, सम्भ्रमाकुलतां-सम्भ्रमेण = सन्त्रासेन या आकुलता = व्यग्रता, तां गतेषु सत्सु पोताध्यक्षः = प्रवहणनायकः विज्ञातैतच्छकुन्तानुभवः-विदितः एतयोः शकुन्तयोः = शावकस्य मातापित्रोः पक्षिणोः अनुभावः = आशयः येन एवम्भूतः सन्, तस्याः = समभावितायाः, विपदः = आपत्तेः, समुद्धरणाय = सन्तरणाय, त्वरितं = सवेगं, प्रवहणं = जलयानम्, आरोढुम् = समुपवेष्टुम्, सर्वान् = यात्रिवणिजः, अन्वबन्धात् = अनुरुरोध।

अथ भग्नाण्डसन्दर्शनेन-भग्नस्य = विदीर्णस्य, अण्डस्य सन्दर्शनेन = अवलोकेनेन, द्विगुणीकृतैः, दुःश्रवै = कर्णकटुभिः, क्रेङ्कारैः = क्रेंक्रें इति ध्वनिभिः, तौ पक्षिणौ सकलमेव = सम्पूर्णमेव, तं द्वीपं = मनुष्यरहितद्वीपम्, अपूरयताम् = पूरयमासतुः, वैरनिर्यातनपरौ च = शत्रुतानिर्बहणे कुशलौ च तौ पक्षिणौ क्षणात् चंचुपुटैः विधूताभिः गृहीताभिः, विशालाभिः = महतीभिः, शिलाभिः = पाषाणखण्डैः, अभिवर्षतौ = विहितवर्षौ, अस्मत्प्रवहणम् =

हुए देखकर जल्दी में घबड़ा गये। इसी समय जहाज के अधिकारी ने उन पक्षियों की चेष्टाओं का अनुमान लगाते हुए उस विपत्ति से छुटकारा पाने के लिए उनसे शीघ्र जहाज पर सवार होने के लिए अनुरोध किया।

अनन्तर उन नर-मादा पक्षियों ने टूटे हुए अण्डे को देखकर अपने कर्णकटु चीत्कारों से सम्पूर्ण द्वीप को व्याप्त कर दिया। क्षणभर में बदले की भावना से चोचों द्वारा उठायी गयी विशाल शिलाओं को वे हमारे जहाज पर बरसाने लगे और उन्होंने उस जहाज को और उस पर सवार नाविकों तथा यात्रियों को चकनाचूर कर समुद्र तल में पहुँचा दिया। मैं तो डूबकर भी भाग्यवशात् तैरने लगा और टूटे हुए जहाज के पटरे को जिस पर बैठने के लिए थोड़ा स्थान था

अहं तु मग्नोऽपि पुनरुन्मग्नो देवाद्भग्नप्रवहणस्यैकमपर्याप्तोपवेशनावकाशं फलमेकेन बाहुनाऽवलम्ब्य परेण सन्तरन्ननुकूलपवनेन कुत्राप्यत्युन्नततटे द्वीपे क्षिप्तः कथमपि तटमारुह्य समस्थलीमुपागमम्।

तत्र च नवहरितशाद्वले क्षणं विश्रम्याऽपनीततरणश्रमः समन्तात् सञ्चरन् पल्लवभरैः, शलाटुभिः पक्वैश्च विपुलैः फलैरनेकवर्ण-

---

अस्माकं जलयानं खण्डशः, कृत्वा = भेदयित्वा, तत्रस्थान् = तत्र वर्तमानान्, नाविकान् = धीवरान्, यात्रार्थिनश्च = यात्रिणश्च, जलधितलं = समुद्रतलं, प्रापयामासतुः = प्रेषयामासतुः।

अहं तु सिन्धुवादः, मग्नोऽपि = ब्रुडितोऽपि, पुनः = वारंवारम्, उन्मग्नः = संतीर्णः, दैवात् = भाग्यात्, भग्नप्रवहणस्य = विदीर्णस्य पोतस्य अपर्याप्तो-पवेशनावकाशम्- अपर्याप्तः = अत्यन्तं परिमितः, उपवेशनाय = उपवेष्टुम् अवकाशः-स्थानं यस्मिंस्तत्, एकं फलकं = काष्टपट्टिकाम्, एकेन =अन्यतरेण, बाहुना = भुजदण्डेन, अवलम्ब्य = आश्रित्य, अपरेण बाहुना, सन्तरन् = विहतसन्तरणः, अनुकूलपवनेन = तटानुरूपेण वायुना, कुत्रापि = अज्ञाते, अत्युन्नततटे-अत्युन्नतं तटं यस्य तस्मिन् द्वीपे, क्षिप्तः = परित्यक्तः कथमपि, तटं = प्रान्तभूमिम्, आरुह्य, समस्थलीम् = अविषमभूमिम्, उपागमम् = प्रापम्।

नवहरितशाद्वले-नवानि हरितानि, शाद्वलानि = तृणाङ्कुराः यस्मिंस्तस्मिन्, तत्र च = तस्मिन् समस्थले, क्षणं, विश्रम्य = विश्रामं कृत्वा, अपनीततरणश्रमः- अपनीतः = अपगमितः, तरणस्य = सन्तरणस्य, श्रमः = परिश्रमो येन तथाभूतः, समन्तात् = सर्वत्र, सञ्चरन् = विचरणशीलः पल्लवभरैः =किसलयभरैः,

---

एक हाथ से पकड़कर दूसरे हाथ से तैरते हुए अनुकूल हवा द्वारा खूब ऊँचे तट वाले द्वीप पर फेका जाता हुआ अत्यन्त कठिनाई से उसके किनारे चढ़कर समतल मैदान में पहुँचा।

नई दूब से हरी-भरी उस समतल भूमि में क्षणभर विश्राम कर, तैरने की थकान को दूर कर, चारों ओर विचरण करते हुए पल्लवों, अपरिपक्व एवं पक्व विपुल फलों और अनेक रंगों की सुषमा से मनोहर फूलों से झुके हुए श्रेष्ठ वृक्षों को चारों ओर देखकर, मैंने अपने को मानों एक सुन्दर उद्यान के बीच में उपस्थित-सा अनुभव किया। अमृत के समान मधुर उन फलों को

सौन्दर्यहृतहृदयैः प्रसूनैश्च नमितान् पादपवरान् सर्वतो विलोकयन् रमणीयाराममध्यगतमिवात्मानवेदम्। तानि च पीयूषमधुराणि फलान्यास्वाद्य पीत्वा च प्रस्रवणमम्भो गतक्लमः सम्प्राप्तां निशीथिनीमेकाक्यवस्थापरवशतया विघ्निप्रतगाढ़निद्रासुखोऽन्तरान्तरा किञ्चित् स्वपन् भूयो जाग्रदात्मनो भागधेयमेतद्यात्राचापलञ्च विनिन्दन्

शलाटुभिः = आम्रैः "आमे फले शलाटुः स्यात्" इत्यमरः पक्वैः = परिपक्वैश्च, विपुलैः = प्रचुरैः फलैः, अनेकवर्णसौन्दर्यहृतहृदयैः-अनेकेषां = नानाविधानां, वर्णानां = रङ्गानां, सौन्दर्येण = लावण्येन हृतानि = आकृष्टानि, हृदयानि = चेतांसि, यैस्तैः प्रसूनैः = पुष्पैः च, नमितान् = अधोऽवलम्बितान्। पादपवरान् = श्रेष्ठान्, वृक्षान्, सर्वतः दिक्षु, विलोकयन्, आत्मानं, रमणीयाराममध्यगतमिव-रमणीयस्य = आकर्षकस्य, आरामस्य = उपवनस्य, "आरामः स्यादुपवनम्" इत्यमरः मध्ये = अन्तः, गतं स्थितमिव, अवेदम् = ज्ञातवान्। तानि च पीयूषमधुराणि = अमृतवत् मिष्टानि इत्युपमा। फलानि, आस्वाद्य उपभुज्य, प्रास्रवणं = निर्झरोद्भवम्, अम्भः = जलम्,पीत्वा च एकाकि = द्वितीयरहितं, यत् अवस्थानं = निवासः, तस्य भयेन, या परवशता = पराधीनता तया। विघ्नितप्रगाढनिद्रासुखः-विघ्नितं = बाधितं, प्रगाढम् = अत्यन्तं, निद्रायाः = सुषुप्तेः, सुखम् यस्य सः, अन्तरा-अन्तरा = मध्ये-मध्ये, किञ्चित्, स्वपन् = निद्राणः, भूयः, जाग्रत् = प्रबुद्धः, आत्मनः, भागधेयं =दैवम्, एतद्यात्राचापलं-एतस्याः अनुभूतायाः, यात्रायाः = चापलं = चपलतां च विनिन्दन् = भर्त्सयन्, कथञ्चित् = केनापि प्रकारेण, सम्प्राप्तां = समागतां, निशीथिनीं = रात्रिम्, अयापयम् = अक्षपयम्। भगवति गभस्तिमालिनि = श्रीसूर्यनारायणे, उदिते, काष्ठासु = दिक्षु, "दिशस्तु ककुभः काष्ठा" इत्यमरः प्राभातिकवातप्रसादितचेताः

खाकर और झरने के जल को पीकर मेरी थकावट दूर हुई। रात्रि में एकाकी रहना पड़ेगा इस डर से गाढ़ी नींद में बाधा पड़ रही थी। बीच-बीच में मैं सोता था और पुनः जागता था। इस प्रकार मैंने अपने भाग्य को और इस यात्रा की चंचलता को कोसते हुए रात किंसी प्रकार व्यतीत की। सूर्यनारायण के उदित होने तथा समस्त दिशायें प्रकाशित होने पर प्रातःकालीन वातावरण से प्रसन्नचित होकर मैं इधर-उधर विचरण करने लगा।

कथञ्चिदयापयम्। उदिते भगवति गभस्तिमालिनि प्रकाशितासु काष्ठासु प्राभातिकवातप्रसादितचेता इव इतस्ततो व्यचरम्।

विचरंश्च स्थूलकायं परिणतवयसं स्रोतस एकस्य तटे समुपासीनं पुरुषमेकमद्राक्षम्। तं चाऽऽत्मानमिव हतभाग्यं प्रवहणभङ्गविपदि पतितमाकलयन्नुपसृत्य प्राणमम् तत्रावस्थितिकारणमप्यपृच्छम्। स तु किमप्यभाषमाणः फलावचिचीषयाऽऽत्मानं स्कन्धयोर्निधाय स्रोतस्तरीतुम् समकेतयत्।

अहन्तु तं स्थविरं गमनाक्षमतया मत्साहाय्यार्थिनमवगत्य दयापरवशः

इव-प्रभातस्यायं प्राभातिकः प्रातःकालिको यो वातः = पवनः, तेन, प्रसादितम् = आमोदितं चेतः यस्य तथाभूतो, इव = यथा, इतस्ततः व्यचरम्।

विचरन् = भ्रमंश्च, स्थूलकायं = पुष्टशरीरं, परिणतवयसं-परिणतः वयो यस्य, तम् = वृद्धम्, एकस्य = स्रोतसः = निर्झरस्य, तटे = प्रान्ते, समुपासीन् = समुपविष्टम्, एकं, पुरुषम् अद्राक्षम् = अपश्यम्। तं च पुरुषम्, आत्मानं = निजमिव हतं भाग्यं यस्य तम् हतभाग्यम् = दुर्दैवम्, प्रवहणभङ्गविपदि- प्रवहणस्य = जलयानस्य यो भङ्गः = विनाशः, स एव विपत् = आपत्, तस्याम्, पतितं = मग्नम्, आकलयन् = सम्भावयन्, उपसृत्य = समीपे गत्वा, प्रणाममकरवम्, तत्र = द्वीपे, अवस्थितिकारणं = निवासनिमित्तमपि, अपृच्छम्। स तु = पुरुषः, किमपि, अभाषमाणः = अब्रुबाणः, फलावचिचीषया, फलचयनकामनया, आत्मानं, स्कन्धयोः, निधाय = उपवेश्य, स्रोतः = निर्झरं, तरीतुम् = पारं गन्तुम्, समकेतयत् = संकेतितवान्।

अहं तु = सिन्धुवादः, स्थविरं = वृद्धं, गमनाक्षमतया = गन्तुमसामर्थ्येन, मत्सहाय्यार्थिनं-मम साहाय्यस्य = सहायतायाः, अर्थिनं = याचकं, अवगत्य दयापरवशः = करुणार्द्रः, स्कन्धयोः, प्रतिष्ठाप्य = स्थापयित्वा, तस्य स्रोतसः

विचरण करते हुए मैंने ढलती हुई अवस्था के स्थूलकाय पुरुष को एक झरने के किनारे बैठे हुए देखा। मैंने उसे अपने ही समान अभागा और जहाज टूटने के कारण आपत्ति में पड़ा हुआ समझकर आगे बढ़कर उसे प्रणाम किया और वहाँ उसकी उपस्थिति का कारण पूछा। बिना उत्तर दिए फल बटोरने की इच्छा से अपने कन्धों पर बैठकर झरना पार कराने के लिए उसने इशारा किया।

मैं उस वृद्ध को चलने में असमर्थ होने के कारण मेरी सहायता का अभ्यर्थी समझ दयापरवश हो गया और उसे अपने कन्धों पर बैठकर झरने के दूसरे

स्कन्धयोः प्रतिष्ठाप्य तस्य स्त्रोतसः परं तीरमुपासदम्। अथाऽवरुद्ध-निजगतिना मयाऽवरोढुमीरितः स समुत्प्रेक्ष्य मदभिप्रायं जानुभ्यां मद्गलमवष्टभ्य दृढतरनिबद्धासनः समुपाविशत्। एवं तेनोद्बध्यमानगलो भारभुग्नः पादाभ्यामार्षभाजिनकर्कशचर्मावृताभ्यां पार्श्वयोरुदरे च प्रणुद्यमानः कैश्चित् क्षणैर्मूर्छितप्रायोऽभवम्।

एवमप्यविचलासनः स मध्ये मध्ये केवलं श्वसितुम् दत्तावकाशः

= निर्झरस्य ,परं = द्वितीयम्, तीरं = कूलम्, उपासदम् = प्रापम्। अथ अवरुद्धनिज गतिना-अवरुद्धा = स्थगिता, निजा = स्वीया, गतिः = गमनं यस्य तेन, मया, अवरोढुम् = अवतर्तुम्, ईरितः = प्रेरितः सः = स्थविरः, मदभिप्रायं = मम आशयं, समुपेक्ष्य, जानुभ्यां मद्गलं = मम कण्ठम्, वेष्टयित्वा, दृढ़तर-निबद्धासनः-दृढ़तरम् =अत्यन्तं, दृढं, निबद्धं = विन्यस्तम्, आसनम् = उपवेशनं येन सः, समुपाशित् = उपविशति स्म। एवम्, तेन = स्थविरेण, उद्बध्यमानगलः-उद्बध्यमानः = निगडितः, गलः = कण्ठो यस्य सः, भारभुग्नः-भारेण = स्थविरभरेण, भुग्नः = अवनमितः, आर्षभाजिनचर्मावृत्ताभ्याम् - आर्षभं वृषभसम्बन्धि, "ऋषभो वृषभो वृषः" इत्यमरः एवम्भूतं यत् अजिनं = चर्म, "अजिनं चर्म कृत्तिः स्त्री" इत्यमरः तस्य कर्कशे = कठोरे, र्मणी = उपानहौ इति लाक्षणिकोऽर्थः। ताभ्याम् आवृताभ्यां वेष्टिताभ्यां, पादाभ्यं = चरणाभ्यां, पार्श्वयोः = प्रान्तभागयोः उदरे च प्रणुद्यमानः, = प्रकर्षेण प्रेर्यमाणा, कैश्चित् = स्वल्पैः, क्षणैः मूर्छितप्रायः मोहावस्थापन्नः, अभवम्=संजातः।

एवमपि = अस्यामवस्थायामपि, अविचलासनः-अविचलं = स्थिरम् आसनम् = उपवेशनं यस्य सः, सः = स्थविरः, मध्ये केवलं श्वसितुम् = उछ्वसितुम्, दत्तावकाशः-दत्तः = प्रदत्तः, अवकाशः = अवसरः येन सः,

---

किनारे पहुँचा।

पश्चात् मेरी गति रुकने पर उतरने के लिए प्रेरित किए जाने पर भी वह मेरे कहने की उपेक्षा करता हुआ अपनी दोनो जंघाओं से मेरे गले को कसकर आसन लगाकर बैठ गया। इस प्रकार गला फँसने पर उसके बोझ से दबकर मैं बैल के चमड़े से निर्मित कर्कश जूतों से ढके हुए दोनों पैरों के बगलों और पेट में चुभोये जाने के कारण कुछ क्षणों में ही बेहोश हो गया।

इस प्रकार अपने आसन से जरा भी च्युत न होते हुए वह बीच-बीच में

पादबन्धनं किञ्चिच्छिथिलयन् भूयो नोदयन् पशुमिव चलितं मां बलात् प्रैरयत्। आदिनान्तमेवं प्रतुद्य सम्प्राप्तायां रात्रौ विश्रमितुकामेन मया तथैव निष्पीड्यमानगलेन सहास्वपत्। प्राभातायां च तस्यां मां पादाघातैर्विबोध्य भूयः परिभ्रमयन्नविश्रमं निष्पीडितगलोऽत्यर्थमदुनोत्।

एकस्मिन्नहनि भूमौ पतिताः काश्चित्तुम्बीरवलोक्य तास्वायततमामेकां गृहीत्वा संशोध्य तत्र प्रचुरोद्भवान् द्राक्षास्तबकानवचित्य निष्पीड्य तद्रसेन

पादबन्धनं = चरणयोरवष्टम्भं, किञ्चित् = स्वल्पं, शिथिलीकुर्वन्, भूयो भूयः नोदयन् = प्रेरयन्, पशुमिव = पशुवत्, चलितुम् , मां = सिन्धुवादं, बलात् = हठात्, प्रेरयत् = नोदयामास। आदिनान्तं = दिसमाप्तिपर्यन्तम्, एवं = अनेन प्रकारेण मां प्रतुद्य = पीडयित्वा, सम्प्राप्तायां = समागतायां, रात्रौ = निशायां, विश्रामितुकामेन = विश्रामोत्सुकेन, तथैव = पूर्ववदेव, निष्पीड्यमानगलेन- निष्पीड्यमानः = नितरां पीड्यमानः, गलः कण्ठः यस्य तेन, मया सह अस्वपत् = निद्रां विदधे। तस्यां रात्रौ, प्रभातयां = प्रातःकालरूपेण परिणतायां, पादाघातैः = चरणप्रहारैः, मां विबोध्य, भूयः अविश्रमं, परिभ्रमयन् = परिचालयन्,निष्पीडितगलः = अवष्टभ्यमानकण्ठः, अत्यर्थम् = अतिशयेन, अदुनोत् = उतपीडयत्।

एकस्मिन्नहनि = एकस्मिन् दिवसे, भूमौ = पृथिव्यां, पतिताः = परिच्युताः, काश्चित् = कतिपयाः, तुम्बीः, अवलोक्य = दृष्ट्वा तासु = तुम्बीषु, आयततमाम् = अत्यन्तविशालाम्, एकाम् = अन्यतमां तुम्बीं गृहीत्वा, संशोध्य, तत्र = द्वीपे, प्रचुरोद्भवान् = प्रचुरमात्रायाम् उत्पन्नान्, द्राक्षास्तबंकान् = गोस्तनीगुच्छान् अवचित्य तान् निष्पीड्य, तद्रसेन = द्राक्षारसेन, तां = तुम्बीं,

केवल साँस लेने के लिए समय देता था और पैरों के बन्धन कुछ शिथिल करता हुआ बार-बार मुझे पशु के समान चलने के लिए जबरदस्ती प्रेरित करने लगा। दिन ढलने तक इसी प्रकार कष्ट देकर वह रात्रि आने पर विश्राम के लिए मेरे साथ सो गया उस समय भी मेरा गला उसी प्रकार दबाये जा रहा था। प्रातः काल होने पर लातों से मुझे जगाकर वह बार-बार बिना विश्राम चलने के लिए प्रेरित करता हुआ गला दबाकर अत्यन्त कष्ट देने लगा।

एक दिन मैंने जमीन पर पड़ी हुई कुछ तुम्बियों को देखा और उनमें से सबसे बड़ी एक तुम्बी लेकर उसे साफ कर उस द्वीप में प्रचुर मात्रा में उत्पन्न रस भरे

तां सम्पूर्यैकत्र देशेऽवस्थाप्य कैश्चिद्दिनैरासवतां गतं तद्रसं किञ्चिद् आस्वाद्य विस्मृतात्मदशो गायन्नृत्यंश्च प्रचलन् विलोकितमदवस्थापरिवर्तनेन तेन जरता सम्प्रार्थितस्तस्मै तां द्राक्षासवसम्भृतां तुम्बीं प्रायच्छम्। तन्माधुर्यहृतहृदयोऽसौ समग्रं तमासवं पीत्वा संजातोन्माद इव मया सह गायन् स्वमसकृदान्दोलयन् शिथिलीकृतमद्गलबन्धनो मयाधिशिलं तरसा क्षिप्तस्तत्क्षणं विगतासुरपतत्।

सम्पूर्य = पूरयित्वा, एकत्र = एकस्मिन्, प्रदेशे = स्थाने, अवस्थाप्य = स्थापयित्वा, कैश्चित् = कतिपयैः, दिनैः = दिवसैः आसवतां = मद्यस्वरूपतां, गतं = प्राप्तं, तं = रसं द्राक्षारसं, किञ्चित्, आस्वाद्य = निपीय, विसमृतात्मदशः-विस्मृता आत्मनः = स्वस्य, दशा = अवस्था येन सः गायन्, नृत्यंश्च = नृत्यगानमग्नः, प्रचलन् = गच्छन्, विलोकितमदवस्थापरिवर्तनेन- विलोकितं, मम, अवस्थायां परिवर्तनं येन तेन, जरता = वृद्धेन, सम्प्रार्थितः = याचितः, तस्मै = वृद्धाय, तां द्राक्षासवसम्भृतां तुम्बीं प्रायच्छम् = समर्पयम्। तन्माधुर्यहृतहृदयः-तस्य = द्राक्षासवस्य, माधुर्येण, हृतम् = आकृष्टं हृदयं यस्य सः असौ वृद्धः, समग्रं = सकलं, तं आसवं द्राक्षामद्यं, पीत्वा सञ्जातोन्मादः- सञ्जातः = उत्पन्नः, उन्मादः यस्य एवम्भूत इव, मया सह गायन्, स्वम् = आत्मनाम्, असकृत् = वारंवारम्, आन्दोलयन् = कम्पयन्, शिथिलीकृतमद्गलबन्धनः- शिथिलीकृतं मम गलस्य = कण्ठस्य बन्धनं येन सः, मया (सिन्धुवादेन) अधिशिलम् = शिलायमित्यव्ययीभावः। तरसा = वेगेन, क्षिप्तः = पातितः, तत्क्षणं = तस्मिन्नेव क्षणे, विगतासुः = निष्प्राणः, अपतत् = पतति स्म।

अंगूर के गुच्छों का संग्रह करते हुए उन्हें निचोड़कर उनके रस से तुम्बी को भरकर एक स्थान पर रख लिया। कुछ दिनों में उससे बनी शराब को पीकर मैं अपनी दशा भूलकर नाचने गाने लगा। मेरी अवस्था में परिवर्तन देखकर उस बृद्ध द्वारा प्रार्थना किये जाने पर मैंने उसे अंगूर की शराब से भरी हुई वह तुम्बी दे दी। उसकी मधुरता से आकृष्ट हो उसने पूरी शराब पी डाली और उन्मत्त होकर मेरे साथ गाते हुए अपने को बार-बार हिलाकर मेरे गले के बंधन को शिथिल किया।

मेरे द्वारा वेग से चट्टान पर पटके जाने पर उसने तत्काल ही प्राण त्याग दिये।

इत्थं तस्मात् स्थविरसङ्कटान्मुक्तः सानन्दोऽहं सिन्धुतीरमागत्य कांश्चित् पेयमधुरजलसंजिघृक्षया सन्निरुद्धपोतान् जनामुपगम्य मत्तः श्रुताखिल-वृत्तान्तैस्तैरुक्तः-'बहवो जनास्तत्स्थविरोद्बन्धनयातनयाऽत्र मृताः दिष्ट्या त्वं तद्वशतां गतोऽपि विमुक्तोऽसि। सर्वे हि पोतावाहाः वणिजश्चेहागमनं परिहरन्ति' इति।

एवमुक्त्वा ते मां स्वपोतमनैषुः। पोताध्यक्षेण चाऽऽकर्णितमदुदन्तेन

इत्थं, तस्मात् = पूर्वोक्तात्, स्थविरसङ्कटात् = वृद्धजनिताया आपदः मुक्तः। सानन्दः,सिन्धुतीरं = समुद्रतटम्, आगत्य = प्राप्य, कांश्चित् = कतिपयान्, पेयमधुरजलसंजिघृक्षया, पेयस्य = आस्वाद्यस्य, मधुरस्य = मिष्टस्य, जलस्य = सलिलस्य या संजिघृक्षा = संग्रहीतुम् इच्छा तया, सन्निरुद्धपोतान्-सन्निरुद्धः = प्रतिरुद्धगमनः, पोतः = प्रवहणं, यैस्तान् = जनान् यात्रिणः, उपगम्य = प्राप्य, मत्तः इति पंचम्यर्थे तसिल् श्रुताखिलवृत्तांतैः-श्रुतः = आकर्णितः, अखिलः, वृत्तान्तो यैस्तैः जनैः उक्तः-बहवः,जनाः यात्रिणः तत्स्थविरोद्बन्धनयातनया = तस्य स्थविरस्य = वृद्धस्य, उद्बन्धस्य कण्ठपाशस्य या यातना = पीड़ा, तया, अत्र द्वीपे, मृताः = प्राणांस्त्यक्तवन्तः। दिष्ट्या = भाग्येन, त्वं, तद्वशतां = स्थविरस्य अधीनतां गतः = प्राप्तोऽपि, विमुक्तोऽसि सर्वे, हि पोतावाहाः = नौकर्णधाराः, वणिजश्च, इह = अत्र द्वीपे, आगमनं परिहरन्ति = परित्यजन्ति।इति।

एवम्, ते = यात्रिणः, मां, स्वपोतं, अनैषुः = नीतवन्तः। पोताध्यक्षेण च, आकर्णितमदुदन्तेन-आकर्णितः मम उदन्तः येन तथाभूतेन सता, 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः। सादरं = सम्मानपूर्वकं, स्वागतीकृतः = समभिनन्दितः, अहं = सिन्धुवादः, प्रस्थितः, समुद्रतीरस्थितं = सागरप्रांतभूमौ

इस प्रकार उस वृद्ध के संकट से मुक्त होकर आनन्दपूर्वक मैं समुद्र तट पर आकर कुछ लोगों के पास आया, जो मधुर पेय जल का संग्रह करने की इच्छा से जहाज रोककर रुके थे। उनके पास आकर मैंने उन्हें अपनी पूरी कहानी सुनाई। यह सुनकर उन्होंने मुझसे कहा-"बहुत से लोग उस वृद्ध के कण्ठपाश की यातना से मर गए। भाग्य से तुम उसके अधीन होकर भी छूट गए। सभी जहाजी व्यापारी यहाँ आना टालते हैं।"

यह कहकर वे मुझे अपने जहाज पर ले गए। जहाज के मालिक द्वारा मेरी

सादरं स्वागतीकृतोऽहं ततः प्रस्थितः समुद्रतीरस्थं किञ्चिन्महत्पत्तनं प्रस्तरमयगृहावलीसंकुलं सम्प्राप्नवम्।

पोतस्थितेषु च मयि सविशेषं बद्धप्रणयः कश्चित् सार्थवाहो मां वैदेशिकवणिग्जनशिबिरं नीत्वा, दत्वा चैकां महतीं गोणीं तादृश-गोणीधारिणः कांश्चिज्जनानुपदर्श्यावदत्- 'अनुसरैतान्, अनुकुरु चैत-त्कृतिम्। नो जातु सङ्गमेषां त्यज। अन्यथा विपदि पतिष्यसि'' इति।

अथ वयमभ्रङ्कषैरतिश्लक्ष्णतया दुरारोहस्कन्धैः फलसम्भृतैर्नारि

अवस्थितं, किञ्चित्, महत् प्रस्तरमयगृहावलीसङ्कुलं-प्रस्तरमयानि = पाषाणैः निर्मितानि यानि गृहाणि = भवनानि तेषां अवलीभिः, संकुलं = व्याप्त, पत्तनं = नगरीं, ''पूः स्त्री पुरीनगर्यौ' वा पत्तनम्'' इत्यमरः। सम्प्राप्नवम् =समागच्छम्।

पोतस्थितेषु = समुद्रयाने वर्तमानेषु यात्रिषु, मयि = सिन्धुवादे, सविशेषं = विशेषतः, बद्धप्रणयः = विहितदृढस्नेहः, कश्चित् = अन्यतमः, सार्थवाहः = समुद्रयात्री मां वैदेशिकवणिग्जनशिविरं-वैदेशिकाः = पराष्ट्रवर्तिनो ये वणिग्जनाः, तेषां शिविरं = निवासभूमिं, नीत्वा एकाम् = अन्यतमां, महतीं = विशालां, गोणीं = शाणीपर्यायं 'बोरा' पदवाच्यं धान्याधारवस्त्रविशेषम् तादृग्गोणीधारिणः-तादृशीः गौणीः धारयन्तीति तान् कांश्चित् जनान् उपदर्श्य = दर्शयित्वा, अवदत् = अकथयत् (त्वम्) एतान् = इमान् गोणीधारिणो जनान्, अनुसर = अनुगच्छ। जातु = कदापि, एषां = जनानां, सङ्गम् = सङ्गच्छतिं, नो त्यज। अन्यथा = एतद्विपरीताचरणे, विपदि = सङ्कटे, पतिष्यसि इति।

अथ वयं = यात्रिणः, अभ्रङ्कषैः = गगचुम्बिभिः, अतिश्लक्षणतया = अतिचिक्कणतया, दुरारोहस्कन्धैः-दुरारोहाः = दुःखेन आरोढुं शक्याः, स्कन्धाः

कहानी सुनकर आदरपूर्वक स्वागत किये जाने पर मैं वहाँ से चल पड़ा और समुद्री तट पर स्थित ऐसे महानगर में पहुँचा जो प्रस्तरों से निर्मित गृहपंक्तियों से भरा हुआ था।

एक सार्थवाह, जो जहाज पर सवार व्यक्तियों की अपेक्षा मुझपर अधिक स्नेह रखता था, उसने मुझे विदेशी श्रेष्ठियों के शिविर में ले जाकर वहाँ पर बोरी (गोणी) देकर उस प्रकार की बोरी लेनेवाले कुछ व्यक्तियों को दिखलाकर कहा-"इनका अनुसरण करो, इनके कार्य का अनुसरण करो, कभी भी साथ

केलतरुभिः पूरितं काननमेकं समासीदाम। स्वाश्च गोणीस्तैर्नारिकेलफलैः पूरयितुकामा बहून् प्लवङ्गमान् नानाप्रमाणानस्मदवलोकनसम्भ्रमेण चपलतया द्रुतं विद्रुत्य वृक्षाग्राणि समारूढान् व्यलोकयाम। सहचराननुकुर्वन्नहं तत्रस्थेषु तेषु प्रस्तरखंडान् संगृह्य समक्षिपम्। ते तु कपयः किलकिलाशब्दैश्चित्रैश्चेङ्गितविशेषैः स्वक्रोधमाविष्कुर्वन्तः प्रत्याजिघांसया

शाखाः येषां तैः, फलसम्भृतैः = फलैः परिपूरितैः, नारिकेलतरुभिः =नारिकेलानां वृक्षैः पूरितं = व्याप्तम्, एकं, काननं = वनं,'गहनं काननं वनम्' इत्यमरः।

समासीदाम = प्राप्नवाम। तैः = नारिकेलफलैः स्वाश्च = निजाः, गोणीः, पूरयितुकामाः = सम्पूरणेच्छुकाः (वयम्) नानाप्रामाणान् = अनेकाकृतीन् अस्मदवलोकनसम्भ्रमेण-अस्माकं यात्रिणाम् अवलोकनेन = दर्शनेन, यः सम्भ्रमः = सन्त्रासः, तेन चपलतया चंचलतया, द्रुतं = शीघ्रं, विद्रुत्य = पलाय्य, वृक्षाग्राणि = तरुशाखाः, समारूढान् = कृतारोहणान्, प्लवङ्गमान् = कपीन् "कपिभेकौ प्लवङ्गमौ" इत्यमरः। व्यलोकयाम = अपश्याम। सहचरान् = सहयात्रिणः, अनुकुर्वन् = अनुसरन्, अहं = सिन्धुवादः, तत्रस्थेषु = तत्र वृक्षाग्रे वर्तमानेषु तेषु, प्रस्तरखण्डान् = पाषाणखण्डान् संगृह्य समक्षिपम् = अपातयम्। ते तु कपयः वृक्षारूढाः वानराः, किरुलकिलाशब्दैः = किलकिल्ध्वनिभिः, चित्रैः = विविधैः विस्मयकारकैः, इङ्गितविशेषैः = विशिष्टचेष्टाभिश्च, स्वक्रोधमाविष्कुर्वन्तः, प्रत्याजिघांसया = प्रतिहन्तुमिच्छया, अस्मान् = यात्रिणः, लक्ष्यीकृत्य = समुद्दिश्य, नारिकेलफलानि, प्राक्षिपन् = अपायतन्। अनया च प्रक्रियया = एतेन वर्णितेनोपायविशेषेण, प्रकारेण = विधिना, सुदुर्लभैः = सुतरां दुष्प्राप्यैः नारिकेलफलैः, स्वाः = निजाः, गोणीः सम्पूर्य, पत्तनं = नगरम्, उपेत्य =

छोड़ने की इच्छा मत करना अन्यथा विपत्ति मे पड़ोगे।"

पश्चात् हमलोग ऐसे जंगल में पहुँचे जो गगनचुम्बी नारियल के वृक्षों से भरा हुआ था। जिनकी शाखाओं पर फिसलन के कारण चढ़ना कठिन था और जो फलों से लदे थे। उन बोरियों को नारियल के फलों से भरने की इच्छा रखने वाले हम लोगों ने वहाँ बहुत से बन्दरों को देखा, जो अनेक आकार के थे और जो हमें देखकर डर एवं चंचलता से जल्दी दौड़कर वृक्ष की शाखाओं पर चढ़ गए। साथियों का अनुसरण करते हुए मैं वहाँ स्थित पत्थरों को एकत्रित कर

नारिकेलफलान्यस्मान् लक्ष्यीकृत्य प्राक्षिपन्। अनया च प्रक्रियया प्रकारान्तरेण सुदुर्लभैर्नारिकेलफलैः स्वा गोणीः सम्पूर्य पत्तनमुपेत्य तद्विक्रयेण बहुधनमुपार्जयम्।

संगृहीतबहुनारिकेलैस्तैर्वणिग्जनैः सह प्रवहणेन ततः सम्प्रस्थितोऽध्वनि केषुचिद् द्वीपेषु सिन्धुतले निमज्य मौक्तिकभूता अनल्पाः शुक्तीरानीय विक्रीणानेभ्यो वणिग्भ्यस्ताः क्रीत्वा विक्रीय च महता मूल्येनसंव-

---

आगत्यः, तद्विक्रयेणं = तेषां नारिकेलफलानां विक्रयं कृत्वा, बहुधनं उपार्जयम् = समपादयम्।

संगृहीतबहुनारिकेलैः-संगृहीतानि, बहूनि नारिकेलानि, यैस्तैः, तैः वणिग्जनैः= व्यापारिजनैः, सह, प्रवहणेन = जलपोतेन, ततः = तस्मात् नगरात्, सम्प्रस्थितः = प्रयातः अध्वनि = मार्गे केषुचित् = अज्ञातप्रायेषु द्वीपेषु,सिन्धुतले = समुद्रस्थागाधतले, निमज्य = मज्जनं कृत्वा, मौक्तिकभूताः = मुक्ताफलैः परिपूर्णाः, अनल्पाः = महतीः, शुक्तीः, आनीय = गृहीत्वा, विक्रीणानेभ्यः = विक्रेयं कृतवद्भ्यः, वणिग्भ्यः = व्यापारिभ्यः, ताः = शुक्तीः, महता मूल्येन क्रीत्वा = क्रयं कृत्वा, संवर्धितनिजविभवः-संवार्धितः निंजः विभवः = सम्पत्तिः येन सः, सकुशलं = कुशलतापूर्वकं, वासरपुरं, प्रत्यावर्तिषि = प्रतिनिवृत्य मल्लाभस्य = मदीयार्जितधनराशेः दशमम् अंशम्, धर्मकर्मसु विनियुज्य=व्ययीकृत्य, महतः, विभवेन = ऐश्वर्येण, ससुखं समयं, अयापयम् = अत्यवाहयम्।"

एवम् = अनेन प्रकारेण, उत्वा = कथयित्वा, सिन्धुवादः हितवादाय विश्राणितशतदीनारः-विश्राणितं = वितीर्णं 'विश्राणनं वितरणम्' इत्यमरः दीनाराणां = सुवर्णमुद्राविशेषाणं, शतं येन सः, अतिथिभिः =अभ्यागतैः,

---

उन्हें उन बन्दरों पर फेकने लगा। वे बन्दर किल-किल ध्वनि से और चित्र विचित्र चेष्टाओं से अपना क्रोध प्रकट करते हुए प्रतिहिंसा की भावना से हमें लक्ष्य कर नारियल के फलों को फेकने लगे। इस प्रक्रिया के प्रकारान्तर से मैंने उन अत्यन्त दुर्लभ नारियल के फलों से अपनी बोरियाँ भरकर शहर में आकर उनके विक्रय से प्रचुर धन अर्जित किया।

प्रचुर नारियल का संग्रह करनेवाले उन श्रेष्ठ वणिकों के साथ जहाज द्वारा मैंने वहाँ से प्रस्थान किया और मार्ग में पड़ने वाले कुछ द्वीपों पर उन व्यापारियों

र्धितनिजविभवः सकुशलं वासरपुरं ततश्च विदामपुरं प्रत्यावर्तिषि। आगत्य च गृहं मल्लाभस्य दशममंशं धर्मकर्मसु विनियुज्य महता विभवेन सह ससुखं समयमयापयम्।"

एवमुक्त्वा सिन्धुवादो हितवादाय विश्राणितदीनारशतोऽतिथिभिः समं गृहं प्रास्थापयत्।

परस्मिंश्च दिने सम्प्राप्तेषु तेषु पूर्ववद् भुक्तवत्सु सावधानं शृण्वत्सु स स्वां षष्ठीं सिन्धुयात्रां वर्णयितुमित्थमारभत।

समं,गृहं, प्रस्थापयत् = प्रेषयामास।

परस्मिंश्च = द्वितीयस्मिन् दिने, तेषु = अतिथिषु (सहितवादेषु), सम्प्राप्तेषु = समागतेषु पूर्ववत् भुक्तवत्सु = भोजनं विहितवत्सु, सावधानं च शृण्वत्सु सत्सु, सः = सिन्धुवादः, षष्ठी सिन्धुयात्रां वर्णयितुं, इत्थम् आरभत = उपचक्राम।

से उन सीपों को खरीदा जो समुद्रतल में गोता लगाकर मोतियों से प्रचुर सीपों को लाकर बेचते थे। मूल्य द्वारा बेचकर अपनी सम्पति बढ़ाते हुए सकुशल वासरपुर तथा वहाँ से विदामपुर लौट आया। घर आकर अपने लाभ का दसवाँ हिस्सा धर्म-कार्य में खर्च करते हुए विशाल वैभव के साथ सुखपूर्वक समय व्यतीत करने लगा।

यह कहकर सिन्धुवाद ने हितवाद को सौ दीनार देते हुए अतिथियों के साथ भेज दिया। दूसरे दिन उनके आने पर और पूर्ववत् भोजन करने पर वे सावधान होकर (अगली यात्रा) सुनने लगे। उसने अपनी छठीं सिन्धुयात्रा इस प्रकार सुनानी आरम्भ की।



षष्ठी सिन्धुयात्रा

वर्षमात्रं सुखोपभोगे प्रयाप्य भूयोऽपि दुर्दैवेन प्रेरितः साश्रुलोचनैर्बान्धवैर्निषिद्ध्यमानोऽपि षष्ठीं यात्रामुद्दिश्य गृहान्निरगाम्। प्रवहणाधिरूढान् कञ्चन कालं सुखेन प्रचलतोऽस्मानेकदाऽकस्मात् पोताध्यक्षः सम्भ्रांतः क्षिप्तशिरस्त्राण उल्लुञ्चितश्मश्रुः सन्ताडितशीर्ष

वर्षमात्रं, सुखोपभोगे = वैषयिकानन्दास्वादे, प्रयाप्य = व्यतीत्य, भूयोऽपि, दुर्दैवेन, प्रेरितः साश्रुलोचनैः = अश्रुभिः सहितानि लोचनानि = नेत्राणि, येषां तैः, बान्धवैः निषिद्ध्यमानः = निवार्यमाणोऽपि, अहं सिन्धुवादः, षष्ठीं यात्रां उद्दिश्य, गृहात्, निरगम् = प्रयाणं कृतवान्। प्रवहणाधिरूढान् -प्रवहणे = जलयाने अधिरूढान् = कृतारोहणान्, कञ्चन, कालं सुखेन, प्रचलतः, अस्मान् = यात्रिणः, एकदा, अकस्मात् पोताध्यक्षः, (पोताध्यक्षं विशिनष्टि) सम्भ्रान्तः = सन्त्रस्तः, क्षिप्तशिरस्त्राणः क्षिप्तं = त्यक्तं, शिरस्त्राणं येन सः, उल्लुञ्चितश्मश्रुः-उल्लुञ्चि = उत्पाटितं, श्मश्रु येन सः सन्ताडितशीर्षः-सन्ताडितं, शीर्षः = मस्तकं येन सः, आर्तनादेन = दुःखशब्दैः, दिशः पूरयन् = व्याप्नुवन्, अस्माभिः = यात्रिभिः, तत्कारणं पृष्टः। दीर्घम् = उच्चैः, निःश्वस्य, अवोचत्। " हताः स्मः = नष्टाः स्मः! तीव्रेण, सिन्धुरयेण = सामुद्रिकचक्रवातेन, उह्यमानाः = धार्यमाणाः, वयम्, अचिरात् = तत्कालमेव नंक्ष्यामः = नाशं प्राप्स्यामः। केवलं परमेश्वरानुग्रह एव-परमेश्वरस्य = भगवतः, अनुग्रहः = कृपा एव, अस्मान् = यात्रिणः, त्रातुम् = रक्षितुम्, प्रभवति =शक्नोतीति। अथ = अनन्तरं, वातबलेन = वायुवेगेन, पोतवसनरज्जुषु = पोतस्य = प्रवहणस्य, वसनरज्जुषु = वस्त्र

छठीं समुद्री यात्रा

केवल एक वर्ष आनन्दपूर्वक व्यतीत कर अश्रुपूर्ण नयनों से बन्धु-बान्धवों द्वारा रोके जाने पर भी दुर्दैव से प्रेरित होकर मैं पुनः छठीं यात्रा करने के लिए घर से निकल पड़ा। जहाज पर सवार होने पर उसका अधिकारी कुछ समय सुखपूर्वक प्रवास करने के बाद हमलोगों से एक बार अकस्मात् घबड़ाकर शिरस्त्राण फेंककर, दाढ़ी नोचते हुए, सर फोड़ते हुए, आर्तनादों द्वारा दिशाओं को गुञ्जित करने लगा, तब हमलोगों द्वारा उसका कारण पूछे जाने पर लम्बी

आर्तनादैर्दिशः पूरयन्नस्माभिस्तत्कारणं पृष्टो दीर्घं निःश्वस्यावोचत्- हन्त! हताः स्मः। तीव्रेण सिन्धुरयेणोह्यमाना वयमचिरान्नंक्ष्यामः। केवलं परमेश्वरानुग्रह एवास्मांस्त्रातुं प्रभवति, इति। अथ वातबलेन त्रुटितासु पोतवसनरज्जुषु अवशतां गतमस्मत्प्रवहणमेकस्मिन् शिलासङ्घाते निपत्य खण्डशोऽभवत्। एवमपि भक्ष्यपदार्थान् कानिचित् बहुमूल्यानि पण्यवस्तूनि च ससम्भ्रममुद्धृत्य तीरभुवमवतीर्णा अति निर्जनतया तस्य प्रदेशस्य जीवितनिराशा वाष्पाकुललोचना वयं भृशमाक्रंदाम। गिरेरेकस्य

रज्जुषु, त्रुटिटासु = खण्डितासु, अवशतां = पराधीनतां, गतम् अस्मत्प्रवहणं = अस्माकं यात्रिणां जलयानं, एकस्मिन् = शिलासंघाते = प्रस्तरसमूहे, निपत्य = पतित्वा खण्डशोऽभवत् = चूर्णीभवति स्म। एवमपि = ईदृश्यामवस्थायामपि, भक्ष्यपदार्थान् = भोज्यसामग्रीः, कानिचित्, बहुमूल्यानि महार्घाणि, पण्यवस्तूनि च विक्रेयद्रव्याणि च, ससम्भ्रमं =सत्वरम्,ऊद्धृत्य, तीरभुवं = तटस्थलीम्, अवत्तीर्णाः = कृतावरोहणाः, तस्य प्रदेशस्य = तस्य स्थानस्य, अतिनिर्जनतया = अत्यन्तं प्राणिराहित्येन, जीवितनिराशाः-जीवितेन (प्राणैः) निराशाः, वाष्पाकुललोचनाः = अश्रुपूर्णनयनाः, वयं , भृशम् , आक्रन्दाम। एकस्य,गिरेः पर्वतस्य, पादमूले, स्थिताः, नानाभग्नप्रवहणावशेषान् -नानविधानां भग्नानां, प्रवहणानां = पोतानाम्, अवशेषान्, नरास्थिसङ्घातान् = मनुष्याणामस्थिसमूहान्, उच्चावचपण्यवस्तुराशींश्च-उच्चावचनां-नैकप्रकाराणाम् 'उच्चावचं नैकभेदम्'इत्यमरः। पण्यवस्तूनां = विक्रेयपदार्थानां च राशीन् = समूहान् च, अभितः = सर्वतः, विकीर्णान् इतस्ततः प्रसृतान्, एकां सिन्धुप्रभवां समद्रोत्पन्नां, सरितां नदीं च, तं द्वीपं परिवृत्य संवेष्ट्य, क्वचित्, अज्ञातस्थले, विशालमुख्यां = विशालं मुखं

साँस लेकर वह बोला-

"हाय! मारे गये। भयङ्कर समुद्री तूफान में फँसने से हमलोग जल्दी ही नष्ट होंगे। केवल परमेश्वर की कृपा ही हमें बचा सकती हैं।"

अनन्तर बवंडर के वेग से जहाज के पाल की रस्सियाँ टूटने पर बेकाबू हो कर हमारा जहाज एक चट्टान से टकरा कर चकनाचूर हो गया। ऐसी स्थिति में भी कुछ भक्ष्य पदार्थों को और कुछ बहुमूल्य विक्रेय वस्तुओं को जल्दी-जल्दी निकालकर किनारे उतर हमलोग उस प्रदेश के अत्यन्त निर्जन होने कारण जीवन

पादमूले स्थिताश्च नानाभग्नप्रवहणावशेशान् नरास्थिसङ्घातान् उच्चावचपण्यवस्तुराशींश्चाभितो विकीर्णानपश्याम। सरितंचैकां सिन्धुप्रभवां द्वीपं तं परिवृत्य क्वचिद्विशालमुख्यां कन्दरायां विलीनामभिनवमौक्तिकमाणिक्यहीरकमणिमयं महीध्रम्, नयनहारिणीं तरुसन्दोहसुषमामदृष्टपूर्वां निरीक्ष्य विस्मयं प्राप्नुम।

तत्र च द्वीपे भग्नहृदयेषु निश्चितनिधनेषु परस्परं समं विभाजिता-

---

यस्यास्तस्यां कन्दरायाम् = गुहायां, विलीनां = अदृश्यतां, गतां सतीम्, नीरीक्ष्य, (सर्वाः नद्यः कन्दरातः समुत्पन्ना समुद्रे लीयन्ते, इयं तु समुद्रोद्भवा कन्दरायामलीयत इत्ययमत्र विस्मयहेतुः)। तथैव, अभिनवमौक्तिकमाणिक्यहीरकमणिमयं-मौक्तिकानि, माणिक्यानि, हीरकानि, मणयश्चेति, मोक्तिकमाणिक्यहीरकमणयः, अभिनवाः = नवीनः, ये मौक्तिकमाणिक्यहीरकमणयः, प्रचुरम् (प्राचुर्यार्थे मयट् प्रत्ययः।) एवंविधं, महीधरं = पर्वतं, तथा नयनहारिणीं = नेत्रानन्दजननाम्, अदृष्टपूर्वां = पूर्वमनवलोकितां, तरुसन्दोहसुषमां = तरूणां = वृक्षणाम्, सन्दोहस्य = समूहस्य, या सुषमा = परमाशोभा "सुषमा परमा शोभा"इत्यमरः। निरीक्ष्य= अवलोक्य, विस्मयम् = आश्चर्यम्,प्राप्नुम=·अन्वभवाम।

तत्र च = तस्मिन्नतिनिर्जने द्वीपे निखिलेषु-पूर्णेषु मत्सहचरेषु, भग्नहृदयेषु = भग्नानि हृदयानि येषां तेषु, निश्चितनिधनेषु-निश्चितम् = अवश्यसम्भावि, निधनं = मरणं येषां तेषु, परस्परं, समं,विभाजितावशेषाशनजातेषु-विभाजितं = विभज्य वितीर्णम्, अवशेषम् = अवशिष्टम्, अशनजातं = भोज्यसामग्री येषां, तेषु, कश्चित्, स्वल्पं कालं, उषित्वा = स्थित्वा, निरवशेषभक्ष्यतया-निरवशेषं =

से निराश हो गए तथा अश्रुपूर्ण नयनों से अत्यधिक क्रंदन करने लगे। एक पहाड़ के नीचे खडे होकर हमलोगों ने अनेक टूटे हुए जहाजों के भग्नावशेषों, मनुष्य की हड्डियों तथा अनेक प्रकार की श्रेष्ठ विक्रेय वस्तुओं को चारों ओर बिखरे हुए देखा। हमलोगों ने वहाँ एक ऐसी नदी को भी देखा, जो समुद्र से उत्पन्न उस द्वीप की परिक्रमा कर विशाल मुखवाली कन्दरा में कहीं लुप्त हो गई थी। वहाँ अभिनव मोती और हीरों के पहाड़ को तथा नयनाह्लादिनी अदृष्टपूर्व वृक्षसमूह की सुषमा को देखकर हमलोग आश्चर्य करने लगे।

उस द्वीप पर हमलोगों का हृदय टूट चुका था। हमारी मृत्यु निश्चित थी।

वशेषाशनजातेषु कञ्चित्कालमुषित्वा निरवशेषभक्ष्यतया एकैकशो नामशेषतां गतेषु निखिलेषु मत्सहचरेष्वत्यल्पावशेषाान् आत्मनोऽप्यचिराद् भाविनीं तामेव गतिमुत्प्रेक्षमाण एतद्यात्राक्लेशाङ्गीकरणेन मुहुरनु-तप्यमानोऽहं तटिनीं परिवीक्ष्य कन्दरान्ते क्वचिन्निर्गच्छन्तीं तां सम्भावयन् फलक एकस्मिन् सङ्गृहीतमाणिक्यस्फटिकमणिविसरमात्मानं दृढं वद्ध्वा परमेश्वरं ध्यायन् स्रोतस्विनीप्रवाहानुरोधेनावहम्।

समाप्तं च यत् भक्ष्यं = खाद्यसामग्री, तस्य भावः निरवशेषता, तया हेतुभूतया एकैकशः = क्रमशः, नामशेषतां = कथावशेषतां, गतेषु उपरतेष्विति यावत्। अत्यल्पावशेषाशनः-अत्यल्पं = स्वल्पतमम्, अवशेषम् = अवशिष्टम्, अशनं = भोज्यं यस्य सोऽहं सिन्धुवादः, आत्मनः = स्वस्यापि, अचिरात् = स्वल्पैरेव क्षणैः भाविनीं, तामेव = नियतनिधनां, गतिं = दुरवस्थाम्, उत्प्रेक्षमाणः = सम्भावयन्, एतद्यात्राक्लेशाङ्गीकरणेन, एतस्याः = यात्रायाः = समुद्रप्रवासस्य ये क्लेशाः = कष्टानि, तेषाम् अङ्गीकरणेन = स्वीकारेण, मुहुः = पुनः पुनः, अनुतप्यमानः = पश्चात्तापं विदधानः, दैवेन = सौभाग्येन, किञ्चित्, आहितधैर्यः-आहितं = धृतं, धैर्यं = साहसं येन सः, अवधानेन, सिन्धूद्भवां, कन्दरायां = गुहायां, विलीनां = लुप्तां, तां तटिनीं = नदीं, परिवीक्ष्य = दृष्ट्वा, तां = तटिनीं, कन्दरान्ते = गुहायाः समाप्तौ क्वचिन्, निर्गच्छन्तीं सम्भावयन्, एकस्मिन्, फलके = काष्ठपट्टिकायाम्, संगृहीतमाणिक्यस्फटिकमणिविसरम् संगृहीतः = सङ्कलितः, माणिक्यानां, स्फटिकमणीनां च विसरो येन तम्, आत्मानं दृढं, बद्ध्वा, परमेश्वरम्, ध्यायन् स्रोतस्विनीप्रवाहानुरोधेन-स्रोतास्विन्याः= नद्याः, प्रवाहस्य अनुरोधेन, अवहम् = प्रवाहपतितोऽभवम्।

हमलोगों में से कुछ वहाँ अवशिष्ट भोजन-सामग्री समाप्त होने के कारण एक-एक करके नामशेष हो गये। मेरे पास भी थोड़ा भोजन बच गया। मैं अपनी भी शीघ्र होनेवाली उसी दुर्गति की कल्पना करते हुए इस यात्रा के कष्ट को स्वीकार करने के लिए बार-बार पश्चाताप करने लगा। दैव ने मेरा धैर्य शेष रखा। समुद्र से उत्पन्न उस नदी को ध्यानपूर्वक गुफा में लुप्त होती हुई देखकर उसके अन्त में उससे निकलने का अनुमान लगाते हुए एक पटरे पर माणिक्य स्फटिक मणि आदि की राशि को एकत्रित कर परमेश्वर का ध्यान करते हुए नदी के प्रवाह के

कांश्चित् दिवसान् तिमिरावृतायां कन्दरायां क्वचित् सङ्कुचितप्रदेश उपरितनशिलास्वाहन्यमानशीर्षोऽतिमितं भोज्यं समये समयेऽश्नन् क्वचित् स्वपन् क्वचिज् जाग्रत् सन्ततमवहम्।

एकदा चैवं वहन् सुप्तप्रबुद्ध आत्मानमेकत्र समस्थल एकस्याः स्रवन्त्यास्तटोपकण्ठे संयतमदीयाश्रयफलके कालवर्णैः कैश्चित् पुरुषैः परिवृतमद्राक्षम् उत्थाय चताननमम्। तैश्च किञ्चिदुक्तोऽविदिततद्भावस्तूष्णीं

कांश्चित् दिवसान् तिमिरावृतायां = गाढान्धकाराच्छन्नयां, कन्दरायां = गुहायां, क्वचित्, संकुचित प्रदेशे, उपरितनशिलासु = उच्चैः स्थितेषु प्रस्तरखण्डेषु आहन्यमानशीर्षः-आहन्यमानं ताड्यमानं, शीर्षं = शिरः, यस्य सः "उत्तमाङ्ग शिरः शीर्षम्" इत्यमर। अतिमितं = स्वल्पतमं, भोज्यं, समये समये अश्नन् = भुञ्जन्, क्वचित्, स्वपन् = निद्राणः, क्वचित्, जाग्रत्, सन्ततं = निरनतरम् अवहम्।

एकदा, च, एवं = तथैव, वहन् = सन्, सुप्तप्रबुद्धः = पूर्वं सुप्तः, पश्चात् प्रबुद्धः, एकत्र = एकस्मिन्, समस्थाने = अविषमभूमौ, एकस्याः, स्रवन्त्याः = नद्याः संयतमदीयाश्रयफलकं-संयतं = बद्धं, मदीयं = निजं, आश्रयफलकं = आधारपट्टिका, यत्र तस्मिन् तटोपकण्ठे = तीरसमीपे, आत्मानं, कालवर्णैः कैश्चित् = स्वल्पैः, पुरुषैः परिवृतम् = वेष्टितम् अद्राक्षम्, उत्थाय च, तान् =कृष्णवर्णान् पुरुषान्, अनमम् = प्रणांम कृतवान्। तैश्च = किञ्चित्, उक्तः, अविदिततद्भावः-न विदितः तेषां पुरुषाणां भावः = अभिप्रायः येन सः, कञ्चित् कालं, तूष्णीं, स्थितः = मौनमाश्रितः। स्वभाषायां, विपत्समुत्तारणाय-विपदात् = संङ्कटात् समुत्तारणाय पारं गन्तुं, परमेश्वरं, प्राशंसम् = समभ्यनन्दम्।

अनुरूप मैं बहने लगा।

कुछ दिनों तक बहते हुए अँधरे से भरी हुई उस गुफा में कहीं अत्यन्त संकुचित प्रदेश में ऊपर की चट्टानों से मेरा सिर टकराता था। मैं समय-समय पर बहुत कम भोजन करता था। कहीं सोता, कहीं जागता था। इस प्रकार उस नदी में कुछ दिनों तक मैं निरन्तर बहता रहा।

उसी प्रकार बहते हुए, एक बार मैंने तन्द्रा (अर्ध निद्रा) में अपने को समभूमि पर एक नदी के किनारे जहाँ मेरा आश्रय का फलक बँधा था, अपने को काले

कञ्चित् कालं स्थितः स्वभाषायां विपत्समुत्तारणाय परमेश्वरं प्राशंसम्।

तेषु च कृष्णपुरुषेषु विज्ञातमदीयभाष एको मत्प्रार्थनां श्रुत्वा समुपेत्यैवमवोचत् 'माऽस्मानिह निरीक्ष्य विस्मितो भूः। वयं किल गिरेः प्रवहन्त्यास्तटिन्या उदकं कुल्याभिर्विभज्य क्षेत्राणि स्वकीयानि संशेक्तुमनस इहागच्छाम। जलस्रोतसा सार्धं प्रवहत् त्वदाधारं फलकं विलोक्य विधृत्य बद्ध्वा च तीरे प्रदेशे सुप्तस्य तव प्रलोधकालं

तेषु च, पुरुषेषु, एकः, विज्ञातमदीयभाषः विज्ञाता = विदिता, मदीया भाषा येन तथाभूतः सन्, मत्प्रार्थनां श्रुत्वा, समुपेत्य = अग्रे समुपसृत्य, एवम् अवोचत् -(त्वम्) इह-नदीतटे, अस्मान् = पुरुषान्, निरीक्ष्य = दृष्ट्वा, मा विस्मितो भूः = आश्चर्यं मा कुरु। वयं किल गिरेः = पर्वतात्, प्रवहन्त्यः = प्रवाहशीलायाः, तटिन्याः = नद्याः, उदकं = जलं, कुल्याभिः = वारिप्रणालिकाभिः 'कुल्या नदी कुल्यमास्थि कुल्या वारिप्रणालिका, इति धरणिः। विभज्य स्वकीयानि क्षेत्राणि = कृषिःभूमिं, संसेक्तुमनसः-सुसेक्तुम = आर्द्रतां गमयितुम्, मनांसि = चेतांसि, येषा एवंभूता वयम्, इह आगच्छाम। जलस्रोतसा = सलिलप्रवाहेण, सार्धं = सह, प्रवहत् = प्रवाहशीलं, त्वदाधारफलकं = त्वदीयाश्रयपट्टिकां, विलोक्य, बद्धवा = संयम्य च, तीरप्रदेशे = तटस्थले च, सुप्तस्य, तव, प्रबोधकालं = जागरणावस्थावसरं, प्रतीक्षमाणा, आरम । दिष्ट्या = भाग्येन त्वं, महतः, सकङ्कटात् = विपदः, मुक्तः। साम्प्रतम्, स्ववृत्तान्तकथनेन = निजयात्रावार्ताश्रावणेन, अस्मान् अनुगृहाण। अहं च , भुक्ततद्वितीर्णकिञ्चद्भोजनः- भुक्तम् आस्वादितं, तैः = कृष्णपुरुषैः वितीर्णं = प्रदत्तं किञ्चित् भोजन येन सः स्वं वृत्तान्तम्, अकथयम् = न्यवेदयम्।

रंगों के पुरुषों से घिरे हुए देखा। मैंने उठकर उन्हें प्रणाम किया। उन्होंने मुझसे कुछ कहा, परन्तु मैं उनके अभिप्राय को न समझकर कुछ समय तक चुप रहा और अपनी भाषा में विपत्ति से छुटकारा पाने के लिए परमेश्वर की स्तुति करने लगा।

उन काले पुरुषों में से एक ने मेरी भाषा तथा मेरी प्रार्थना समझकर और आगे बढ़कर इस प्रकार कहा–"हमें यहाँ देखकर तुम आश्चर्यचकित मत होना। हमलोग पहाड़ से बहने वाली नदी के जल को नहरों में विभक्त कर, अपने खेत सींचने की इच्छा से यहाँ आते है। जल प्रवाह के साथ बहने वाले तुम्हारे आश्रयस्वरूप फलक को देखकर, उसे पकड़ और किनारे पर बाँधकर तुम्हारे

प्रतीक्षमाणा आस्म। दिष्ट्या त्वं महतः सङ्कटान्मुक्तः। साम्प्रतं स्ववृत्तान्तकथनेनानुगृहाणास्मान्, इति। अहं च भुक्ततद्वितीर्णकिञ्चिद्भोजनः स्वं वृत्तान्तमकथयम्।

तेऽपि तदाकर्णनेनातिविस्मिता मदीयं साहसं सादरमभिष्टुत्य मां तत्रत्यं नृपतिमुपगन्तुम् तं चात्मचित्रवृत्तान्तवर्णनेन विनोदयितुम् भृसमन्वरुन्धन्। अङ्गीकृततत्प्रार्थनोऽहं सपदि समानीतं तुरङ्गममध्यारोपितः पार्श्वस्थितः कैश्चित् प्रदर्श्यमानमार्ग इतरैश्च कैश्चित् स्कन्धाधिरोपितास्मत्सरत्ननिचयफलकैः अनुसृयमाणोऽगच्छम्।

तेऽपि = पुरुषाः, तदाकर्णनेन-मदीयवृत्तांतश्रवणेन, अतिविस्मिताः = अत्यन्तमाश्चर्यचकिताः, मां-तत्रत्यं = तद्द्वीपे वर्तमानं, नृपतिं = राजानम् उपगन्तुम् = समुपसर्तुं, तं च = नृपतिम्, आत्मचित्रवृतान्तवर्णनेन-आत्मनः स्वस्य चित्रस्य = विस्मयकारिणः, वृत्तांतस्य = वार्तायाः, वर्णनेन = श्रावणेनेति यावत्। विनोदयितम् = आनन्दयितुम्, भृशम्, अन्वरुन्धन् = प्रार्थयामासुः। अङ्गीकृततत्प्रार्थनः = अङ्गीकृता = स्वीकृता, तेषां = पुरुषाणां, प्रार्थना, येन सोऽहं, सपदि, समानीतं = समुपस्थापितं, तुरङ्गम् = अश्वम्, अध्यारोपितः = कारितारोहणः, पार्श्वस्थितैः = निकटे वर्तमानैः, कैश्चित् = कतिपयैः, पुरुषैः, प्रदर्श्यमानमार्गः-प्रदर्श्यमानःमार्गः यस्य सः= स्कन्धाधिरोपितास्मत्सरत्ननिचयफलकैः-स्कन्धेषु अधिरोपितानि = स्थापितानि, मम, सरत्ननिचयानि = रत्नराशिभिः, परिपूर्णानि, फलकानि=काष्टपट्टिकाः, यैस्तैः अनुसृयमाणःअगच्छम् = प्रयाणमकरवम्।

जागने की प्रतीक्षा कर रहे थे। भाग्य से तुम भारी संकट से मुक्त हुये हो। इस समय अपना वृत्तांत कहकर हमें अनुगृहीत करो।" मैंने उनके द्वारा दिया हुआ थोड़ा भोजन कर अपना वृत्तान्त कहा।

उन्होंने भी मेरे वृत्तांत को सुनकर आश्चर्यचकित होते हुए मेरे साहस की प्रशंसा कर, मुझे वहाँ के राजा के पास जाने के लिये और अपना विचित्र वृत्तांत सुनाकर उनका मनोरंजन करने के लिये अत्यन्त आग्रह किया। उनकी प्रार्थना को स्वीकार करते हुये मैं तत्काल लाये हुये घोड़े पर बैठ कर चलने लगा। पार्श्ववर्ती कुछ लोग मुझे मार्ग दिखा रहे थे और दूसरे लोग रत्नों की राशि के फलकों को कन्धे पर रखकर अनुसरण कर रहे थे।

तैश्च राजसदनं नीतः सिंहासनारूढं महाराजं वीक्ष्य जानुभ्यामवनौ निपत्य सविनयादरं दण्डप्रणाममकरवम्। स मां सप्रणयमुत्थाप्य पार्श्वे उपवेश्य मदभिधानं वसतिस्थानं तत्रागमनप्रकारमनेकसिन्धुयात्रावर्णनानि च मत्तः समाकर्ण्य प्रहृष्टो मद्यात्रावर्णनानि सौवर्णवर्णेषु विलेख्य स्वकीये पुस्तकालये सुरक्षितानि सङ्ग्रहीतुमियेष। मया सहानीतानि तानि माणिक्यादीनि स्वरत्नकोशेऽपि सुदुर्लभान्यनर्घाणि वीक्ष्य भृशं परितुतोष।

तं तथा प्रहृष्टं निरीक्ष्य मया सविनयेन समुपह्रियमाणं तं

तैश्च = पुरुषैः, राजसदनं नीतः, सिंहासनारूढं = सिंहासने समुपविष्टं, महाराजं , वीक्ष्य = दृष्ट्वा, जानुभ्याम् = उरुपर्वभ्याम् अवनौ = पृथिव्यां, निपत्य = पतित्वा, सविनयादरं-विनयश्च आदरश्च विनयादरौ, ताभ्यां सहितं दण्डप्रणामं, साष्टांगप्रणाममित्यर्थः अकरवम्। सः = महाराजः, मां, सप्रणयं = स्नेहपूर्वकम्, उत्थाप्य, पार्श्वे, उपवेश्य = उपवेशनं कारयित्वा, मदभिधानं = मदीयं नामधेयं, वसतिस्थानं = जन्मभूमिं, तत्र = द्वीपे, आगमनप्रकारं = आगमनस्य विधाम्, अनेकसिन्धुयात्रांवर्णनानि,मत्तः = सिन्धुवादात्, समाकर्ण्य = श्रुत्वा, प्रहृष्टः = आनन्दितः, मद्यात्रावर्णनानि = मम प्रवासवृत्तान्तानि, सौवर्णवर्णेषु = सुवर्णमयेषु, अक्षरेषु, विलेख्य = लेखयित्वा पुस्तकालये = ग्रन्थागारे, सुरक्षितानि = सम्यक प्रकारेण रक्षितानि, संगृहीतुम्- सङ्कलयितुम् इयेष = कामयामास। मया सह, आनीतानि, तानि सुदुर्लभानि = सुतराम् अप्राप्याणि, अनर्घाणि = बहुमूल्यानि, माणिक्यादीनि = माणिक्यप्रभृतीनि रत्नानि, स्वरत्नकोशेऽपि = निजरत्नागारेऽपि, वीक्ष्य = दृष्ट्वा,भृशम्, परितुतोष = सन्तोषमाप।

तं = महाराजं, तथा प्रहृष्टं, निरीक्ष्य, सविनयेन, मया समुपह्रियमाणं =

उनके द्वारा मैं राजप्रसाद में ले जाया गया। वहाँ के राजा को सिंहासन पर आरूढ़ देखकर, मैंने विनय और आदर के साथ घुटने टेककर साष्टांग प्रणाम किया। उसने मुझे प्रेमपूर्वक उठाकर, अपने निकट बैठाकर और मुझसे मेरा नाम, निवासस्थान, आने का कारण और अनेक समुद्री यात्राओं के वर्णन सुनकर, हर्षित होते हुए मेरे यात्रावर्णनों को सुवर्णाक्षरों में लिखवाकर, अपने पुस्तकालय में सुरक्षित रखने की इच्छा प्रकट की। मेरे साथ लाये हुए रत्नों को अपने खजानों में अत्यन्त दुर्लभ तथा बहुमूल्य देखकर वह अत्यन्त सन्तुष्ट हुआ।

उसे इस प्रकार देखकर, मैंने उस रत्नराशि को विनयपूर्वक उसे उपहार

रत्ननिचयमस्वीकृत्य सोऽवदत् -"आर्य! सोऽयं रत्ननिचयस्त्वत्साहस-परितुष्टेन विधिना तुभ्यं प्रसादीकृतस्त्वयैवोपभोगयोग्यो नेतरेण। मया किलेषोऽभिनवोपहारैः परिवर्धनीयो न तनुतां नेयः" इति। अहं तस्यौदार्यं प्रशंसंस्तस्योत्तरोत्तरमभिवर्धमानामभिवृद्धिं सर्वतोभाविनीं समैहे।

अथ तेन मदर्थं प्रकल्पिते सपरिकरे सहपरिजने गृहे वसन् प्रत्यहमुपसेवितराजद्वारो नगरनिरीक्षणादिभिः समयं कञ्चिद् व्यत्यापयम्।

मयोपायनीक्रियमाणं तं रत्ननिचयं = रत्नानां राशिम्, अस्वीकृत्य = अगृहीत्वेत्यर्थः। सः द्वीपाधिपः, अवदत् = अब्रवीत्-"आर्यः = भद्र! सोऽयं रत्ननिचयः, त्वया समर्प्यमाणः, त्वत्साहसपरितुष्टेन = तव धैर्यमवलोक्य प्रसन्नेन, विधिनां = भाग्येन, तुभ्यं = भवते, प्रसादीकृतः = उपहृतः त्वयेव, उपभोगयोग्यः = समुपभोक्तुमर्हः, इतरेण नोपभोगयोग्यः। मया किल एषः = रत्ननिचयः, अभिनवोपहरैः = नूतनैः उपायनद्रव्यैः परिवर्धनीयः अभिवृद्धि नेयः तनुतां = कृशतां न नेयः' इति। अहन्तस्य = नृपस्य, औदार्यम् = उदारतां, प्रशंसन् = अभिनन्दन्, तस्य उत्तरोत्तरं = दिनानुदिनम्, अभिवर्धमानां = वृद्धिं प्राप्यमाणाम्, सर्वतोभाविनी = सर्वाङ्गीणाम्, अभिवृद्धिम् = उत्कर्ष, समैहे = अकामयम्।

अथ, तेन, मदर्थं = ममकृते, प्रकल्पिते = निर्मिते, सपरिकरे = परिवारसहिते, सहपरिजने = सेवकैः, परिवृते, गृहे, वसन्, प्रत्यहं = प्रतिदिनम्, उपसेवितराजद्वारः-उपसेवितं = उपास्यमानं, राजद्वारं येन सः नगर-निरीक्षणादिभिः = नगरस्य अवलोकनप्रभृतिभिः कार्यैः, कञ्चित् = कतिपयं समयं = कालम् व्यत्यापयम् = व्यतीतं कृतवान्।

स्वरूप समर्पित किया। उसको अस्वीकार कर उसने कहा-"महाशय! यह रत्नराशि तुम्हारे साहस से प्रसन्न होकर विधाता ने तुम्हें भेंट की है। इसका उपभोग तुम ही कर सकते हो दूसरा नहीं। मुझे नूतन उपहारों से इसकी वृद्धि करनी चाहिए ह्रास नहीं।" मैंने उसकी उदारता की प्रशंसा करते हुए, उसकी उत्तरोत्तर होने वाले सर्वाङ्गीण उत्कर्ष की कामना की। पश्चात् मैंने उसके द्वारा मेरे लिए प्रदत्त घर परिवार और अनेक सेवकों के साथ रहते हुए, प्रतिदिन राजदरवार की सेवा करते हुए, नगर निरीक्षणादि के रूप में कुछ समय व्यतीत किया। उस द्वीप के विषुव रेखा (भूमध्य रेखा) के निकट होने कारण दिन और

स द्वीपः किल विषुवरेखावस्थानेन समानदिननिशायामोऽचलो पत्यकाया नयनहारिण्या मध्यमध्युषितया समृद्धया राजधान्या समलङ्कृतः पद्मरागादिमहार्घमणिमौक्तिकबहुलो धातुवट्ठणत्कारिचित्रवर्णप्रस्तररत्न-सम्भृतो वनश्रीसमाकृष्टनयनयुगो मां भृशं व्यनोदयत्।

अथैकदा सम्प्रार्थितेन भूपेनानुमतगृहगमनाय महान्तमर्थराशिं

विषुवरेखावस्थानेन-विषुवरेखा = भूमध्यरेखा तत्र अवस्थानेन = निकट स्थित्या, समानदिननिशायामः-समानाः = समरूपतया विभजिताः, दिनस्य = दिवासस्य,निशायाः = रात्रेश्च यामाः = प्रहराः यस्मिन् सः। नयनहारिण्यः = नेत्राह्लादिन्याः अचलोपत्यकायाः = पर्वतान्तभूमेः, मध्यं = मध्यभागम्, अध्युषितया = स्थितया, समृद्धया = ऐश्वर्यप्रचुरया, राजधान्या, समलंकृतः = भूषितः पद्मरागादिमहार्धमणिमौक्तिकबहुलः-पद्मरागादिभिः = पद्मरागप्रमुखैः, महार्घैः = बहुमूल्यैः मौक्तिकैः, बहुलः = प्रचुरः धातुवट्ठणत्कारिचित्रवर्णप्रस्तर-रत्नसम्भृतः-धातुवत् = लोहादिधातुसमानानि, ठणत्कारीणि = ताडनमनु ठम्। ठमिति शब्दकारीणि चित्रवर्णानि = नानारूपाणि, यानि, प्रस्तररत्नानि = रत्नमयपाषाणाः तैः सम्भृतः = परिपूर्णः, वनश्रीसमाकृष्टनयनयुगः-वनश्रिया = अरण्यशोभया, समाकृष्टं = समावर्जित, नयनयोः = नेत्रयोः, युगं येन सः, स द्वीपः किल मां = सिन्धुवादं भृशं = अत्यन्तं व्यनोदयत् = रञ्जयामास।

अथ, एकदा (मया) सम्प्रार्थितेन = याचमानेन, भूपेन = राज्ञा, अनुमतगृहगमनाय-अनुमतं = समर्थितं, गृहं प्रति गमनं यस्मै तस्मै,ततः = राज्ञः, महान्तं =

रात के प्रहर समान थे। उसकी ऐश्वर्यशालिनी राजधानी नयनाकर्षक पहाड़ी की तराई में थी। उसमें पद्मराग आदि बहुमूल्य मौक्तिक प्रचुर मात्रा में थे। वह द्वीप धातुओं की तरह ठनठनाहट से युक्त रङ्ग-विरङ्गे रत्नों की चट्टानों से भरा हुआ था। उसकी वनश्री नयनों को आकृष्ट करती थी। उस द्वीप ने मेरा मन अत्यन्त प्रसन्न किया।

अनन्तर एक बार प्रार्थना करने पर राजा ने मुझे घर जाने की अनुमति दे दी और मैं वहाँ से विपुल धन-राशि पाकर निकल पड़ा। उस समय राजा ने मुझे विदामपुर के नरेश हारीत महाराज को एक पत्र दिया, जो बहुमूल्य चमड़े पर

ततोऽधिगत्य प्रस्थिताय मे विदामपुराधीश्वराय श्रीहारीतमहाराजाय पत्रमेकं महर्जिनरत्नविलिखितमतिसुन्दरकुरुविन्दचषकं मौक्तिकोत्तमैः पूरितं सर्वरोगप्रशमनसमर्थं सर्पविशेषनिर्मोकमतिपृथून् करिदन्तान् कर्पूरराशिमनर्घरत्नभूषिताङ्गीमतिसुन्दरीं दासीं चैकां प्राभृतीकर्तुम् समर्प्य महता स्नेहेन व्यसृजत्।

आगत्य च विदामपुरं पत्रेण सह तमुपहारराशिं हारीतनृपतये समर्प्य

प्रचुरम्, अर्थराशिं = धननिचयम् अधिगत्य = सम्प्राप्य, प्रस्थिताय = विहितप्रस्थानाय, मे = मह्यम् सिन्धुवादाय, विदामपुराधीश्वराय = विदामपुरस्य अधिपतये श्रीहारीतमहाराजाय, महर्जिनरत्नविलिखितं-महार्हे = बहुमूल्ये, अजिने = चर्मणि रत्नैः लिखितम् = अङ्कितम्, एकं पत्रं, मौक्तिकोत्तमैः = श्रेष्ठैः मुक्ताफलैः, पूरितं = सम्भृतम्, अतिसुन्दरं = रमणीयतमं, कुरुविन्दचषकं = पद्मरागमणिनिर्मितं पानपात्रम् 'चषकोऽस्त्री पानपात्रम्' इत्यमरः। सर्वरोगप्रशमनसमर्थ-सर्वेषां रोगाणां प्रशमनाय = दूरीकरणाय, समर्थं सशक्तम्, सर्पविशेषनिर्मोकं = निश्चयेन मुच्यत इति निर्मोकः (कंचुकापरपर्याया सर्पत्त्वक्) तम्,अतिपृथून् = अत्यायतान्, करिदन्तान् =गजदन्तान् कर्पूरराशिम्, अनर्घरत्नभूशिताङ्गीम्-अनर्घैः = बहूमूल्यैः रत्नैः भूषितानि = अलंङ्कृतानि, अङ्गानि = अवयवाः यस्याः ताम् 'अङ्गम् प्रतीकोऽवयवः' इत्यमरः। एकाम् दासीं च प्राभृतीकर्तुम् = उपायनीकर्तुम्। प्राभृतम् = उपायनम् 'प्राभृतं तु प्रदेशनम् उपायनम्' इत्यमरः। समर्प्य = प्रदाय, महता, स्नेहेन, व्यसृजत्।

आगत्य च विदामपुर, पत्रेण सह तम् उपहारराशिं = चषकादिकम्

रत्नों से लिखा हुआ था, एक अत्यन्त सुन्दर लालमणि का प्याला जो उत्तम मोतियों से भरा हुआ था, विशेष साँप की केंचुली जो सभी रोग दूर कर सकती थी, विशाल हाथी दाँत, कर्पूरराशि और बहुमूल्य रत्नों से अलङ्कृत एक अत्यन्त सुन्दरी दासी को उपहार देने के लिए समर्पित कर अत्यन्त स्नेह से मुझे जाने की अनुमति दी।

विदामपुर आकर पत्र के सात दह उपहार-राशि महाराज हारीत को समर्पित कर उस द्वीपाधिपति राजा के ऐश्वर्य, उदारता और न्यायशीलता का वर्णन कर,

तस्य द्वीपभूपतेः समृद्धिमौदार्यं न्ययाशीलतां चोपवर्ण्य नितान्तं प्रसन्नान्तरात्तस्मादधिगतबहुद्रविणभरः स्वं गृहं प्रायाम्।

एवमुक्त्वा सिन्धुवादो विरराम। हितवादोऽपि पूर्ववच्छतं दीनारान् सम्प्राप्य सन्तुष्टः सर्वैरतिथिभिः सह गृहं ययौ।

परेद्युश्च सम्प्राप्तेषु तेषु स एवं स्वां सप्तमीमन्तिमां च यात्रां समवर्णयत्-

---

उपायनसमूहं, हारीतनृतये = विदामपुराधीश्वराय, समर्प्य = प्रदाय, तस्य द्वीपभूपतेः = द्वीपाधीशस्य, समृद्धिम् = वैभवम्, औदार्यम्, न्यायशीनलतां च उपवर्ण्य, नितान्तम् = अत्यन्तं प्रसन्नान्तरात् -प्रसन्नम्, अन्तरं = चेतः यस्य तथाभूतात्, तस्मात् = श्रीहारीतमहाराजात् अधिगतबहुद्रविणभरः-अधिगतः = उपार्जितः, बहु= प्रचुरः, द्रविणभरः = धनराशिः येन सोऽहं सिन्धुवादः, स्वं = निजं, गृहं, प्रायाम् = अगमम्।

एवम्, ऊक्त्वा, सिन्धुवादः विरराम = मौनमालम्बे। हितवादोऽपि, अपूर्ववत् दीनारान् = सुवर्णमुद्राः, सम्प्राप्य, सन्तुष्टः = प्रसन्नः, सर्वैः = समस्तैः, अतिथिभिः, सह, गृहं, ययौ।

परेद्युश्च = द्वितीयस्मिन् दिवसे, तेषु = अतिथिषु, सम्प्राप्तेषु = समागतेषु सत्सु, सः एवं वक्ष्यमाणप्रकारेण, स्वां अन्तिमां चरमां च यात्रां = समुद्रप्रवासं, समवर्णयत् = वर्णयति स्म।

अत्यन्त प्रसन्नचित हो, महाराज से प्रचुर धन-राशि प्राप्त कर, मैं अपने घर आया।

यह कहकर सिन्धुवाद चुप हो गया। हितवाद पहले की तरह सौ दीनारों को पाकर सन्तुष्ट होकर अतिथियों के साथ घर आया। दूसरे दिन इन लोगों के आने पर उसने अपनी सातवीं और अन्तिम यात्रा इस प्रकार सुनाई।



सप्तमा सिन्धुयात्रा

गृहं प्रतिनिवृत्तः परिणतावस्थतामात्मनो विचार्य विश्रमितुकामो 'नेतः परं सिन्धुयात्रां प्रयास्यामी'ति निर्धार्य सुखेन गृह एव वस्तुम् निरचिनवम्।

एकस्मिंश्च दिने सुहृद्भिः सह सानन्दं स्थितोऽहं सहसा समागतेन राजाधिकारिणा 'देवो हारीतमहाराजस्त्वां दिदृक्षते त्वरितं समागम्यताम्'

गृहं, प्रतिनिवृत्तः = प्रत्यागतः, आत्मनः = स्वस्य परिणतावस्थतां-परिणता = परिपक्वा, अवस्था = वयः यस्य सः परिणतावस्थः, तस्य भावः परिणतावस्थता, तां वार्द्धक्यमित्यर्थः विचार्य, विश्रमितुकामः-विश्रमितुम् कामयते इति विश्रमितुकामः = विरामेच्छुकः, इतः परं, सिन्धुयात्रां = समुद्रप्रवासं, न प्रयास्यामि = न विधास्ये, इति निधर्य = निर्णीय, सुखेन, गृहे एव, वस्तुम् = वासं कर्तुं अहं सिन्धुवादः निरचिनवम् = निर्धारितवान्।

एकस्मिंश्च दिने सुहृद्भिः = मित्रैः सह सानन्दं = सुखपूर्वकं स्थितः, अहं, सहसा, समागतेन, राजाधिकारिणा = राज्ञोऽधिकारिणा, देवो = हारीतमहाराजः, त्वां = भवन्तं, दिदृक्षते = द्रष्टुमिच्छति, त्वरितं = शीघ्रम् आगम्यताम् इति उक्तः सपदि = तत्कालं, गत्वा, सविनयं, कृतप्रणामः = विहितनमस्कारः, अहं महाराजहारीतेन उक्तः = आदिष्ट।

आर्य सिन्धुवाद! कश्मिंश्चित्, आवश्यके कर्मणि = कार्ये, अहं त्वां = भवन्तं, नियोजयितुम्, इच्छामि = वांछामि। त्वया किल, इतः = अस्मात्

सातवीं सिन्दुयात्रा

घर लौटकर अपनी ढलती अवस्था का विचार कर आराम करने की इच्छा से "अब मैं पुनः समुद्रीयात्रा नहीं करूगाँ" यह संकल्प कर मैंने सुख से घर में ही रहने का निश्चय किया।

एक दिन मैं मित्रों के साथ आनन्दपूर्वक बैठा हुआ था, कि अकस्मात् राजकीय अधिकारी ने आकर कहा-"महाराज हारीत आपको देखना चाहते हैं, आप शीघ्र आयें।" मैंने तत्काल जाकर विनयपूर्वक उन्हें नमस्कार किया। महाराज हारीत ने मुझसे कहा-"आर्य सिन्धुवाद! किसी आवश्यक काम में मैं

इत्युक्तः। सपदि गत्वा सविनयं कृतप्रणामो महाराजहारीतेनोक्तः "आर्य सिन्धुवाद! कस्मिंश्चिदावश्यके कर्मणि त्वां नियोजयितुमिच्छामि। त्वया किल इतः प्रस्थाय द्वीपाधिपतिं प्रेषितोपहारं तं प्रत्युपहारा मयेतः प्रेष्यमाणाः सम्प्रापणीया" इति।

अहं त्वशनिपातेनेव तेन तद्वचासाऽभिहतस्तमवदम् -'देव! कः पुनर्देवादेशं विलङ्घयितुमीष्टे? किन्तु नानायात्राक्लेशपरिश्रान्तः परिणतवया

विदामपुरात्, प्रस्थाय = प्रयाणं कृत्वा, प्रेषितोपहारं-प्रेषिताः उपहाराः येन तं, तं द्वीपाधिपतिं मया = हारीतेन, इतः = विदामपुरात्, प्रेष्यमाणाः, प्रत्युपहारा = प्रत्युपायनानि, सम्प्रापणीयाः = सम्प्रेषणीयाः' इति।

अहं तु अशनिपातेनेव = वज्रपातेनेव तेन = पूर्वोक्तेन; तद्वचसा = श्रीहारीतवाक्येन इत्युत्प्रेक्षालङ्कारः। अभिहतः = ताडितः, तं = राजानम्, अवदम् = अब्रुवम् "देव! = श्रीमान्! कः पुन देवादेशं = भवतः आज्ञां, विलङ्घयितुं = समुल्लङ्घयितुम् ईष्टे = समर्थो भवति? किन्तु = परन्तु,नानायात्राक्लेशपरिक्लान्तः- नाना = नैकविधानां, यात्राणां, क्लेशैः, परिक्लान्तः, = सर्वतः श्रान्तः, परिणतवयाः = वार्धक्यमापन्नाः, जातु = कदाचिदपि, भूयः = पुनः, समुद्रयात्रां न गन्तुम्, कृतसङ्कल्पोऽस्मि। इतः परं, देवः = महाराजः, प्रमाणम् = निग्रहानुग्रहकरणे समर्थ इति यावत्। इति = एवम्, उक्त्वा तं = अनेकात्मयात्रावृत्तांतान् = अनेके आत्मनो यात्रायाः ये वृत्तांताः तान् अश्रावयम्। मद्वचः = मम वाक्यं

तुम्हें नियुक्त करना चाहता हूँ। तुम्हें चाहिए कि उस द्वीपाधिपति राजा के पास मेरे द्वारा भेजे हुए उपहार को पहुँचाओ, जिसने मेरे पास उपहार भेजे हैं।"

मैंने बज्रपात के समान उनकी बात से आहत होकर कहा "महाराज! आपकी आज्ञा का कौन उल्लङ्घन कर सकता है, परन्तु अनेक यात्राओं की पीड़ा से थक गया हूँ। अब मेरी अवस्था ढल रही और पुनः समुद्री यात्रा न करने का मैंने संकल्प किया है। इसके आगे आप स्वामी हैं" यह कहकर मैंने उन्हें अपनी अनेक यात्राओं का वृत्तांत सुनाया। मेरी बात सुनकर उन्होंने कहा-

"समुद्री यात्रायें निश्चत रूप से कष्टकारक होती है, किन्तु मेरे लिए आज यह कार्य कर लौट आइए। मैं पुनः आपको कष्ट नहीं दूँगा। इस प्रकार

नो जातु समुद्रयात्रां भूयो गन्तुम् कृतसङ्कल्पोऽस्मि। आकर्ण्य च मद्वचः सोऽब्रवीत्- नूनं क्लेशबहुलाः समुद्रयात्राः, किन्तु मदर्थमेतत्कार्यं कृत्वा प्रत्यागम्यताम्। न भूयो भवन्तं क्लेशयिताऽस्मि इति। एवं साग्रहमनुरुन्धतस्तस्याज्ञां 'यथाज्ञापयति देव' इति मूर्ध्नाऽऽदाय सन्तुष्टात् तस्माल्लब्धयात्रौपयिकदीनारसहस्रो भूयो यात्रार्थं सन्नद्धोऽभवम्।

अथ गृहीत्वा तानि प्रदेयोपहारवस्तूनि राज्ञा च स्वहस्तलिखितं पत्रं

च आकर्ण्य, सः = नृपतिः अब्रवीत् = अवोचत्। 'नूनं समुद्रयात्रा, क्लेशबहुलाः = कष्टप्रचुराः, किन्तु तथापि = मम हारीतस्य कृते, एतत् कार्यं = द्वीपाधिपतये प्रत्युपहारसमर्पणरूपं कृत्वा, प्रत्यागम्यताम् = प्रतिनिवर्त्यताम् भूयः भवन्तं, न क्लेशयितास्मि = न पीडयिष्यामि 'इति'। एवम्, साग्रहम्, अनुरुन्धतः = निवेदयतः, तस्य = श्रीहारीतमहीपतेः, आज्ञाम् = आदेशं, देव! = महाराज!, यथा आज्ञापयति = आदिशति (तथा विधीयते), इति = एवं, मूर्ध्ना = मस्तकेन, 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः। आदाय = गृहीत्वा, सन्तुष्टात्, तस्मात् = महाराजहारीतात्, लब्धयात्रौपयिकदीनारसहस्रः-लब्धं = प्राप्तं, यात्रायाः, औपयिकं = समुपयुक्तं दीनाराणां-सुवर्णमुद्राविशेषाणां, सहस्रं येन सोऽहं, भूयः यात्रार्थं बद्धपरिकरोऽभवम्।

अथ, तानि प्रदेयोपहारवस्तूनि-प्रदेयानि =समर्पणीयानि उपहारवस्तूनि = उपायनद्रव्याणि, राज्ञा = हारीतमहीपतिना च स्वहस्तलिखितं पत्रं गृहीत्वा वासरपुरम्, एत्य, प्रवहणारूढोऽभवम् = समुद्रयाने विहितारोहणः अभवम्, तं द्वीपं, निष्प्रत्यूहं = निर्विघ्नं, 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। उपगम्य =

आग्रहपूर्वक अनुरोध करने पर उनकी आज्ञा को "जैसी महाराज आज्ञा दें-"इस प्रकार नतमस्तक होकर स्वीकार करते हुए प्रसन्न होने वाले राजा से यात्रा के लिए उपयुक्त एक हजार दीनार प्राप्त कर, मैं फिर से यात्रा करने के लिए सन्नद्ध हो गया।

पश्चात् राजा के द्वारा अपने हाथ से लिखे हुए पत्र और देने योग्य उपहार-सामग्री को लेकर, मैं वासरपुर पहुँचकर जहाज पर सवार हो गया और निर्विघ्नरूप से उस द्वीप में आकर मुख्य अधिकारियों से भेंटकर अपने आगमन

वासरपुरमेत्य प्रवहणारूढोऽभवम्। निष्प्रत्यूहं च तं द्वीपमुपगम्य प्रधानाधिकारिणो दृष्ट्वा निवेदितस्वागमनोद्देश्यो यथासम्भवं त्वरितं नृपसन्दर्शनं कारयितुम् न्यवेदयम्। तैश्च निवेदितागमनो राजानं समासाद्य तत्क्षणं मां प्रत्यभिज्ञाय प्रदर्शितप्रमदातिशयाय तस्मै तानि महार्घाणि हारीतनृपतिप्रेषितान्युपायनानि पत्रं चोपाहरम्। स च तानि सौहार्दरमणीयानि प्रसन्नचेताः सादरमङ्गीचकार।

ततोऽहं तमामन्त्र्याविलम्बितं विदामपुरमधिगन्तुकामस्ततो भूयः

प्राप्य, प्रधानाधिकारिणः = मुख्याधिकृतान्, दृष्ट्वा, निवेदितस्वागमनोद्देश्यः-निवेदितः स्वागमनस्य उद्देश्यम् येन सः, यथासम्भवं त्वरितं = शीघ्रं, नृपसन्दर्शनं = राज्ञो दर्शनं, कारयितुम् न्यवेदयम् = अन्वरुन्धम्। तैश्च = प्रधानाधिकारिभिः, निवेदितागमनः-निवेदतम् आगमनं यस्य सोऽहं राजानं, समासाद्य = समुपगम्य, तत्क्षणं मां = सिन्धुवादं, प्रत्यभिज्ञायां = परिचित्य, प्रदर्शितप्रमदातिशयाय-प्रदर्शितः, प्रमदातिरेको येन तस्मै, "मुत्प्रीतिः प्रमदो हर्षः" इत्यमरः। तस्मै द्वीपाधिपाय, श्रीहरीतनृपतिप्रेषितानि = श्रीहारीतेन नृपतिना प्रापितानि, महार्घाणि = बहुमूल्यानि, तानि उपायनानि = उपहारान्, पत्रं च, उपाहरम् = समर्पयम्। प्रसन्नचेताः = प्रहृष्टान्तरङ्गः, सः = सौहार्दरमणीयानि-सौहार्देन सुन्दराणि, तानि सादरं = सबहुमानम्, अङ्गीचकार = स्वीचकार।

ततः = पश्चात्, अहं = सिन्धुवादः तं द्वीपाधिपम्, आमन्त्र्य, अविलम्बितं = शीघ्रम्, विदामपुरम्, अधिगन्तुकामः = सम्प्राप्ततुकामः, ततः नृपतेः, भूयः

का उद्देश्य निवेदित करते हुए, यथासम्भव शीघ्र राजा से साक्षात्कार कराने के लिए उनसे प्रार्थना की। उनके द्वारा आगमन की सूचना देने पर मैं राजा के पास पहुँचा। उसने तत्काल मुझे पहचान कर अत्यन्त हर्ष प्रकट किया। मैंने महाराज हरीत द्वारा प्रेषित बहुमूल्य उपहार समर्पित किया। उसने सहृदयता से प्रसन्नचित होकर आदरपूर्वक उसे स्वीकार किया।

पश्चात् मैंने उससे विदा लेकर शीघ्र विदामपुर पहुँचने की इच्छा से प्रचुर सम्पत्ति प्राप्त कर वहाँ से प्रस्थान किया।

दो-तीन दिन तक हम लोग चलते रहे। इतने में अकस्मात् दासों का विक्रय

समासादितभूरिविभवस्ततः प्रातिष्ठे। द्वित्राणि दिनानि स्वं मार्गमाक्रामतामस्माकं पोतं सहसा दासविक्रयव्यवसायाः केचिद्वणिजोऽवरुद्ध्य अस्मान् वन्दिनोऽकार्षुः। अस्मन्नेपथ्यं चावतार्य दासोचितवसनैरस्मानाच्छाद्य कञ्चिद् दूरवर्तिनं द्वीपं नीत्वा दासीभूतान् व्यक्रीणत।

अहं त्वेकेनाढ्येन वणिजा क्रीत्वा गृहं नीतो दत्तभोजनाच्छादनमात्रो वसन्नेकदा तेन पृष्टः-अपि कञ्चिद् व्यवसायं वेत्सि? इति। वृत्या वणिजं

समासादितभूरिविभवः-समसादितं = समुपार्जितं, भूरि = प्रचुरं, विभवं = धनं येन सोऽहं, ततः = द्वीपात्, प्रातिष्ठे = प्रस्थानं कृतवान्। द्वित्राणि, दिनानि स्वं, मार्गम्, आक्रमतां = समुल्लङ्घ्यताम् अस्माकं = समुद्रयात्रिणां पोतं = जलप्रवहणं सहसा, दासविक्रयव्यवसायाः-दासानां विक्रयः एव व्यवसायः = व्यापारो येषां ते, केचित्, वणिजः = उद्यमिनः, अवरुद्ध्य अस्मान् = सार्थवाहान् बन्दिनः = परतन्त्रान् अकार्षुः = व्यदधुः। असमन्नेपथ्यम् = अस्माकं वेषं च अवतार्य, दासोचितवसनैः = दासपरिधानयोग्यैः वस्त्रैः अस्मान् आच्छाद्य, कञ्चित् = अज्ञातं, दूरवर्तिनं = दूरे स्थितं, द्वीपं नीत्वा दासीभूतान् = पराधीनतां प्राप्यमाणान्, व्यक्रीणत = विक्रीतवन्तः।

अहं तु = सिन्धुवादः, एकेन = अन्यतमेनः आढ्येन = धनिकेन, वणिजा = व्यवसायिना, क्रीत्वा, गृहं = स्वसदनं, नीतः = प्रापितः दत्तभोजनाच्छादनमात्रः-केवलं दत्तं, भोजनं, आच्छादनं च यस्मैः सः, वसन्, एकदा पृष्टः-अपीति प्रश्नसूचकमव्ययम्। कञ्चित् व्यवसायं = कार्य, वेत्सि = जानासि? इति। वृत्या = जीतिकया "वृत्तिर्वर्तन जीवने" इत्यमरः। वणिजं = व्यापारिणं दासव्यवसायिभिः-

करने वाले कुछ व्यापारियों ने हमारा जहाज रोककर हमें बन्दी बना लिया और हमारे कपड़े उतारकर और हमें दासों के योग्य कपड़े पहनाकर कुछ दूर स्थित द्वीप में ले जाकर बेच दिया।

मैं एक सम्पन्न व्यापारी द्वारा खरीदकर उसके घर ले जाया गया। वह मुझे केवल भोजन-वस्त्र देता था। उसके घर रहते हुए उसने मुझसे एक बार पूछा- "तुम कुछ व्यवसाय जानते हो?" "मैं जीविका के लिए वाणिज्य करता हूँ तथा दासों का व्यवसाय करने वालों ने मुझे जबरदस्ती दास बनाकर बेंचा है।" मेरी

दासव्यवसायिभिः सर्वस्वहरणपूर्वकं मां विक्रीतं श्रुत्वा स भूयोऽपृच्छत् कच्चिद्धनुर्बाणप्रयोगं शिक्षितवानसि? इति। बाल्ये कृतैतदभ्यासं मन्मुखाद्विदित्वा दत्तधनुर्बाण आत्मनः पृष्ठभागे हस्तिपृष्ठे मां समुपवेश्य कियद्दूरे स्थितं गहनमेकमनयत्। तत्र च मामवतार्योत्तुङ्गं वनस्पतिमेकं प्रदर्श्यावोचत् - 'आरोहैतं पादपम्। अत्र च स्थितोऽधः समापततो गजान् जहि। वनमिदं तैरभितो व्याप्तम्। समाघातेन पतितमात्रे गजे

दासानां व्यापारं कुर्वाणैः, वणिग्भिः सर्वस्वहरणपूर्वकं = सकलविभवापहरणपुरस्सरं मां विक्रीतं = मूलयग्रहणेन प्रदत्तं, श्रुत्वा, सः = आढ्यवणिक् भूयः, अपृच्छत् = जिज्ञासितवान्। कच्चित्, धनुर्बाणप्रयोगं = धनुषः बाणानां च प्रयोगम्। शिक्षितवान् = शिक्षां गृहीतवानसि? इति।

बाल्ये =शैशवे, कृतैतदभ्यासं-कृतः = विहितः, एतस्य = धनुर्बाणस्य, अभ्यासः = पौनः पुण्येन प्रवर्तनं, येन एवंभूतं मां, मन्मुखात्, विदित्वा दत्तधनुर्बाणः = दत्तम् = वितीर्णं, धनुः = चापं, बाणाः = सायकाश्च येन सः, आत्मनः =स्वस्य, पृष्ठभागे, हस्तिपृष्ठे = गजपृष्ठे, मां समुपवेश्य = संस्थाप्य, कियद्दूरे = स्वल्पदूरे, स्थितं = वर्तमानम्, एकम् = अन्यतमं, गहनं = वनं, 'गहनं काननं वनम्' इत्यमरः। अनयत् = प्रापयति स्म। तत्र च = तस्मिंश्च वने, माम् अवतार्य = अवरोप्य, उत्तुङ्गम् = उन्नतम्, एकं वनस्पतिम् = वृक्षं प्रदर्श्य, अवोचत् (त्वम्) 'एतं = पुरो दृश्यमानं पादपं = वृक्षम् आरोह = आरोहणं कुरु। अत्र च = अस्मिंश्च वृक्षे, स्थितः = उपविष्टः सन्, अधः समापततः = नीचैः आगच्छतः, गजान् = हस्तिनः, जहि = मारय। इदं = पुरोदृश्यमानं, वनं तैः =

यह कहानी सुनकर उसने फिर मुझसे पूछा "क्या तुमने धनुष बाण का प्रयोग करना सीखा हैं?" बचपन में किये गये इस अभ्यास को मेरे मुख से जानकर उसने मुझे धनुष-बाण दिया और अपने पीछे हाथी पर बैठाकर कुछ दूर पर स्थित एक जंगल में ले गया। वहाँ मुझे उतारकर एक ऊँचे वृक्ष को दिखाकर उसने कहा–'इस वृक्ष पर चढ़ो। यहाँ पर बैठकर नीचे आनेवाले हाथियों को मारो यह जंगल चारों ओर से उनके द्वारा भरा हुआ है। आधात से हाथी के गिरते ही मुझे आकर सूचना दो' पश्चात् वह कुछ खाद्य-सामग्री मुझे देकर शहर चला गया। मैं

मामागत्य निवेदय' इति। अथ स किञ्चिदशनजातं मह्यम् वित्तीर्य नगरमयासीत्। अहं निखिलां रात्रिं वृक्षारूढोऽतिष्ठम्।

अथ प्रभात उदितमात्रे भगवति सवितरि बृहद्दन्तावलयूथं पुरः प्रादुरभूत्। सपदि च मया मुक्तैः सायकैरेकस्मिन्निपतिते परेषु च भयेन विद्रुतेषु, वृक्षादवरुह्य तदिदं वृत्तं निशामयितुम् स्वामिनमभ्युपागच्छम्। प्रशस्यमानश्च तेन सहैव काननं गत्वा गर्तमेकं खनित्वा तत्करिशवं

गजैः अभितः = सर्वतः, व्याप्तम् = आच्छन्नम्। समाधातेन = सम्यक् प्रहारेण, गजे = हस्तिनि, पतितमात्रे सति माम् आगत्य = सम्प्राप्य, निवेदय = सूचय इति। अथ अनन्तरं, सः वणिक्, किञ्चित् = स्वल्पं, अशनजातं = भक्ष्यपदार्थसामग्रीं, मह्यम्, वितीर्य = समर्प्य, नगरम् अयासीत् = अगमत। अहं निखिलां = समस्तां, रात्रिं = रजनीं, वृक्षारूढः = वृक्षे स्थितः, अतिष्ठम् = स्थितः।

अथ = पश्चात्, प्रभाते = प्रातःकाले भगवति सवितरि = श्रीसूर्यनारायणे, उदितमात्रे बृहद्दन्तावलयूथं-बृहतां = विशालानां, दन्तावलानां = हस्तिनां, 'दन्ती दन्तावलो हस्ती' इत्यमरः। यूथं = समूहः, पुरः =अग्रे, प्रादुरभवत् = आविरासीत्। सपदि च, मया मुक्तैः = प्रक्षिप्तैः, सायकैः = बाणैः एकस्मिन् गजे, निपतिते = भूमौ लुण्ठिते, सति, परेषु = गजेषु, च भयेन = भीत्या, विद्रुतेषु = पलायितेषु सत्सु, वृक्षात् अवतीर्य = अवरुह्य, तत् इदं = गजपतनरूपं वृत्तं = वार्ता, निशामयितुं = श्रावयितुं, स्वामिनम् = अधिपतिम्

पूरी रात पेड़ पर चढ़कर ही बैठा रहा।

प्रातः सूर्योदय होते ही सामने विशाल हाथियों का समूह प्रकट हुआ। तत्काल मेरे द्वारा छोड़े हुए बाणों से एक के गिरने पर और दूसरों के भय से भाग जाने पर मैं वृक्ष से उतरकर यह सामाचार सुनाने स्वामी के पास पहुँचा। उसने मेरी प्रशंसा की, मैंने उसी के साथ जंगल में जाकर हाथी के शव को, उसके दाँतों को लेने के लिए उसके दुर्गन्धरहित होने तक प्रतीक्षा करनेवाले स्वामी के आदेश के अनुसार गड्ढा खोदकर गाड़ दिया।

तद्दन्तान् जिघृक्षतस्तत्पूतीभावं प्रतीक्षमाणस्य स्वामिन आदेशानुसारं न्यखनम्।

एवं मासद्वयं वनं गत्वा प्रत्यहं नवं नवं वृक्षमारूढो दन्तिनो निघ्नन्नयापयम्। एकस्मिन् पुनर्दिवसे यथाभ्यस्तं स्वं पन्थानमागम्य परश्शत्तान् दन्तिनो बृंहितैः सकलमेव तद्वनं पूरयतः पादाघाते-नावनिमवनमयतो मदारूढं शाखिनं सर्वतः परिवृत्य मदभिमुखमुन्नामित्तैः

अभ्युपागच्छम् = समुपासर्पम्। प्रशस्यमानः = समभिनन्द्यमानश्च तेन = स्वामिना, सहैव, काननं = वनं, गत्वा, एकं गर्तं खनित्वा, तत्करिशवं -तस्य करिणः (गजस्य) शवं = निष्प्राणशरीरं, तद्दन्तान् -तस्य गजस्य दशनान्, जिघृक्षतः = ग्रहीतुमिच्छतः तत्पूतीभावं-तस्य गजस्य पूतीभावं = दुर्गन्धवत्तया शीर्यमाणं 'पूतीभावस्तु दुर्गन्धः, इत्यमरः। प्रतीक्षमाणस्य = प्रतीक्षां कुर्वाणस्य, स्वामिनः = अधिपतेः, आदेशानुसारम् = आज्ञामनुरुध्य, न्यखनम्= खनितवान्।

एवं = पूर्वोक्तप्रकारेण, वनम् = अरण्यं गत्वा, प्रत्यहं = प्रतिदिनं, नवं नवं वृक्षं = पादपम्, आरूढः = समुपविष्टः, दन्तिनः = गजान्, निघ्नन् = मारयन् मासद्वयं = द्वौ मासौ, अयापयम् = व्यतीतवान्। पुनः एकस्मिन् दिवसे, यथाभ्यस्तं = पूर्वपरिचितं, स्वं, पन्थानम् = मार्गम् आगम्य, बृंहितैः = करिगर्जितैः, 'बृंहितं करिगर्जितम्' इत्यमरः सकलमेव = समस्तमेव, तद् वनम्, पूरयतः = व्याप्नुवतः, पादाघातेन = चरणप्रहारेण, अवनिं = पृथ्वी, अवनमयतः = कम्पयतः, मदारूढं = मया समुपविष्टं, शाखिनं = वृक्षं, सर्वतः, परिवृत्य = वेष्टयित्वा, मदभिमुखम् = मम सन्मुखम्, उन्नमितैः -उत्थापितैः, शुण्डादण्डैः माम् आक्रष्टुं = नीचैरानेतुं, प्रयतमानान् = प्रयत्नशीलान्, परःशतान् = शताधिकान्। दन्तिनः = गजान्, निरीक्ष्य = अवलोक्य,

इस प्रकार जंगल में आकर प्रतिदिन नए पेड़पर चढ़कर हाथियों को मारते हुए मैंने दो मास बिताए। पुनः एक दिन अपने अभ्यस्त मार्ग पर मेरी तरफ आनेवाले तथा गर्जना से सम्पूर्ण वन को व्याप्त करने वाले उन हाथियों ने चारों ओर से मेरे वृक्ष को घेर लिया और मेरी ओर उठायी सूँड़ों से वे मुझे खींचनेका प्रयत्न करने लगे। उन्हें देखककरर भयवश मेरे हाथों से धनुषवाण नीचे गिर गये।

झुण्डादण्डैर्मामाक्रष्टुम् प्रयतमानान्निरीक्ष्य साध्वसाक्रान्तस्य मम हस्ताभ्यां सशरं धनुरधोऽपतत्।

अथ तेषु बंहिष्ठः करीन्द्रः करेण मदधिरूढवृक्षमावेष्ट्य प्रसभं चालयन् समूलमुन्मूल्य भूमावपातयत्। तेन च सार्धं निपतितं मां शुण्ड्या गृहीत्वा स्कन्धयोरवस्थाप्य मृतप्रायं स्वयूथैरनुसृतः कञ्चन विजनप्रदेशं नीत्वाऽधः क्षिप्त्वा क्वचिदयासीत्।

साध्वसाक्रान्तस्य, मम = सिन्धुवादस्य हस्ताभ्याम् = कराभ्यां, सशरं = बाणैः सहितं धनुः = चापं अधः = नीचैः, अपतत् = स्खलति स्म।

अथ = अनन्तरम्, तेषु = गजेषु, बंहिष्ठः = अतिशयेन बहुलः (पुष्टः) करीन्द्रः = गजराजः, करेण = शुण्डादण्डेन, मदधिरूढवृक्षम् -मया अधिरूढं = समुपविष्टं, वृक्षं, आवेष्ट्य = वेष्टयित्वा, प्रसभं = हठात्, चालयन् = कम्पयन्, समूलम्, उन्मूल्य = उत्पाट्य भूमौ, अपातयत् = पातयति स्म। तेन च = वृक्षेण, सार्धं = सह, निपतितं = भूलुण्ठितं, मृतप्रायम् मां शुण्ड्या गृहीत्वा = उद्धृत्य, स्कन्धयोः, अवस्थापय = समुपवेश्य, स्वयूथैः = निजगज-समूहैः, अनुसृतः =अनुगतः, कञ्चन विजनप्रदेशं = मनुष्यरहित क्षेत्रं,नीत्वा,अधः = नीचैः क्षिप्त्वा = पातयित्वा, क्वचित् = अज्ञातस्थले,अयासीत्= अगच्छत्।

एतत् = घटितं, सर्वं समस्तं, वृत्तं स्वप्नविलसितमिव, विचिन्तयन्, अहं, कञ्चित् = स्वल्पम्, समयम्, प्रतीक्ष्य = प्रतीक्षां कृत्वा, वीतगजशङ्कः-वीता = अपगता, गजानां = हस्तिनां, शङ्का = सन्देहः यस्य सोऽहं, एकत्र = एकस्मिन् करिदन्तास्थिराशिसङ्कुले-करिणां = गजानां, दन्तानां, अस्थ्नां च राशिभिः सङ्कुले

पश्चात् उनमें से विशालतम गजराज ने, जिस वृक्ष पर मैं बैठा हुआ था उसको सूंड़ से लपेटकर उसे हठात् हिलाते हुए जड़ के साथ उखाड़ कर ज़मीन पर गिरा दिया। उसके (पेड़) साथ गिरने वाले मुझे सूँड़ से उठा कर कन्धे पर रखकर अपने झुण्डों द्वारा अनुगमित होता हुआ मृतप्रायः मुझे किसी निर्जन प्रदेश में ले जाकर और नीच फेंककर वह कहीं चला गया।

इस समस्त घटना को एक स्वप्न की तरह अनुभव करते हुए मैंने कुछ समय तक प्रतीक्षा कर हाथियों के भय से मुक्त हो, हाँथी दाँत और हड्डियों से

सर्वमेतत् स्वप्नविलसितमिव विचिन्तयन्नहं कञ्चित्कालं प्रतीक्ष्य वीतगजशङ्क एकत्र गिरिप्रदेशे करिदन्तास्थिराशिसंकुले स्थितमात्मानमपश्यम्। तं च प्रदेशं तेषां श्मशानस्थानं दन्तलिप्सया भूयो गजहननान्मां निवारयितुमिव तैः प्रदर्शितं विलोक्य शनैस्ततः प्रतिनिवृत्त एकेनाह्ना एकया च निशया मत्स्वामिनोऽन्तिकं प्रत्यागमम्।

स तु मद्दर्शनेनोद्विग्नो मदन्वेषणेच्छया तत्काननं गत्वा दृष्टसमुन्मूलित

(व्याप्ते) गिरिप्रदेशे = पर्वतभूमौ, स्थितं = पतितम्, आत्मानं = स्वम्, अपश्यम् = अवालोकयम्। तं च प्रदेशं तेषां = गजानां, श्मशानस्थानम् दन्तलिप्सया = दन्तानां, लिप्सा = लब्धुमिच्छा तया, भूयः = पुनः, गजहननात् = हस्तिनां वधात्, मां निवारयितुं = निरोद्धुमिव तैः हस्तिभिः, प्रदर्शितं, विलोक्य = दृष्ट्वा, शनैः = मन्दं-मन्दं, ततः = गजश्मशानभूमेः, प्रतिनिवृत्तः = परावर्तमानः, एकेन अह्ना = दिनेन "घस्रो दिनाऽहनी" त्यमरः। एकया च निशया = रजन्या, मत्स्वामिनः = मम प्रभोः, अन्तिकं = समीपं, प्रत्यागमन् = प्रतिन्यवर्तिषि।

स तु = मम स्वामी, मददर्शनेन = माम् अनवलोक्य, उद्विग्नः = सन्त्रस्तः, मदन्वेषणेच्छया = मम अन्वेषणस्य इच्छया, तत् काननं, गत्वा दृष्टसमुन्मूलितमदाश्रयपादपः दृष्टः = अवलोकितः, समुन्मूलितः = सम्यगुत्पाटितः, मम आश्रयपादपः = आधारवृक्षो येन सः, मां करियूथामिषतां = गजसमूहस्य भोज्यतां गतं = प्राप्तम्, उपरतं = मृतं मन्यमानः = निर्धारयन्, सहसा =

व्याप्त पहाड़ी प्रदेश में अपने को देखा। वह प्रदेश श्मशान भूमि थी जो उन्होंने हाँथी दाँत के लोभ में पड़कर हाथियों को मारने से बार-बार रोकने के लिए ही मानों उन्होंने मुझे दिखाई थी। उसे देखकर वहाँ से लौटते हुए एक दिन और एक रात में मैं अपने स्वामी के पास पहुँचा।

वह मुझे न देखकर उद्विग्न हो गया था और मुझे खोजने की इच्छा से उस जंगल में आकर उसने जड़ से उखड़े हुए उस पेड़ को देख लिया था जिस पर मैं बैठा हुआ था। अतः उसने मुझे उन हाथियों के झुण्ड द्वारा मरा हुआ समझ लिया

मदाश्रयपादपो मां करियूथामिषतां गतमुपरतं मन्यमानः सहासा सकुशलं प्रत्यागतं विलोक्यानन्दनिर्भरोऽभवत्। श्रुताखिलवृत्तश्च मया सह हस्तिनमारुह्य तं प्रदेशं गत्वा संगृहीतप्रचुरकरिदन्तराशिर्नगरं प्रत्याजगाम।

अथासौ मामब्रवीत् 'भद्र! जीवनसंशय आत्मानं निपात्य मह्य मेतममितविभवप्रदं दन्तावलदन्तनिधिमाविष्कुर्वता त्वया बहूपकृतोऽस्मि। बहवः किलैतत्कर्मणि मया नियोजिता दासा एषां वन्यद्विपा-

---

अकस्मात् सकुशलं = निर्विघ्नं, प्रत्यागतं = प्रतिनिवृत्तं (मां सिन्धुवादं) विलोक्य आनन्दनिर्भरः = हर्षातिशयसम्भृतः, अभवत् = समजायत। श्रुताखिलवृत्तः- श्रुतम् अखिलं = पूर्णं, वृत्तं = वार्ता येन सः-मया सः हस्तिनं = गजम् आरुह्य तं प्रदेशं गत्वा संगृहीतप्रचुरकरिदन्तराशिः संगृहीतः = समुपार्जितः, प्रचुरः = बहुलः, करिदन्तानां = हस्तिदन्तानां, राशिः = समूहो येन सः, वणिक्, नगरं = पुरं प्रत्याजगाम = प्रतिन्यवर्तत।

अथ = अनन्तरम् असौ। -अढ्यवणिक्, मां = सिन्धुवादम्, अब्रवीत् = अकथयत्।

"भद्र! = आर्य! जीवनसंशये = प्राणसङ्कटे, आत्मानं = स्वं, निपात्य = प्रक्षिप्य, मह्यम्, एतं = पुरोवर्तमानम्, अमितविभवप्रदम् = अगणितैश्वर्यप्रदायकं, दन्तावलदन्तनिधिं-दन्तावलानां = गजानां, दन्तनिधिं = दन्तकोषम्, आविष्कुर्वता = समर्पयता त्वया, अहं, बहु प्रचुरम्, उपकृतोऽस्मि। बहवः = अनेके, दासाः, मया एतत्कर्मणि = गजहननकार्ये, नियोजिताः = व्यापारिताः, एषां, वन्यद्विपानाम् = आरण्यगजानाम्, आमिषत्वं = भोज्यताम्, अगमन् = प्राप्नुवन्।

था। वह मुझे अकस्मात् सकुशल वापस आते हुए देखकर आनन्दित हो गया। मेरी पूरी कहानी सुन मेरे साथ हाँथी पर बैठ कर उस स्थान में जाकर प्रचुर मात्रा में हाथी दाँत एकत्रित करके वह शहर लौट आया।

अनन्तर उसने मुझसे कहा-"अपनी जान की बाजी लगाकर अपरिमित सम्पति दिलानेवाले हाँथी दाँतों का खजाना मुझे देकर तुमने मेरे ऊपर बहुत उपकार किया है। मैंने इस काम के लिए बहुत से दासों को नियुक्त किया था। जो

नामामिषत्वमगमन्। दिष्ट्या सुरक्षितजीवितः प्रत्यागतोऽसि। तदहं त्वां दास्याद्विमोचयामि। गृहाणैतत् पारितोषिकम्' इति।

तस्यैतां कृपां कृतज्ञतयाऽङ्गीकृत्य स्वदेशं प्रत्यावर्तितुम् कृताभ्यर्थनं मां नन्वचिरात् करिदन्तसंजिघृक्षया समागतेषु पोतेषु त्वां विस्त्रक्ष्यामीत्यवोचत्। कञ्चित्कालं तेन प्ररूढप्रणयातिशयेन सह वसन् पोतागमं प्रतीक्षमाणः सानन्दमत्यवाहयम्।

दिष्ट्या = भाग्येन, सुरक्षितजीवितः प्रत्यागतोऽसि =प्रतिनिवृत्तोऽसि। तत् = तस्माद्धेतोः, अहं त्वां, दास्यात् = पारतन्त्र्यात्, विमोचयामि = मुक्तं करोमि, एतत् पारितोषिकम् = उपायनं, गृहाण = स्वीकुरुष्व।

तस्य स्वामिनः एतां कृपां = दास्यतो मुक्तिप्रदानरूपम् अनुग्रहं कृतज्ञतया = कृतज्ञभावेन, अङ्गीकृत्य = स्वीकृत्य, स्वदेशं = स्वमातृभूमिं, प्रत्यावर्तितुं = प्रतिगन्तुं, कृताभ्यार्थनं-कृता = विहिता, अभ्यर्थना = प्रार्थना, येन तं, मां = सिन्धुवादं अवोचत् = अकथयत्, "ननु" इति सम्बोधने। (अहं) अचिरात् = शीघ्रमेव, करिदन्तसंजिघृक्षया-करिणां दन्ताः = करिदन्ताः, तेषां संग्रहीतुमिच्छा संजिघृक्षा, करिदन्तानां = गजदनतानां, संजिघृक्षा = संग्रहणेच्छा, तया, समागतेषु = उपस्थितेषु। पोतेषु = समुद्रप्रवहणेषु, त्वां = भवन्तं, विस्त्रक्ष्यामि = गमनायानुमतिं दास्यामि इति। कञ्चित्कालं तेन, प्ररूढप्रगयातिशयेन-प्ररूढः = वृद्धिङ्गतः प्रणयातिशयः = प्रेमातिरेकः, यस्य तेन, पूर्वोक्तेन सह = आढ्यवणिजा साकं, कञ्चित्, कालं, वसन्, पोतागमं = समुद्रयानस्य, आगमनं, प्रतीक्षमाणः = प्रतीक्षां कुर्वन्, सानन्दं = सुखपूर्वकम्, अत्यवाहयम्

इन जंगली हाथियों के भोजन बन गए। भाग्य से तुम अपने प्राण बचाकर लौट आए हो। अतः मैं तुम्हें दासता से मुक्त कर रहा हूँ। और यह पारितोषिक स्वीकार करो।"

उसकी कृपा को कृतज्ञतापूर्वक स्वीकार कर स्वदेश लौटने के लिए मैंने प्रार्थना की। तब उसने कहा—"शीघ्र ही हाँथी दाँत लेने की इच्छा से आए हुए जहाजों पर मैं तुम्हें जाने की अनुमति दूँगा।" मैंने प्रेमपूर्वक उसके साथ रहकर जहाज की प्रतीक्षा में आनन्द पूर्वक कुछ समय व्यतीत किया।

अथागतेषु पोतेष्वेकं तेन विसृष्टभूरिद्विरददशनराशिर्लब्धापरिमितपारितोषिकः समारुह्य ततः प्रस्थितोऽभवम्। मार्गे आपतितेषु केषुचिद् द्वीपेषु बहुना मूल्येन तं करिदन्तनिचयं विक्रीय कृतबहुधनसंग्रहः सुखपूर्वकं विदामपुरं पुनः समासदम्।

महाराजहारीतनृपतिञ्च सद्य उपेत्यात्मवृत्तमश्रावयम्। मत्प्रत्यागमनविलम्बेन भृशमुद्विग्नोऽसौ नितरामुपरूढप्रहर्षः करिवृत्तश्रवणे-

= अपक्षयम्।

अथ = अननतरं, तेन = आढ्यवणिजा, विसृष्टभूरिद्विरददशनराशिः = विसृष्टः = समर्पितः, भूरिः = प्रचुरः, द्विरददशनानां-हस्तिदन्तानां राशिः = समूहो यस्मै सः, लब्धाऽपरिमितपारितोषिकः लब्धम् = प्राप्तम्, अपरिमितं = असीमं, पारितोषिकम् = उपायनं येन सोऽहं सिन्धुवादः, आगतेषु = सम्प्राप्तेषु, पोतेषु = जलयान्षु, एकम् = अन्यतमं समारुह्य = संमुपविश्य, ततः = द्वीपात् प्रस्थितोऽभवम् = प्रयाणमकरवम्। मार्गे = पथि, आपतितेषु, केषुचित् = कतिपयेषु, द्वीपेषु, बहूना मूल्येन = तं करिदन्तनिचयं = गजदशनराशिं, विक्रीय कृतबहुधनसंग्रहः-कृतः, बहुः, धनसङ्ग्रहो येन सोऽहं सुखपूर्वकम् = सानन्दं पुनः, विदामपुरं समासदम् = प्राप्तवान्।

महाराजहारीतनृपतिं, सद्यः = तत्कालम्, उपेत्य = समुपस्थाय, आत्मवृत्तं सप्तमसिन्धुप्रवासवार्ताम्, अश्रावयम्। मत्प्रत्यागमनविलम्बेन-मम प्रतिनिवर्तनस्य विलम्बेन भृशम् = अत्यन्तमुद्विग्नः = सन्त्रस्तः, असौ = श्रीहारीतमहाराजः, नितराम् = अत्यन्तम्, उपरूढप्रहर्षः-उपरूढः = वृद्धिंगतः, प्रहर्षः =

अनन्तर आए हुए जहाजों में से एक पर आरूढ़ होकर मैंने वहाँ से प्रस्थान किया। उसने मुझे प्रचुर हाँथी दाँत तथा अपरमित पारितोषिक दिए थे। रास्ते में पड़नेवाले कुछ द्वीपों पर अधिक मूल्य से उन हाथी दाँत को बेचकर प्रचुर धन अर्जित कर मैं पुनः सुखपूर्वक विदामपुर पहुँचा।

महाराज हारीत के पास तत्काल जाकर मैंने अपना वृत्तांत सुनाया। मेरे लौटने में देर होने के कारण वे अत्यन्त उद्विग्न थे। मेरे लौटने से उन्हें अति हर्ष

नोद्वेलकुतूहलाश्चर्यो मदीयाः सप्तसिन्धुयात्राः सुवर्णाक्षरेषु समालेख्य स्वरत्नकोशे निधातुमधिकारवर्गं समादिश्य बहुभिः प्रसादातिशयैर्मां सम्भाव्य महताऽऽदरेण व्यसृजत्।

इत्येवं सिन्धुवादः सप्तसिन्धुयात्रावर्णनमुपसंहृत्य हितवादमुद्दिश्यावदत् -भद्र हितवाद! कच्चित्त्वया कश्चित् सोढमदधिकक्लेशो

आनन्दातिशयो यस्य सः, करिवृत्तश्रवणेन = गजवार्तामाकर्ण्य, उद्वेलकुतूहलाश्चर्यः- वेलामतिक्रांते कुतूहलम् = औत्सुक्यम्, आश्चर्यं = विस्मयश्च, यस्य सः, मदीयाः = मामकीनाः, सप्त, सिन्धुयात्राः = समुद्रप्रवासवर्णनानि सुवर्णाक्षरेषु = सुवर्णखचिंतेषु वर्णेपु, समालेख्य = समुट्टङ्कयित्वा, समादिश्य = आज्ञाप्य, बहुभिः, प्रसादातिशयैः = अत्यन्तं कृपापूर्वकम्, मां सम्भाव्य = सत्कृत्य, महताऽऽदरेण सबहुमानं, व्यसृजत् = गृहं गन्तुमनुमतिं प्रददौ।

सिन्धुयात्रावृत्तमुपसंहर्तुमुपक्रमते इत्येवमिति। इत्येवम् = सिन्धुवादः, सप्तसिन्धुयात्रावर्णनम् उपसंहृत्य = समाप्य, हितवादम् उद्दिश्य = सम्बोध्य, अवदत् = अब्रवीत्। "भद्र हितवाद! त्वया, सोढमदधिकक्लेशः-सोढाः, मत्तोऽधिकाः, क्लेशाः येन सः, कश्चित् जनः = कश्चनपुरुषः, कच्चित् = क्वचिदपि, श्रुतपूर्वः? = पूर्वमाकर्णितः? अपि, भवान् = त्वं, इयतः = इयत्परिमाणान् , महतः = प्रचुरान्, क्लेशान् = कष्टानि, अनुभवतः = उपभुञ्जतः, सम्प्रति = अधुना शांतिसुखोपभोगं = शांतेः सुखस्य च उपभोगम्, अन्याय्यम् = अन्यायोचितं, मनुते = मन्यते? इति।

स तु = हितवादः "आर्य सिन्धुवाद! तथाविधान् = पूर्ववर्णितान्,

हुआ तथा हाथियों को कहानी सुनने से वे आश्चर्यचकित हुए। उन्होंने मेरी सातों समुद्री यात्राओं को स्वर्णाक्षरों में लिखवाकर, अधिकारियों को अपने रत्नकोष में रखने का आदेश देकर मुझ पर बहुत कृपा करते हुए अत्यन्त आदर के साथ मुझे विदा किया।

यह कहकर सिन्धुवाद ने सातों समुद्री यात्रा वर्णनों का उपसंहार करते हुए हितवाद से कहा-"प्रिय हितवाद! क्या तुमने इसके पूर्व ऐसे किसी व्यक्ति के

जनः श्रुतपूर्वः? अपि भवानियतो महतः क्लेशाननुभवतो सम्प्रति शान्तिसुखोपभोगमन्याय्यं मनुते?'' इति।

स तु 'आर्य सिन्धुवाद! तथाविधान् यात्रापरिक्लेशाननुभूय समुपार्जितविभवो भवान् सम्प्रति विश्रामसुखोपभोगं सर्वथा कर्तुमर्हति। अहं पुनरात्मनो दीनावस्थया खेदितस्तथाऽनुचितं प्रालपम्। क्षमस्व,

---

यात्राक्लेशान् = प्रवासदुःखानि, अनुभूय = उपभुज्य, समुपार्जितविभवः = सम्पादितसम्पत्तिः, भवान् सम्प्रति विश्रामसुखोपभोगं = विश्रामस्य सुखस्य च उपभोगं कर्तुम्, अर्हति = शक्नोति। अहं = हिजवादः पुनः, आत्मनः = स्वस्य, दीनावस्थया = दारिद्र्यदुरवस्थया, खेदितः = क्लेशितः, तथा = उपोद्घातवर्णितप्रकारेण, अनुचितम् = औचित्यं विहाय प्रालपम् =अजल्पम्। क्षमस्व = क्षमां कुरु, चिरं = बहुकालपर्यन्तं च, स्वपरिश्रमोपचितां = स्वस्य परिश्रमैः उपचिता = वृद्धिं नीता तां, श्रियं = सम्पत्तिम् उपभुङ्क्ष्व = उपभोगं कुरु' इति अवदत् = अब्रवीत्।

सिन्धुवादः तस्मै = हितवादाय, प्रत्यहमिव = प्रतिदिनवत्, दीनारशतम्, अतिसृज्य = समर्प्य, तम् आत्मनः = स्वस्य, दौवारिकपदे = द्वारपालपदे न्ययोजयत् = नियुक्तं चकार।

अन्ते श्लोकत्रयेण कथाकारः सिन्धुवादवृत्तस्य स्रोतः निवेदयन् सविनयं रसिकानभ्यर्थयति। एतदिति। नाम्ना श्रीमल्लक्ष्मणशास्त्रिणा आंध्रेण कविना सहस्ररजनीचरिताम्भोधिमन्थनात्, लब्धम्, अत्यद्भुतम्, एतत्, सिन्धुवादवृत्तकथामृतं

सम्बन्ध में सुना है, जिसने मुझसे अधिक कष्ट पाया हो। इतने बड़े कष्टों का अनुभव कर मैं जो इस समय शाँति और सुख का उपभोग कर रहा हूँ क्या आप उसे अनुचित मानते है।" उसने कहा–"आर्य सिन्धुवाद! आपने इस प्रकार की यात्राओं के कष्टों का अनुभव कर धन-अर्जित किया है, आप सम्प्रति सर्वथा विश्राम और सुख अनुभव कर सकते हैं। मैंने अपनी गरीबी के कारण खिन्न होकर इस प्रकार का अनुचित प्रलाप किया। आप मुझे क्षमा करें और अपने परिश्रम से अर्जित धन का चिरकाल उपभोग करें।"

उपभुङ्क्ष्व चिरञ्च स्वपरिश्रमोपचितां श्रियम्' इत्यवदत्।

सिन्धुवादस्तस्मै प्रत्यहमिव दीनारशतमतिसृज्य तमात्मनो दौवारिकपदे न्ययोजयत्।

एतत् सहस्त्ररजनीचरिताम्भोधिमन्थनात्।
लब्धमत्यद्भुतं सिन्धुवादवृत्तकथामृतम्।।

संस्कृते गद्ये अर्थतः अनूद्य सस्नेमर्प्यते इत्यन्वयः।

नाम्ना = संज्ञया श्रीमल्लक्ष्मणशास्त्रिणा = श्रीमता लक्ष्मणशास्त्रिणा, आंध्रेण =तज्जातीयेन "तैलङ्गोपाह्वेन द्विजरेण कविना = कवयित्रा सहस्त्ररजनीचरिताम्भोधिमन्थनात्- मूलतः अरवीभाषायां निबद्धं इदं कथानकम् आंग्लभाषाया "अरेवियन् नाइट्स्" इति संज्ञयाऽनूदितं- 'सहस्त्ररजनीचरितमिति'। तदेव अम्भोधिः = समुद्रः, तस्य मन्थनात्, लब्धं = प्राप्तम् अत्यद्भुतम् = अत्याश्चर्यकारकम्, एतत् सप्तसिन्धुयात्रावर्णनमयं, सिन्धुवादवृत्तकथामृतं = सिन्धुवादवृत्तनाम कथैव अमृतं = पीयूषं, संस्कृते गद्ये, अर्थतः = तात्पर्यतः, न तु शब्दतः, अनूद्य = रूपान्तरेण प्रस्तूय (रसिकेभ्यः) सस्नेहं प्रेमपूर्वकम्ः अर्प्यते = उपायनीक्रियते।

अत्र "अत्यद्भुतमिति" पदमस्मिन् गद्यकाव्ये अद्भुतरसस्याङ्गित्वमभिव्यञ्जयति। रूपकालङ्कारः। रसग्रहणार्थं कविः रसिकान् प्रार्थयते-

दोषानिति। रसिकाः, अमत्सराः, सन्तः, क्वचित् सतः, मनुष्यसुलभान् दोषान्, समुपेक्ष्य, एतद्रसम्, आस्वादयन्तु, इति वाक्ययोजना।

सिन्धुवाद ने उसे प्रतिदिन की तरह सौ दीनार देकर अपने यहाँ द्वारपाल पद पर नियुक्त किया।

यह 'सिन्धुवाद' अत्यन्त अद्भुत कथानक 'सहस्त्ररजनीचरितः नामक (अरबी) कथाग्रन्थरूपी समुद्रमन्थन में प्राप्त हुआ है।

आंध्र कवि श्रीमान् लक्ष्मण शास्त्री ने इसका भावात्मक संस्कृत गद्यानुवाद कर इसे (पाठ कों को) स्नेहपूर्वक समर्पित किया है।

आंध्रेण कविना नाम्ना श्रीमल्लक्ष्मणशास्त्रिणा।
अर्थतः संस्कृते गद्येऽनूद्य सस्नेहमर्प्यति।।
दोषान् मनुष्यसुलमान् समुपेक्ष्य क्वचित्सतः।
आस्वादयन्तु रसिका एतद्रसममत्सराः।।

रसिकाः = गुणग्राहिणो रसास्वादनदक्षाः सुजनाः, अमत्सराः = मत्सरोऽन्यशुभद्वेषः। "मत्सरोऽन्यशुभद्वेषे इत्यमरः।" तेन रहिताः, सन्तः, क्वचित् = कुत्रचित् स्थले, सतः = विद्यमानान्, मनुष्यसुलभान् = मनुष्योचितान्, दोषान्, समुपेक्ष्य एतद्रसम् = एतस्य सिन्धुवादवृत्तस्य, रसम् आस्वादयन्तु = आस्वादं गृह्णन्तु।

।।शुभं भूयात्।।

गुणग्राही सज्जनों से निवेदन है कि मनुष्यसुलभ दोषों की उपेक्षाकर इसमें सन्निहित रस का आस्वादन करें।

समाप्त




शारदा संस्कृत संस्थान
संशोधित
मूल्य 30
वाराणसी